॥ नमोऽस्तु रामाय ॥

श्रीरामानन्दचरितम्

(गद्यकाव्यम्)



माघकृष्णस्य सप्तम्यां रामभक्तिप्रवर्तकः।
रामानन्दः स्वयं रामः प्रादुर्भूतो महीतले॥

जगद्गुरु रामानन्दाचार्य स्मारक सेवा न्यास, वाराणसी

6·4

✠ श्रीसीतारामचन्द्राभ्यां नमः ✠

✠ श्रीरामानन्दाय नमः ✠

श्रीरामानन्दचरितम्

(गद्यकाव्यम्)

सत्प्रेरकाः

जगद्गुरुरामानन्दाचार्यपदप्रतिष्ठिताः

श्रीमद्रामनरेशाचार्यभगवत्पादाः

श्रीमठपीठाधीश्वराः, पञ्चगङ्गम्, वाराणसी

प्रणेता

डॉ. प्रभुनाथद्विवेदी

पूर्व-आचार्यः संस्कृतविभागे,

महात्मा गांधी काशीविद्यापीठम्,

वाराणसी

प्रकाशकः

जगद्गुरुरामानन्दाचार्य-स्मारक-सेवान्यासः

श्रीमठपीठम्, पञ्चगङ्गा, वाराणसी

दूरस्वनः ०५४२-२४०१०६६

श्रीरामानन्दचरितम्

द्वितीयावृत्तिः
श्रीरामनवमी, २०६८ विक्रमसंवत्सरः
१२ अप्रैल, २०११ ख्रिष्टाब्दः

मूल्यम्- ₹ २००/- (रु. दो सौ मात्र)

मुद्रक :
प्रिन्ट 'ओ' लैण्ड
बी-3, सुदर्शनपुरा इण्ड. एरिया, जयपुर
फोन : 0141-2210284

प्रकाशकः
जगद्गुरुरामानन्दाचार्य-स्मारक-सेवान्यासः
श्रीमठपीठम्, पञ्चगङ्गा, वाराणसी.

आचार्यमङ्गलाशंसनम्

।।नमोऽस्तु रामाय।।

महतः प्रमोदस्यायं विषयो यद्भगवतो रामस्यावतारभूतानां जगद्गुरुश्रीरामानन्दाचार्याणां पावनं जीवनचरितं सुललितोपन्यासविधायामवतारितं साम्प्रतं देववाण्यामप्यवतरति। को न वेत्ति यद् 'रामानन्दः स्वयं रामः प्रादुर्भूतो महीतले' इत्यादिवचनैर्जगति रामावतारभूतानां श्रीरामानन्दाचार्याणामुपकारो भारतभुवि नूनमाचन्द्रदिवाकरममरः स्थास्यति। धर्मक्षेत्रे समाजसुधारक्षेत्रे भक्तिमार्गविस्तारक्षेत्रे साहित्यप्रेरणाक्षेत्रे तेषामवदानमतुलनीयं किन्तु तेषां जीवनवृत्तमद्यावधि न तथा प्रस्तुतमभूद् यथा भारतीयास्तदधीत्य तेषां सकलां जीवनयात्रामवबुध्येरन्, तेषां कर्तृत्वं च सम्यग् जानीयुः।

यद्यपि तेषां जीवनवृत्तं 'श्रीरामानन्ददिग्विजया'ख्यसंस्कृतमहाकाव्ये संगुम्फ्य प्रस्तुतमभूत् कविप्रवरैराचार्यवर्यैः स्वामिश्रीभगवदाचार्यैः शताब्दिपूर्वं, यस्य हि महिमाऽपि विख्यातोऽभूज्जगति, तदनुजयपुरीयकविवर्यैः गोस्वामिश्रीहरिकृष्णशास्त्रिभिः सुललिते प्रौढे च संस्कृतगद्यकाव्ये 'आचार्यविजय'नाम्ना स्वामिरामानन्दाचार्याणां जीवनवृत्तेन सह तेषां दार्शनिकसिद्धान्तानां, रामानुजप्रस्थानात् तद्भेदानां च विवरणं प्रस्तुवन् ग्रन्थोऽभूद् विरचितो यः प्रकाशितोऽभूत् प्रायश्चत्वारिंशद्वर्षपूर्वम्। किन्तु सुललितजीवनचरितशैल्यां कथाशैल्यां वा नाऽभूत् तेषां चरितमुपलब्धम्। सुमहती सेयमपेक्षाऽभूत् संस्कृतविदां भारतीयपाठकानां च। एतस्याभावस्य पूर्तिरांशिकरूपेण कृताऽभूद् देव्या अमिताशाहनाम्न्या लेखिकया प्रणीतेन 'काशीमार्तण्ड', 'शंखनाद'

इत्याख्येन हिन्दीभाषानिबद्धेन जीवनचरितविषयकोपन्यासद्वयेन। हिन्द्याः खलु पाठका देशे विपुलाः, अतो हिन्द्यां तादृशग्रन्थानामभूत् सुमहती काचिदपेक्षा समाजे।

अस्या अपेक्षायाः सम्यक् पूर्तिः कृताऽभूत् कोटानगरस्थेन हिन्दीसाहित्यकारेण डॉ. दयाकृष्णविजयवर्गीयेन यो राजस्थानसाहित्यअकादम्या अध्यक्षचरोऽप्यभूत् 'आञ्जनेया'दिमहाकाव्यकारोऽप्यभूत्। तद्विरचितः 'पायसपायी'ति शीर्षकं बिभ्राणः सुललितो जीवनवृत्तं (श्रीरामानन्दाचार्यचरणानां) साधु कथाशैल्यां प्रस्तुवन्नयं हिन्दीभाषोपन्यासो बहूनां गुणानामेकत्र समन्वयमकरोत्। कथाया लालित्यं वहता आचार्यचरणानां जीवनस्य तत्कृतसामाजिकसुधारस्य, लोकोपकारस्य, तेषामुपदेशस्य, सन्देशस्याचरणस्य च स्वारस्यं पठनीयोपन्यासशैल्यां प्रस्तुतवता चाऽनेन ग्रन्थेन पाठकानां हृदयान्यावर्जितानि। अतोऽस्मत्प्रेरणयैतस्य राजस्थानसंस्कृत-अकादम्या अध्यक्षचरेण, राजस्थान-भाषाविभागनिदेशकचरेण जगद्गुरुरामानन्दाचार्यपुरस्कारसभाजितेन संप्रति जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत-विश्वविद्यालयस्याधुनिकसंस्कृतपीठाध्यक्षेण पण्डितप्रवरेण देवर्षिकलानाथशास्त्रिणा विहित आंग्लभाषानुवादोऽपि 'स्वामी रामानन्द : द पायोनियर ऑफ रामभक्ति' (Swāmī Rāmānanda : The Pioneer of Rāmabhakti) शीर्षकेण गते वर्षे प्राकाश्ययतेति महान् सन्तोषः।

अपरोऽयमधुना सन्तोषस्य महानवसरो यदस्य पायसपायीत्याख्यस्य हिन्दीभाषोपन्यासस्य संस्कृतेऽनुवादः सुप्रथितेन कथाकारेण, संस्कृतविद्वत्प्रवरेण महात्मागांधी-काशीविद्यापीठे संस्कृतविभागीयाचार्यपदमधितिष्ठता डॉ. प्रभुनाथद्विवेदिना साधु समनुष्ठितः। अत्रापि तदेव हृदयावर्जकं कथाप्रस्तुतीकरणं, सरलया प्राञ्जलया च भाषया एकादशखण्डेषु श्रीरामानन्दाचार्याणां जीवनयात्राया विवरणं सहैव तेषां भारतयात्राणां तदेव वर्णनं येन हिन्दीभाषाया पाठकाः प्रेरिताः प्रमुदिताश्चाभूवन्, संप्रति संस्कृते समुपलभ्येतेति सुतरामभिनन्दनीयं कृत्यं, यतो हि संस्कृतममरभाषा, युग-युगान्तरेष्वपि तस्याः स्वरूपमविकलं स्थास्यति। अनेन हि हिन्द्याः सोऽयमुपन्यासोऽप्यजरामरः प्रसेधितः। एतदुपलक्ष्य वर्धापयामो वयं लेखकमनुवादकं, सर्वानपि प्रकाशनसहयोगिनः पाठकांश्च।

हरिद्वारपुरी
श्रीमद्धनुमज्जयन्ती।
चैत्री पूर्णिमा, २०६७ वि.।
३० मार्च, २०१० ख्रि.।

श्रीसीतारामचन्द्रचरणाश्रितः

रामनरेशाचार्य

(स्वामी रामनरेशाचार्यः)

नमोवाक्

'श्रीरामानन्दचरितमि'ति गद्यकाव्यं काशीस्थश्रीमठपीठाधीश्वराणां जगद्गुरुरामानन्दाचार्यश्रीरामनरेशाचार्याणां महात्मनां सत्प्रेरणया विरचितम्। काव्यमेतदस्ति खलु जीवनवृत्तमौपन्यासिकं भगवतो रामस्यावतारभूतानां पुण्यश्लोकानां परमकारुणिकानां लोकवन्द्यानां श्रीमज्जगद्गुरुरामानन्दाचार्याणाम्। हिन्दीभाषया रचितं 'पायसपायी'ति डॉ. दयाकृष्णविजयवर्गीयमहोदयेनकृतं स्वामिवर्याणां जीवनवृत्तं काश्यां श्रीमठमुपगङ्गाप्रवाहतरणिकुट्टिमे सोत्सवं स्वामिश्रीमद्रामनरेशाचार्यवर्यैः लोकर्पितम्। तस्मिन् शुभानुष्ठाने श्रीमठाधीश्वरैराचार्यवर्यैः स्वीये शुभाशीर्वचने समाशंसितं यदस्य ग्रन्थस्यानुवादो भवेत्संस्कृतेऽथ चाङ्ग्लभाषायाम्। तदानीं मे शिवसङ्कल्पे मनसि यत्प्रादुर्भूतं तन्मया तत्रैव सर्वसमक्षं निवेदितं यदेष जनो वर्षमितं कालमुपयुज्याऽस्यानुवादं संस्कृतेन विधास्यति। तद्वचः सर्वैरभिनन्दितम्।

कस्मिंश्चिदपि शुभे सङ्कल्पे प्रत्यवायाः निपतन्त्येव। यथाकालं प्रारब्धमपि ग्रन्थानुवादकार्यं पौनःपुन्येन विघ्नैः प्रतिहन्यमानमन्ततः सम्पूर्तिमगात् किन्तु प्रतिश्रुतं कालमतिक्रम्यैव। भवेन्नामास्मिन्नपि तस्यैव भगवतः काचिदचिन्त्या समीहा। सङ्कल्पित आसीत्पूर्वं तस्य 'पायसपायी'ति ग्रन्थस्य संस्कृतानुवादः। किन्तु भाषाणां प्रकृतेर्वैलक्षण्यवशादेतदनुवादकार्यमपि तदतिरिच्यैवाभूत्। मूलग्रन्थे बहवः प्रसङ्गा अपि तादृशा आसन् येषामुपबृंहणमपेक्ष्यते स्म। तथा कर्तुं प्रयतताऽनेन जनेनेदं जीवनवृत्तं कामपि स्वोपज्ञतामिव नीतम्। अथास्य निर्माणे मूलभित्तिस्तु पायसपायीगतं वस्तु किन्तु 'श्रीरामानन्दचरितमि'ति गद्यकाव्यरूपं भवनं तद्विलक्षणमेव।

नायं जनो भाषासमर्थो नापि रचनाचतुरः सिद्धलेखनीकः। इत्थं भवेन्नामास्मिन् ग्रन्थे स्खलनम्। अतः क्षम्रायाच्ञामुररीकृत्य प्रसीदन्तु सुधियो बालचापलञ्चानुभूय

नन्दन्तु गुरवः साधवः। अस्य महत्कर्मणः सत्प्रेरकानां परमश्रद्धेयानां श्रीमठपीठाधीश्वराणां श्रीमद्रामनरेशाचार्याणामथ च गुरुवर्याणां प्रो. अमरनाथपाण्डेयमहाभागानां चरणेषु प्रणामाञ्जलिं निवेदयत्येष जनः। सम्मान्यानां विदुषां देवर्षिकलानाथशास्त्रि-महोदयानामाधमर्ण्यं वहति नमस्कारपूर्वकम्। प्रियवरं प्रो. सतीशकुमाराख्यमहाशयं, डॉ. उदयप्रतापसिंहमहोदयं, श्रीदयासिन्धुशर्ममहोदयं च प्रति स्नेहाशीर्वचांसि प्रहिणोति कार्तज्ञं च ज्ञापयति तान् सर्वान् प्रति येषां कणमपि साहाय्यमस्मिन् कर्मणि विद्योतते। अन्ततो भगवतो जगद्गुरुश्रीरामानन्दाचार्यस्य प्रसादं शिरसा वोढुमभिलषत्ययं जनः।

यदि श्रीसीतारामस्मरणे मतिः
यदि श्रीरामानन्दचरिते रतिः।
श्रीरामनरेशाचार्यचरणे नतिः
तद्धि विलसतु चिरं ते कल्याणततिः।।

हरिद्वारमहाकुम्भपर्व,
शुद्धवैशाखकृष्णामावास्या,
२०६७ तमो वैक्रमाब्दः।
१४ अप्रैल, २०१० खि.।

विदुषां वशंवदः
प्रभुनाथद्विवेदी

द्वितीयावृत्तेः किञ्चित्

श्रीरामानन्दचरितस्य प्रथमावृत्तौ प्रकाशितस्य ग्रन्थस्य लोकार्पणं हरिद्वार-कुम्भपर्वणो महोत्सवस्य पुण्येऽवसरे हरिद्वार एव श्रीमठपीठस्य शिविरमञ्चतो जगद्गुरुरामानन्दाचार्यपदप्रतिष्ठितानां श्रीमद्रामनरेशाचार्यभगवत्पादानां करकमलैरभूत्। जयपुरतो मुद्रकेन प्रथमावृत्तेः समस्ता ये ग्रन्थबन्धास्तत्रानीतास्ते सर्वे तेभ्यस्तेभ्यो धर्माचार्येभ्यस्तेषु तेषु धर्मशिविरेषु सम्प्रेष्य जगद्गुरुभिरुपायनीकृताः। एवं ते सर्वे ग्रन्थबन्धा अशेषतां गताः। लोकार्पणविधौ जगद्गुरुभिरस्मै अपि जनाय ग्रन्थस्यैको बन्धः सस्नेहं प्रदत्तः। अवलोकिते सति तत्र काश्चन मुद्रणत्रुटयो दृष्टाः। मुद्रणप्रक्रियायां समुचितावधानाभावात्संशोधकस्यैवं भवत्येव। विनिवेदिते सति श्रद्धेयाः जगद्गुरवः श्रीमद्रामनरेशाचार्याः प्रोचुः- "मयाऽप्येवं दृष्टमि"ति। एतत् श्रीरामानन्दचरितं हरिद्वारे कुम्भपर्वणि लोकार्पितं तत्रैव वितरितमतो न गतं दृष्टिपथे संस्कृतविदुषामिति ग्रन्थस्य द्वितीयावृत्तिस्तु करणीयैव। एवमादिष्टोऽयं जन आचार्यवर्यैस्तस्य संशोधनार्थम्। ततः प्रतिनिवृत्त्य वाराणस्यां ग्रन्थः संशोध्य पुनरपि प्रकाशनाय श्रीमठे प्रेषितः। ततोऽपि जयपुरगतो व्यतीतेऽपि वर्षमिते काले यथास्थितिं विलोक्य वाराणस्यामेव मुद्रणार्थमादिष्टवन्तो जगद्गुरवः। श्रीमठाद् द्वितीयं ग्रन्थबन्धं प्राप्य संशोध्य च तेषामेव निदेशतो मुद्रणाय श्री राजकुमार जायसवाल महोदयो (डी.जी. प्रिण्टर्स इति) नियोजितः।

अस्मिन्नुपक्रमे जनेनानेनाऽसकृत् श्रीरामानन्दचरितामृतं पीतम्। तस्यैव भगवतः प्रसादात् काशीतोऽयं ग्रन्थः पुनः प्रकाशितो द्वितीयावृत्तिमाप्तवान्। वस्तुतोऽस्मिन् विधौ जगद्गुरुरामानन्दाचार्यश्रीमद्रामनरेशाचार्याणामनुकम्पैव प्रसीदतीति परमं पवित्रं रसनिर्भरं पिबन्तु सुधियः श्रीरामानन्दचरितामृतम्।

'त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितमि'ति शम्।

वाराणसी,
रामनवमी, २०६८ वि.।
१२ अप्रैल, २०११ ख्रि.।

विदुषां वशंवदः
प्रभुनाथद्विवेदी

अथ

श्रीरामानन्दचरितम्

भक्तिपुम्भावसत्त्वाय जीवोद्धारधृतात्मने।
कलौ रामावताराय रामानन्दाय वै नमः।।

(१)

तीर्थराजः प्रयागः। आवासः पण्डितवरस्य श्रीपुण्यसदनशर्मणो गङ्गायां घोष इव विराजमानो मनोहरस्त्रिवेणीसङ्गमान्नातिदूरेऽवस्थितः। स्वच्छे पूजाकक्षे स भगवतो वेणीमाधवस्य साम्मुख्यं भजते ध्यानमग्नो निर्विघ्नं मौनो जपति मन्त्रम्। तदैव तनयो रामदत्तो मातुः सुशीलादेव्याः सकाशाज्जानुभ्यां शनैश्शनैरपसरन् पूजाकक्षे प्रविश्य तत्र भगवतो वेणीमाधवस्य समक्षं रुचिरांशुकसञ्छादितदारुपीठसंस्थापितं दक्षिणावर्तं शङ्खं करयोः कृत्वा दध्मौ। कर्णकुहरप्रविष्टशङ्खनादेन खण्डितैकाग्रध्यानः संक्षुब्ध इव प्रतीयमानः पण्डितपुण्यसदनो रोषविवशनिष्पीडितरदनो यावन्नेत्र उन्मील्य पश्यति तावत्तथावस्थं रामदत्तमबोधशिशुं वीक्ष्य स्तम्भितः। सहसा तस्यानने विस्मयो विक्षोभश्च युगपदेवाविष्कृतौ। यस्माच्छङ्खादसम्भवप्रायं ध्वनेरुत्थानं प्रौढैरपि जनैस्तमेव शङ्खं दध्मौ वर्षमात्रायुरयं शिशुरिति विस्मयः। नासीत्सामान्यः स दक्षिणावर्तशङ्ख इति विक्षोभः। सन्तुष्टाराधानः प्रसन्नः स भगवान् वेणीमाधवः स्वयमेव भार्यायाः सुशीलादेव्याः याचनाञ्चिताञ्चले प्रसादकुसुममालया सहैतं दक्षिणावर्तशङ्खं निक्षिप्तवान् तस्मादेव कालात् स शङ्खस्तत्रैव पूजाकक्षे वेणीमाधवप्रतिमासमक्षं संस्थापितो वर्तते।

शिशोरनेनाचरणेन तस्य पितुश्चेतः क्रोधावेशविवशोऽभूत् परन्तु 'बालकोऽयमबोध'- इति विचार्य क्रोधोत्थः करः पुनरप्यधोऽभवत्। तेन शर्ममहोदयेन पत्नी सुशीलाऽऽकारिता। तां ससम्भ्रममागतां विलोक्य स सरोषमुवाच- "अतोऽपनय एनम्। पश्य कृत्यमात्मनः प्रियवत्सलस्य। पवित्रोऽयं पूजाशङ्खोऽनेनाशुद्धः कृतः।"

"अप्यनेनैवायं शङ्खो ध्मातः?"

"अथ किम्? कोऽन्यः?"

"अस्त्येवातीवदुर्ललितोऽयम्। न जानेऽतः किं किं करिष्यति?" इत्येवं निगदन्ती सुशीला तं सानुशयमपानयत्। शर्मणा यथाकथञ्चित् तन्नित्यपूजाविधिर्निर्व्यूढः किन्तु नानाविधाभिरतर्क्यशङ्काभिस्तस्य मनोमन्थनं प्रचलिति स्म। अतिस्नेहः पापशङ्की भवत्येव। नानानिष्टभावतरङ्गैस्तस्य मानसमान्दोलितमासीत्। मन्ये, अस्मत्प्रार्थनापरम्परा सुपुष्पिता, साधनासरणिः फलिता यदाऽस्मिन् गृहे सौभाग्यात्किलकिताः सुगुञ्जिताः। कति तीर्थयात्राः कति मन्दिरदर्शनानि कृतवती सुशीला। असंख्येयाः सन्ति खलु तस्य व्रतोपवासाः। न जाने कियद्देवपूजाप्रतिज्ञानन्तरं तस्याः क्रोडे प्रस्तरे दूर्वाङ्कुर इव बालशाद्वलस्निग्धश्यामलता समदृश्यत्। शिशोरनेनाकरणीयेन नो चेदप्रसन्नो भूत्वा देवता कुर्यात्किमप्यनिष्टम्। एतास्वेव दुश्चिन्तासु स यावद्दिनमात्मानमपि विस्मृत्य स्थितः। तं सहजं विधातुं सुशीला किमपि किमप्यक्रमं जल्पितवती। आश्वासनतत्परा पतिहितचिन्तातुरा सा प्रबोधितवती- "अज्ञो वै बालः कथ्यते। बालस्तु साक्षाद्भगवत्स्वरूपमेव। प्रमादस्तु बालानां स्वभावो यतो हि तेषां विवेकबुद्धिर्नास्ति। वत्सो रामदत्तोऽपि तथैव। देवास्तु बालकृतानपराधान् सहजमेव विनोदयन्ति। भवतो भावुकता काऽप्यधिकैव प्रतीयते। नास्त्येव तद्यद् भवताऽनुमीयते।" रात्रावेव सुशीला पतिदेवं प्रसन्नं सहजञ्च विधातुं सर्वथा प्रयतितवती। किन्तु पुण्यसदनोऽन्तर्व्यथया मुक्तो नाभवत्। स तथैव गभीरचिन्तामग्नो विवर्तनपर आसीत्। निशीथे कथं कथञ्चिज्जातनिद्रः सुष्वाप। स्वप्ने सोऽपश्यत्साक्षाद्भगवन्तं वेणीमाधवम्। मन्दस्मितो ललितविग्रहः करुणावरुणालयो भगवान् वेणीमाधवः स्वयं दर्शनं दत्वा विस्मितवदनं पुण्यसदनं प्रोवाच- "वत्स, अलं दुश्चिन्तया। दक्षिणावर्तमिमं शङ्खं स्वयं जानकीवल्लभो राम एव वादनेन सत्कृतवान्। अपि स्मरसि, पूर्वस्मिन् जन्मनि युवां हृषीकेशे द्विजदम्पती आस्व। तदानीं हिमगिरौ पूतधाम्नि बदरिकाश्रमे त्वयाऽऽत्मजाननविलोकनाभिलषितेन सुदुष्करं तप आचरितम्। श्रीराम एवावतरतु कुक्षौ जायाया इति ते मनोरथ आसीत्। ततश्च प्रीतो भक्तवत्सलः प्रभुः श्रीरामो युवयोरस्मिन् जन्मनि सुशीलाया अङ्के वात्सल्यपात्रतां गतः। सोऽयं रामदत्तः। वादयत्वेष शङ्खम्" इत्येवं प्रबोध्य जगद्गुरुर्वेणीमाधवोऽन्तर्दधौ। पुण्यसदनस्तु

तत्क्षणमेव विगतनिद्रोऽभूत्। तस्य हर्षानन्दविस्मयानामियत्तैव नासीत्। सोत्कण्ठितेन तेन सन्निर्बन्धं झर्झनेन सा सुशीला जागरिता विहिता।

स उवाच– "सुशीले! रामदत्तो भगवतो रामस्यैव सगुणो विग्रहः। सद्य एव स्वप्ने भगवान् वेणीमाधवः सानुग्रहदर्शनं मां प्रबोधितवान्।"

"किमदं सत्यम्।"

"अथ किमहमलीकं त्वां वच्मि?"

श्रवणमात्रेणैतत्सुशीला तनयं रामदत्तं प्रति श्रद्धायुतेन ममत्वेनाभिभूता बभूव। मधुनिद्रागतं रामदत्तं महता स्नेहेन समुत्थाप्य वक्षसा समाश्लिष्टवती विवर्त्य चोभयोर्मध्ये शायितवती। वात्सल्यातिरेकतश्चुचुम्ब कपोलौ। आसन् तदानीं तस्याः नेत्रयोः हर्षाश्रुबिन्दवः। अब्रवीच्च श्रद्धास्नेहपुलकिता– "धन्यं मे जीवनं जातम्। अतिकारुणिकः कृपालुरयमीश्वरः।" शर्मा तु परिवृत्य जातनिद्रः सुष्वाप किन्तु सुशीलायाः नेत्रतो निद्रा क्वचिद्दूरङ्गता। सा रात्रिपर्यन्तं हर्षनिर्भरनेत्राभ्यां पुत्रं रामदत्तं दर्शं दर्शं परिचुम्ब्याऽऽश्लिष्य च भाविसुखस्वप्नेषु निमग्ना। अशेषानस्य संस्कारान् वैदिकविधिना कारयिष्यामि। अधीतसकलविद्योऽयं पूर्णपुरुषो भविष्यतीति नानाशुभसङ्कल्पैस्तस्या रात्रिरेव व्यरंसीत्।

अपरेद्युः प्रातर्वेलायां भुवनभास्करस्य स्वर्णरश्मिभिः संस्पृष्टा वसुधा जातरूपशोभया ह्यालोकिता जाता। नित्यनैमित्तिककृत्येभ्यो निवृत्तं पतिं पण्डितपुण्यसदनं विलोक्य प्रसन्नवदना चारुस्मितनयना सुशीला चक्षुविभ्रमविलासेन तस्याऽपि नेत्रोत्सवं विदधती निजगाद–

"रात्रौ भवान् तु सुप्तः.......।"

"किं त्वमलब्धनिद्रैवासीः?"

"रात्रिपर्यन्तं न जाने कियन्तः क्वाचित्काः विचाराः प्रादुरासन्। तानि सर्वाण्यपि घटितानि पुनरायातानि स्मृतिपथे, यस्मिन् दिने भगवान् वेणीमाधवः पूजासमये मम प्रसृतेऽञ्जले आशीर्वादरूपां प्रसादमालां दक्षिणावर्तञ्चेमं शङ्खं निक्षिप्तवान्, तदानीमेव मया भगवत्प्रकाशस्य दर्शनं गर्भस्थितेश्चानुभूतिः कृता। शीततौँ यदा गृहाङ्गणे स्थितां सूर्यांशुसेवनपरां मां प्रति कथमिव सूर्यप्रभाविनिर्गतमेकं तेजःपिण्डं समायातं तदा मम मुखं स्वत एव विवृत्तं, स च ज्योतिःपुञ्जः सहसैव (मम) जठरे प्रविष्टः। भगवान् वेणीमाधवः स्वप्ने समागत्य तानि सर्वाणि घटितानि सार्थकानि प्रमाणीकृतवान्। तानि नासन्ननपेक्षितानि। अयन्तु श्रीरामस्यागमनसमारम्भ आसीत्।"

"महाभागे! यदा नारायणः पृथिव्यामवतीर्य लीलावपुर्धारयति तदा लौकिके कुटुम्बे आश्चर्यपराः घटनाः सम्भवन्त्येव। अवतारपुरुषा नैवायान्त्येकाकिनः। तैस्सह तेषां पार्षदशक्तयोऽपि नानारूपैरवतरन्ति। अपि स्मरसि प्रयागे तद्वृत्तान्तं यस्मिन् यवनमतमस्वीकुर्वाणं मनसुखं ते यवनसम्प्रदायवादिनो मोहम्मदीयाः हन्तुं समुद्यता आसन्, ततः कथं स निजं कुटुम्बं निभृतं परित्यज्य, आत्मानं वने सुगोप्य प्राणान् ररक्ष। तत्रैव निर्जने वने निवसन् तपोव्रताराधनया प्रसाद्य भगवन्तं, राष्ट्रस्य सनातन-धर्मस्य च रक्षायै शुभाशीषं लेभे। केयं शक्तिः कुत्र च कस्मिन् रूपेऽवतरिष्यतीति वयं न जानीमः। एतत्सर्वं तदनन्तरमेव विज्ञायते।"

"इतिहासो न केवलममुमेवापित्वावामप्युल्लिख्यामरौ विधास्यति। भगवता रामेण सह, अपि नामराः पितरौ भ्रातारो वा?" इत्येभिर्वचोविन्यासैर्यदा सुशीला स्वाङ्कगतं रामदत्तं सहर्षं चुचुम्ब तदा ममत्वं साक्षान्मूर्तिमन्तं बभूव। हर्षनिर्भरास्रसिक्तनेत्रयोरासीदनिर्वचनीयं ज्योतिर्जनन्याः। प्रयागस्य प्रयतज्योतिर्विद्भिरस्य शिशोर्नाम सम्यग् विमृश्यैव कृतं 'रामदत्त' इति। तेषु चर्चाऽऽसीद् यदस्य जन्मकाले सिद्धियोगो घटितः।"

"भगवतो वेणीमाधवस्य स्वप्नभणितिरेव प्रमाणम्। ततः कोऽवशिष्टः सिद्धियोगः?" प्रोवाच सुशीला गद्गदवचसाऽऽन्दोलयन्ती रामदत्तं निजकटिदोलायाम्।

"सुशीले! एतादृशां महात्मनां प्राकट्यमप्यनितरसाधारणं भवति। तेनैव तदानीमस्य जन्मतोऽचिरपूर्वमेव ब्राह्मणाः सिद्धपुरुषाश्च गृहपरिक्रमां कुर्वाणाः समागत्य द्वारस्था बभूवुः। तथाभूतान् तान् दृष्ट्वा, 'अद्य माघमासस्य कृष्णपक्षीया सप्तमीतिथिरि'ति मयाऽनुमितं यत् पर्वदिनमुद्दिश्यैते महात्मानः त्रिवेणीस्नानाय आयान्ति। प्रसवानन्तरमरोदनादस्य, 'मृतोऽयं शिशुरि'ति मन्यमाना सा त्वमपि रोदितुमारेभे। भवनं शोकमग्नमासीत्। यदि ते सिद्धपुरुषाः पूर्वत एव द्वारस्थाः न स्युस्तदेनं समाधिस्थं शिशुं समाधेः क उद्धर्तुं प्रभवेत्?"

"मदीयाः प्राणा नापगता इत्येतदेव बहु मन्तव्यम्। जनन्यो नवमासपर्यन्तं कियत्कष्टं सहन्ते! आसृष्टेः नारीणां प्रसवपीडां को विज्ञातुमर्हति? 'अहो नाटकमि'त्येज्जनैरुपहस्यते।" सुशीलायाः स्वरे भावविद्धाऽन्तर्व्यथाऽऽसीत्।

"नास्त्येवं, सुशीले! पुरुषाणां चिन्ता त्वन्तर्गूढा भवति। नारीणां पीडा हि विगलदश्रुपरीवाहो भूत्वा समेषां दृष्टिविषयतां याति।"

"अस्य रोदनं नाभवच्चेत्, अविरतनयनजलसिक्ता मेऽसवः स्वर्गगा-

मिनोऽभूवन्निति मन्ये। नाहं जाने समाधिं वमाधिम्। धरणीं स्पृशता सद्योजातेन शिशुना रोदितव्यमेवेति जीवनस्य प्रमाणम्।"

"सुशीले! एते सन्तः केचन दिव्यसन्त आसन्। तेषां नासीत्किञ्चिदप्यविदितम्। कोऽप्याकारयत्विति ते प्रतीक्षमाणा आसन्। यावत्तेऽन्तः प्रविशन्ति स्म तावदेव शिशुना नेत्रे विस्फारिते। अहो दिव्यं ज्योतिस्तन्नेत्रयोः! तत्समक्षं तु मे चक्षुतेजः प्रतिहतम्।" निवर्तमानाः सिद्धाः ब्रुवन्ति स्म- "वयमादिष्टा अत्रोपस्थानाय पूर्वत एवास्य जन्मनः।"

"अपि ते केचन देवदूता?"

"सुशीले! महाशक्तीनामवतारकाले तृणमपि तासां साहाय्यं विधत्ते। महान्तमुद्देश्यमभिलक्ष्य महत्कर्म कर्तुमेव ता विभूतयोऽवतरन्ति। अस्माभिरपि पण्डितैर्निर्दिष्टा सकलशास्त्रोक्त-संस्काराः यथाकालं निष्ठया प्रतिपादनीयाः। अपि स्मरसि तान् निर्देशान् द्विजमुख्येन वारुकमिश्रेण प्रबोधितान्?"

"स्मरामि सम्यक्। कुदृष्टिस्पर्शाच्छिशोर्गोपनम्, वर्षत्रयपर्यन्तं गृहान्न निःसरणम्, अन्नवर्ज्यश्च केवलं दुगधाहारः।"

"प्रायेणैतान्यतिसामान्यानि। मुख्यन्तु बालस्य स्वास्थ्यमारोग्यञ्च। अस्तु, प्रातः मध्याह्ने, सन्ध्यायां शयनाच्च पूर्वमिति चतुर्वेलासु यत्प्रभुणा वेणीमाधवेन निर्दिष्टमनेन शंखवादनमिति स्वप्ने, तस्य पालनं त्वया कारयते न वा?"

"अनिर्विघ्नमप्रमादं पालनं भवत्येव। यदायं बालः कराभ्यां विधृत्य शङ्खनादं करोति, अनुभूयते खलु काचिदनिर्वचनीया परमोल्लासमयी स्वर्गसुखप्रदा शान्तिस्तदा। कायेन सह मनोऽपि प्रसीदति। एषः शङ्खध्वनिस्त्वतिविमुग्धकरः।"

शुभं दिनं तिथिश्च श्रीपञ्चमी। वयसा चतुर्थे वर्षे प्रविशति बालको रामदत्तः। महापण्डितेन वारुकमिश्रेण निर्धारितमासीत्खलु दिनमिदं रामदत्तस्यान्नप्राशनाय कर्णच्छेदनसंस्काराय च। प्रातःकालादेव गृहे आसीदुत्सवोल्लासः। मुंहूर्तात्पूर्वमेव सुशीला गृहाजिरं गोमयेन सुलिप्तं कारयित्वा तत्र मध्ये गैरिकपाण्डुमिश्रितेन पिष्टातकेन चतुरस्रशोभिमण्डनमारचितवती। तत्र मण्डनमण्डले चतुष्कपीठं स्थापयित्वा आसनमास्तरितम्। सुशीला रामदत्तमङ्के निधाय, चन्दनपीठमारुह्य स्थित्वा वैदिक-लौकिकविधिविधानतो देवार्चनं सम्पादितवती। सेविकया नैवेद्यभरभोगस्य स्थालमग्रेसारितम्। तद्दृष्ट्वा शिशुः रामदत्तः पायसपात्रं प्रति दक्षिणकरं व्यापारयामास। रजतचमसेन जननी स्वल्पं स्वल्पं पायसं स्नेहैकाश्रयं तनयं सुशीला यथेच्छं भोजितवती। प्रसन्नवदनः पुण्यसदनः तत्र स्थित्वा दृश्यमिदं दृग्गोचरं कृतवान् मुखगतं चमसं वीक्ष्य स करतलवादनेन पुत्रं समाजयामास। ततश्च सुशीलया तेनैव चमसविधिना

तस्य मुखे किञ्चित् सूपोदकमपि मेलितम्। अतः परं कर्णच्छेदनस्य शुभसंस्काराय स्वर्णकारस्त्वाहूत एव। तदर्थं शर्ममहोदयेन प्रथममेव लघुवलयद्वयं काञ्चनकर्णालङ्कारभूतं सज्जितम्। कर्णालङ्कारौ शिशुं प्रदर्शयन्नाह- "अपि धारयितुं ते रोचते?" यावच्छिशुः दृष्टिमुन्नमय्य पश्यति तावत् स जनकस्तमङ्के समारोप्य स्वर्णकारान्तिकमुपविष्टः। बालकस्य करे सुमधुरं मोदकं ग्राहयित्वा स तस्य मनोविनोदं कुर्वन्नासीत्, इतः स्वर्णकारेण झटित्येव शिशोर्दक्षिणेकर्णे स्वर्णशालकावेधविधिना स्वर्णवलयः पिनद्धः। पीडया शिशू रामदत्तो यावद् विचलति तावत्पितुर्बाहुभ्या-मीषन्निगडितस्य तस्यापरेऽपि कर्णे तथैव वलयं कृत्वा द्वयोरपि कर्णयोश्छिद्रस्थाने शुष्कहरिद्राचूर्णं पूरितवान्।

प्रयागस्थविद्वन्मण्डले पण्डितपुण्यसदनशर्मणो महती प्रतिष्ठाऽऽसीत्। तथापि नैजेषु गृहकृत्येषु दैवज्ञो विद्वान् भिषगश्च सफलप्रयोगो न भवतीति लोकमान्यता-मतर्किताामेवानुपालयन् स बालकं रामदत्तं प्रति सर्वमपि करणीयं सदैव पण्डितवर्येण वारुकमिश्रेण परामृशति। अतस्तस्य निर्देशमनुसृत्य सुपुत्रस्य रामदत्तस्य शिक्षारम्भो गृह एवाभवत्। आचार्यः पुण्यसदनो गुरुः प्रथममष्टाध्याय्यमरकोशौ तं कण्ठस्थौ कारितवान्। ततो रामदत्तः स्वत एव रामायणमहाभारतादिधर्मग्रन्थान् पठितुं कण्ठस्थीकर्तुञ्चारेभे। मेधाविनस्तस्य स्मरणशक्तिस्त्वपूर्वविलक्षणाऽऽसीत्। एकवारमेव श्रुत्वा पठित्वा स बुद्धौ सम्प्रधार्य तद्विषयवस्तु कण्ठस्थं श्रावयति स्म। एवमभ्यासो वर्षत्रयपर्यन्तं प्रचलति स्म। अमरकोशोऽष्टाध्यायी रामायणञ्चैतद्ग्रन्थत्रयं बालकेन रामदत्तेन वर्षत्रयस्याल्पीयसा कालेनैव कण्ठस्थीकृतम्। प्रयागस्य विद्वत्समाजे बालकस्य रामदत्तस्य प्रतिभा प्रसरत्विति मनीषितं शर्ममहोदयेन यत्तेऽभिजानन्तु मानयन्तु चास्य बुद्धिप्रकर्षम्। अतः स विद्वन्मित्राणि स्वगृहे समाहूय तैः शलाकाविधिना ग्रन्थपाठान् श्रावं-श्रावं बालकस्य बुद्धिवैभवस्य सुनिपुणं परीक्षणं कारितवान्। ते सर्वे निशितनिकषोत्तीर्णस्य रामदत्तस्याऽल्पवयसो भूरिशः प्रशस्तिं चक्रुः। शनैश्शनैरियं वार्ता प्रयागे कर्णपरम्परया व्यापृता बभूव। अनाहूता अपि विद्वांसः पण्डिताः कौतुकिनश्च सज्जनाः तं प्रतिभासम्पन्नं बालकं द्रष्टुं श्रोतुञ्च पुण्यसदनस्य पुण्ये सदने आयान्ति स्म। अतः परं रामदत्तस्य रुचिः श्रीमद्भागवतपुराणस्य पारायणे कण्ठस्थीकरणे च समजायत। तेन वेदे, व्याकरणे, दर्शने चाप्यभिरुचिः प्रदर्शिता। बालकस्यालौकिकं प्रातिभपाण्डित्यं विमृश्य महान्तोऽपि विद्वांसः चमत्कृता आसन्। त एवं स्तुवन्ति स्म- "यद्ययं बालकः काशीं गत्वा सुयोग्यानां विद्वद्वर्याणां चरणेषु स्थित्वाऽध्ययनं करोतु, वेदवेदाङ्गधर्मशास्त्रदर्शनेषु निष्णातो भूत्वा वैदुष्यस्य परां कोटिमधिरुह्य स्थास्यति।"

बालको रामदत्तोऽप्यनुभवति स्म यत्स काशीं गत्वा शास्त्राणां गहनमध्ययनं करोतु। पुत्रस्य मनोऽभीप्सितमालक्ष्य पित्रा शर्ममहोदयेन दर्शनशास्त्रस्याध्यापनव्यवस्था गृह एव कृता। न्यायशास्त्रं स स्वयमेवाध्यापयति स्म। कस्यचिदपि विषयस्य जटिलग्रन्थिनिर्ग्रथनं न्यायनिष्ठबुद्ध्यैव तत्कालं कर्तुं न्यायशास्त्रस्य सुमहत्प्रबोधोऽपेक्ष्यत एवातोऽस्य शास्त्रस्य साध्यवसायमध्ययनं कर्तव्यमिति शर्ममहोदयस्य मान्यताऽऽसीत्। रामदत्तस्य सप्तमं वर्षं पूर्णतामेतीति तस्योपनयनसंस्कारकालः समुपस्थितः। शर्ममहोदयो द्विजेन्द्रं पण्डितवर्यं वारुकमिश्रामाहूय उपनयनस्य मुहुर्तं पृष्टवान्। स बालकस्य जन्मतिथेः सप्तदशदिनानन्तरं माघशुक्लद्वादश्यां तिथौ शुभसंस्कारलग्नं शोधितवान्। संस्कारा जीवनं सात्त्विकभावभरितं कुर्वन्ति। मानवमूल्योपेतसुजनतानिर्माणमुपकुर्वन्ति। अतो मानवजीवने संस्काराणां महन्महत्त्वं स्वीकृतं भारतीयमनीषया। संस्कारः सविधिः स्यादिति मुहूर्तात्प्रागेव दिनकतिपयान्मङ्गलाचारा अन्ये समारम्भाः प्रादुरासन्। तस्मिन्नागते शुभदिने प्रातःकालादेव गणेशपूजनपुरस्सरं यज्ञोपवीतसंस्कारविधिः प्रारभत्। गृहे बहिरभ्यन्तरे च सम्बन्धिनामिष्टमित्राणां विदुषाञ्च हर्षामोदभरः समवायः समुपस्थित आसीत्। स्त्रीणां मङ्गलगानैर्वाद्यानां च मधुरध्वनिभिः सर्व एव परिवेशो नाकलोकनिभो जातः।

अथ समायाते मुहूर्ते नापितो बटो रामदत्तस्य मुण्डनं कृतवान् शिरसि चार्द्रहरिद्रालेपं चकार। ततः स्नातः स नवं पीताभं धौतवस्त्रं धारितवान्। चन्दनपीठमध्यास्य देवगुरुरिव विधिज्ञ आचार्यवारुकमिश्रः तस्योपनयनसंस्कारं कारयामास। सम्पन्ने सति विधौ, सद्य उपनीतो बटुस्तत्र गुरुचरणानुपस्पृश्य बहूनाशीर्वादान् लेभे। सर्वे मङ्गलाशिषैस्तमभिनन्दितवन्तः। उपनयनविधेरुपसंहारो भवति लोकाचारः- "अध्येतुं काशीं जिगमिषामीति संस्कारितस्य ब्रह्मचारिणो वचनम्। तदर्थं बटुः पलाशदण्डं स्कन्धे निधाय गृहान्निःसृत्य ग्रामाद् बहिर्गत्वा लोकाचारं सम्पन्नं कृत्वा पुनरायाति। प्रायेण मातुलस्तं भागिनेयमनुनीय गृहमानयति। अथ स रामदत्तो गुरूणामाशीर्वचोभिः सह प्रयागात् काशीं प्रत्युन्मुखो भूत्वा प्रत्यावर्तनं नानुमेने। 'इदानीमेव काशीं गत्वा शास्त्राध्ययनं करोमी'ति तस्य निर्बन्धः। सर्वे बहुशः प्रबोधितवन्तः किन्तु स निजाग्रहं मनागपि शिथिलीकर्तुं न स्वीचकार। तं काशीगमनोद्यतं वीक्ष्य तस्य पितरौ विवशौ जातौ। अन्ततः काशीयात्राप्रत्यायनावचनैस्तमाश्वास्य कथं कथमपि स गृहं प्रतिनिवृत्तः।

रामदत्तस्यानेन निर्बन्धेन विकटा खलु समस्या समपतिता। दम्पत्त्योः स्नेहैकपात्रमयं बालकोऽष्टवत्सरवत्स एकमेवापत्योऽतःपूर्वं कदाप्येकाकी गृहाद्दूरं न गतः। अनिमेषनयनैश्चिन्ताभरैस्तैः पितृभ्यां रात्रिर्व्यतीता। नानासङ्कल्पविकल्पैरन्ततो निर्णयो

जातः- 'रामदत्तस्तत्र स्वमातुलस्य श्रीमदोङ्कारेश्वरत्रिपाठिनो संरक्षणे निवसतु'इति। श्रीत्रिपाठीमहाभाग असीन्मान्यो नैयायिकधुरन्धरः। तस्य परामर्शेन कस्मैचित् सुयोग्याय गुरवे प्रदेयोऽयं रामदत्तोऽध्ययनार्थम्। अतस्तनयं रामदत्तमादाय शर्मदम्पती काश्यां श्रीमत ओङ्कारेश्वरत्रिपाठिनो गृहं सम्प्राप्तौ। दक्षिणावर्तशङ्खस्तु रामदत्तस्य प्रसेवे सन्निधत्त आसीत्। अयं शङ्खो रामदत्तस्यैव भवत्वित्याज्ञापितमासीत् सकलजगन्नायकेन रामदत्तोन्नायकेन भगवता वेणीमाधवेन। महानैयायिकस्योङ्कारेश्वर-त्रिपाठिनो भवनं काश्यां पञ्चगङ्गाघट्टसन्निकटमेवास्ति। तत्र समीप एव परमवेदविद्विद्वान् दण्डीस्वामी अपि निवसति स्म। रामदत्तोऽध्ययनार्थं तस्यैव चरणशरणाय प्रदत्तः। तत्रैव स ब्रह्मचारी रामदत्तः सकलवेदवेदाङ्गानां ज्ञानमर्जितवान्।

(२)

विराजते प्राच्यां सागरतटे पुरीनगरे भगवतो जगन्नाथस्य विश्वप्रसिद्धं मन्दिरम्। तदानीं तत्र प्रवर्तमान आसीद् रथयात्रामहोत्सवः। सुदूरदूरात्समागतानां श्रद्धालुभक्तजनानामपारसम्मर्द आसीत्। भव्याकारेषु सुविशालेषु तोरणमण्डितेषु समलङ्कृतेषु रथेषु भगवतो जगन्नाथस्य, अग्रजस्य बलरामस्य भगिन्याश्च सुभद्रायाः विग्रहाः यथाविधि स्थापिता आसन्। देवलसमुदायो भक्तजनाश्च जयघोषशब्दैः सोत्साहं तान् रथान् सुदीर्घदृढरज्जुबद्धान् समाकृष्य मन्थरगतिविलासोल्लासमयान् गुण्डीचामन्दिरं नयन्ति स्म। सपरिकरो भगवान् जगन्नाथः पञ्चदशदिनपर्यन्तं तत्र विराजते। भगवतो जगन्नाथस्य रथः सहसैवैकत्रावरुद्धगतिको जातः। रज्जुलग्नातिरिक्तैरपि भक्तजनैः सोत्साहं जयघोषपूर्वकं महता बलप्रयासेनाकृष्यमाणोऽपि स रथो यवमात्रमपि स्वस्थानान्न चचाल। भक्तिभावलीना रथाकर्षणप्रवीणा भक्ताः कर्षणेऽनुरक्ताः रज्जुसंसक्तहस्ता अतिशयश्रमवशात् स्वदेक्लिन्ना अन्ततो मनःखिन्नाः सञ्जाताः। विमृश्येयां विचित्रां स्थितिं सर्वे नैराश्याब्धौ निमग्ना बभूवुः। समवेतोऽपारजनसागरः स्तंब्ध आसीत्। समेषामुत्साहो विगलन्नासीत्। जयवादनादस्तु निस्तब्धताङ्गतः। अनष्टिाशङ्कया सर्वेषां हृदयानि वेपन्ते स्म। परस्परमाननं निभालयतां जनानां दशा मूकानामिव, बधिराणामिव, हतभाग्यानामिव, दुर्दैवग्रस्तानामिव, घोराघबोधानामिवातिकरुणकरुणा समजायत। सकलदुःखकातरणां चिन्तातुराणां भक्तिभावधुराणां सर्वानन्दविधुराणां दृष्टिः तस्मिन् रथ एवासीत्। श्रीकृष्णं प्रसादयितुं यावत्तत्र श्रद्धालवो जना मनसि वासुदेवस्मरणं कुर्वन्त आसन् तावदेव तस्मिन्नङ्ख्यजनसमुदाये आस्थाकाये भक्तिभावनिकाये करुणरसे

वीररस इव, तप्तसन्तापनीरसे वसुधातले वर्षणोद्यतः सरसस्निग्धमेघ इव कश्चित्सिद्धो महात्मा हर्यानन्दो रथमुपसृत्य श्रवणामृतवचोभिः धीरगभीरस्वरेणोवाच– "अत्रभवन्तो भवन्तः कृपयाऽतोऽपसरन्तु। रथोऽयं स्वतः प्रचलिष्यती"ति। महात्मनो वचनमिदं निशम्य तत्र समवेता सर्वे भक्तजना देवलाश्चात्यन्तं विस्मिताः संबभूवुः। असम्भवमिदं चिन्तनमिति मन्यमानाः सर्वे वचनं न श्रद्धदधुः। क्वायं बृहदाकारो रथ क्व च तस्य स्वतः प्रवृत्तिः? सोऽयं विलक्षणो महात्मा समेषां दृष्टेर्विषयो। अचिन्त्या खलु कल्पनातीता प्रभोर्लीला योगिनामप्यगम्येति केषांचिन्मनःसु विचारास्तरङ्गिताः। उपस्थितं जनसमुदायं दृष्टिपूतं कुर्वन्निव स महात्मा समाश्वासयन्निव विश्वासस्य परां कोटिं नयन्तमिव, सर्वात्मना स्पृशन्निव, मनः प्रसादं वितरन्निव, मोक्षमार्गमुपदिशन्निव, आतुरतां परिहरन्निव, कृतार्थयन्निव, सर्वान्तिकं प्रचलन्निव मन्त्रमुग्धैरिव सर्वैरवलोकितः। कैश्चित्तु सोऽलौकिकचमत्कारी महायोगी, कैश्चित्तु स्वयं महायोगेश्वरो लीलावपुः भगवान् जगन्नाथ इत्यनुभूतः। दूरस्थाः श्रद्धालवो निकटमागन्तुं योगचमत्कारञ्च द्रष्टुं परस्परं सम्मर्दयन्तोऽग्रेसरा बभूवुः। पण्डाजनैर्देवलैरारक्षिभिश्च कृतैर्वर्जनप्रयत्नैरपि ते नैव विचिलिताः। केचित्तु रथाग्र एव संस्थिता आसन्। पुरीनगरेऽस्य पर्वणो महती परम्पराऽतीतकालादेव सम्प्रयुक्ता यत्तद्देशीयो राजा, रथयात्रारम्भात्प्रागेव विनीतवेषणागत्य स्वर्णकूर्चिकया रथान् सम्मार्जयति। ततश्च पारम्परिकरूपेण सुभद्रया सह विराजमानं साग्रजं जगदीश्वरं रथारूढं समर्चयति। तदन्तरमेव रथयात्रा प्रवर्तते। रथस्य निश्चलत्वात्स राजा सानुशंयान्तःकरणः सापराध इव खिन्नमनाऽऽलक्ष्यते स्म। 'सपर्याविधाने का त्रुटिर्जाता यतो हि भगवतः प्रचलन् रथः सहसा विरमितः। अपूर्वमेतद् वृत्तम्। न कदापि दृष्टं श्रुतं वा। समाराधितः प्रसन्नो जगन्नाथप्रभुः सपरिकरः श्वसुरालयं गच्छति महोत्सवस्यायं शुभोऽवसरः।

अथ तत्रत्याः भक्तजना अस्य स्वामिनो हर्यानन्दस्य योगसिद्धेश्चमत्कारं द्रष्टुमुत्कमनाः प्रतिक्षणं युगमिवानुभवन्तः प्रतीक्षमाणा आसन्। राजपरिवारोऽपि हस्तविन्यस्तभालस्तं निभालयन् शोकसंविग्नमानसो दैवं प्रार्थयति स्म। अहो किमेतत्? महदाश्चर्यम्! भगवतो जगन्नाथस्य स सुविशालो रथ स्वत एव प्राचलत्। ततः किम्!! "जयतु जयतु स्वामी हर्यानन्दो जयत्वि"ति जयघोषेण दिग्दिगन्तरं सनभोमण्डलं परिव्याप्तमभूत्। महात्मनो हर्यानन्दस्य योगशक्तिचमत्कारेणाभिभूताः श्रद्धावनता जनास्तस्य पादस्पर्शायाहमहमिकया धावन्ति स्म। अपूर्वमविस्मरणीयमद्भुतं दृश्यमासीत्। धन्यधन्या उत्साहिनो भक्तजना रथस्य रज्जुं प्रगृह्य समाकर्षणं प्रारब्धवन्तः। पुनः त्रयोऽपि रथाः पथगामिनो बभूवुः। तदानीं जनाः योगसिद्धेरद्वितीयं

स्वामिनश्चानिर्वचनीयमनुभावं विभावयन्ति स्म। साश्रुनयनः करबद्धो राजा कलङ्कमार्जनाय स्वाभारं प्रदर्शयन् तस्य महात्मनश्चरणयोः पपात। देवलसङ्घः कृतार्थतां गतः कार्तज्ञाभिव्यक्तये तं वारं वारं नमस्करोति, अभिवादयति। तत्र जनसमुदाये नानाविधाश्चर्चाः प्रादुरासन्। 'स्वयं भगवान् जगन्नाथ एव विधृताकारो हर्यानन्दः', 'हर्यानन्दस्य महिममण्डनाय जगदीश्वरेणेयं लीला कृता', 'योगशक्त्या प्रथमं रथमवरुध्य ततश्च प्रचालितवान् हर्यानन्दः', 'स्वयोगसिद्धेश्चमत्कारं प्रदर्शयितुमेवैतत्कृतवान् महात्मा, अन्यथा रथावरोधस्य किमप्यन्यत्कारणं नास्ती'ति एवंविधाः वार्ताः श्रवणगोचरतां यान्ति स्म। योगीश्वरो हर्यानन्दस्तु- "योगेश्वरस्य योगलीलां को विज्ञातुमर्हती"ति राजानमुवाच। वस्तुतस्तत्रोत्कलप्रान्ते पुरीनगरे न कोऽपि पूर्वतो जानाति स्म सिद्धमहात्मानं योगीश्वरं स्वामिहर्यानन्दम्। अतस्तच्चमत्कारविषये जनसमुदायस्य सर्वं कल्पनाप्रसूतमेव कथनमासीत्।

आसीत् स्वामिहर्यानन्दः शिष्यः सुविख्यातस्य महायोगिनः श्रीश्रियानन्दाचार्यस्य। काश्यां पञ्चगङ्गाघट्टेऽस्य 'श्रीमठ' इति पुण्याश्रमः। तत्र गुरुसन्निधौ निवसन् सोऽयं हर्यानन्दो निरन्तरं श्रीहरिप्रेममठरो मठे तुरीयावस्थायामेव विचरति स्म। अस्य प्रेमाभक्तिं निपुणं निरीक्ष्य वीक्ष्य चास्य योगदशां गुरुः श्रीश्रियानन्दाचार्योऽस्य नामकरणं 'हर्यानन्द' इति चकार। ततोऽस्याभिधा 'हर्यानन्द' इति लोकेऽपि प्रसिद्धा जाता। दिव्यप्रतिभासम्पन्नोऽयं युवसंन्यासी हर्यानन्दः सद्गुणनिकायो देवोपमकाय आसीत्। यद्यपि प्राज्ञैः कथितम्- "सेवाधर्मः परमगहनो योगिनामप्यगम्यः" किन्तु यतिवरो हर्यानन्दो गुरुं सेवितुं सम्यग् जानाति। अस्य सर्वमप्याचरणं गुरोः प्रीतिजननमासीत्। अस्य सेवासपर्याभ्यां, भक्त्या योगसाधनया च सुप्रीतः स्वामिश्रीश्रियानन्दाचार्यः श्रीमठस्योत्तराधिकारिपदे एनमभिषिच्य दक्षिणदिशि प्रयातस्तत्रैव कियत्कालानन्तरं भौतिकं शरीरं परित्यज्य ब्रह्मलीनो बभूव।

निगमागमानां नदीष्णो विद्वान् दाक्षिणात्यद्विजकुलभूषणः श्रीराघवानन्दाचार्यः श्रुतिगोचरं कृत्वा स्वामिवर्यस्य श्रीहर्यानन्दस्य विशदं यशः तस्य शिष्यत्वाप्तिकाम आजगाम काशीम्। प्रथमे दृष्टिनिपात एव, "ऐह्येहि, राघव!" इति व्याहृत्य परमप्रीतो निपीतसुधासागर इव प्रकटितकृपाविलासः समुच्छलितहृदयोल्लासः तमसकृत्सत्कृत्य सम्भाव्य च शिष्यत्वेनाङ्गीचकार। पञ्चसंस्कारयुक्तं विधाय परम्परानुसारं शास्त्रोक्तविधिना सम्प्रदायमन्त्रदीक्षाप्रदानेनानुग्रहीतवान्। एवं सिद्धमहात्मनः शिष्यत्वं समवाप्य राघवो राघवानन्दो बभौ। अयं स्वामी श्रीराघवानन्दाचार्यः श्रीगुरुणा श्रीमठस्योत्तराधिकारे नियुक्तः। एकदा पृथक्-पृथक् स्थानेभ्य एकस्मिन्नेव समये प्रवचनाय त्रीणि निमन्त्रणानि

प्राप्तानि। श्रीराघवानन्दाचार्येण तानि त्रीण्यपि निमन्त्रणानि स्वीकृतानि। योगैश्वर्येण स त्रीष्वपि स्थानेषु समकाल एव समुपस्थितो भूत्वा यथाविषयं वैदुष्यमयं प्रवचनं कृतवान्। अपरेद्युः तस्य वैदुष्यप्रशंसाप्रसङ्गे रहस्यमिदमुद्घाटितम्। एक एव श्रीराघवानन्दाचार्यः कथं काश्यां त्रिषु पृथक्-पृथक् स्थलेषु समकाल एव प्रवचनं कृतवानिति प्रसादमयी विस्मयकारिवार्ताऽविश्वसनीयाऽपि साक्षाद्गोचरीकृता प्रमाणपुष्टा साधुविमृष्टा काशीविद्वत्समाजेन सर्वत्राचिरमेव स्वच्छवस्त्रे जलमिव व्याप्ता सञ्जाता। अनेनाद्भुतवृत्तान्तेन न केवलं विद्वन्मानसेषु अपितु सर्वजनहृदयेष्वपि सिद्धयोगिनः श्रीराघवानन्दाचार्यस्य महिमानं प्रति श्रद्धाभावो घनीभूतः। एतदलौकिकं वृत्तं चतुर्दिशि सुमनःसुगन्धिरिव विस्तारं लेभे। ततश्च श्रीमठोऽनुदिनं विवर्धमानानां भक्तजनानामास्थाकेन्द्रं शुशुभे।

पण्डितपुण्यसदनशर्मणस्तनयो रामदत्तः काशीमागत्य श्रीओङ्कारेश्वरत्रिपाठिनः संरक्षकत्वे दण्डीस्वामिनः श्रीमुखाच्छास्त्राध्ययनं समारब्धवान्। दण्डीस्वामिनो निलयः पञ्चगङ्गान्तिकमेवासीत्। स्वामिनः श्रीराघवानन्दाचार्यस्य यशःसुगन्धिमाघ्राय तस्य चाश्रमे विदुषां भक्तजनानां सम्मर्दं प्रतिदिनं दर्शं दर्शं कुमारवयसो रामदत्तस्यापि मनोऽभिलाषः तद्दर्शनायोल्लसति स्म। एतदर्थं गुरोराज्ञामवाप्य सोऽप्यवकाशक्षणेषु श्रीराघवानन्दाचार्यस्य प्रवचनं श्रोतुं श्रीमठे प्रतिदिनं सायङ्काले गमनमारब्धवान्। रामदत्तं दृष्ट्वा तस्य चानुभावं समनुभूय स्वामिनो राघवानन्दाचार्यस्यान्तःकरणे तं प्रत्यात्मीयो भावः समजनि। रामदत्तस्य श्रवणतत्परतां ध्यानस्यैकाग्रतां, विषयतत्त्वोन्मुखतां प्रश्नानुमेयविद्वत्तां आकृतिमनोहरतां विनयोदारताञ्चानुदिनं सम्यक् सूक्ष्मं विमृश्य स्वामी राघवानन्दाचार्यो 'भविताऽयं सुयोग्यशिष्य' इति मनसि करोति स्म। रामदत्तोऽपि महायोगिन आचार्यप्रवरस्य प्रवचनैः समाकृष्टोऽधिकतरं कालं श्रीमठ एव व्यपनेतुमियेष। दण्डिस्वामिनः सकाशात्सम्पन्नप्राये शास्त्राध्ययने, एकदा रामदत्तः श्रीमठे प्रवचनावसाने क्षणं विरम्य, स्वामिवर्यस्य राघवानन्दाचार्यस्य चरणयोर्निपत्य- "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्न" इति सानुनयं विनिवेदितवान्। भाव्यमेतदिति स्वामिवर्यः पूर्वत एव जानाति स्म। साम्प्रतं पूर्णताङ्गतस्तस्य मनोरथो रामदत्तस्यानेन विनयेन। 'न' इति कथं स उच्चारयतु? सस्मितः स्निग्धं सकरुणं विलोक्य स तस्य शिरसं दक्षिणहस्तेनाच्छाद्य- "अतस्ते भौतिककर्मप्रपञ्चाः विगलिताः। अद्येदं तव नूत्नमाध्यात्मिकं जन्म। रामदत्तं विसृज्यागतोऽयं रामानन्द" इत्युवाच।

श्रीओङ्कारेश्वरत्रिपाठिनाऽनुज्ञातो रामानन्दो गुरोराश्रमे श्रीमठे शिष्यत्वेन निवसितुमारेभे। त्रिपाठिनेयं वार्ता प्रयागे पण्डितपुण्यसदनशर्मणोऽन्तिकं प्रेषिता। वार्तां

प्राप्य शर्मदम्पती चिन्तानिमग्नौ जातौ। विषादस्य श्यामघटाभिराच्छन्नौ बभूवतुः। साल्वीनाम्निकन्यकायाः पित्रे किमुत्तरं देयमिति महती चिन्ता प्रादुर्भूता यस्याः रामदत्तेन सह विवाहनिश्चयः कृत आसीत्। तपस्विनी सुशीला! सा तु मनसि साल्वीं वधूरूपां कृत्वा, तस्याः रूपं, गुणं शीलञ्च संस्मृत्य संस्मृत्य, स्वात्मानं श्वश्रूपदे निधाय न जाने कियत्सुखदस्वप्नदर्शनं करोति स्म। एतां वार्तां निशम्य तस्याः पिता श्रीशाण्डिल्योऽपि चिन्तातुरो बभूव। शाण्डिल्यदम्पती दुर्लभमेतादृशं वरं हातुं न सहेते स्म। साल्वीनिमित्तं रामदत्तः सर्वथानुरूपो वर इति ताभ्यां स्वीकृतम्। रामदत्तस्य शिक्षावैदुष्यप्रशंसने तौ कदापि तृप्तिं न जग्मतुः। वज्रपाततुल्येयं वार्ता सहसा विश्वासकोटिं नाधिरोहति स्म। विपत्पर्वत एव भग्नो भूत्वा शिरसि पपात। गृहे क्षणमप्यवस्थानं सुदुःसहमासीत्। त्वरितपदौ तौ पुण्यसदनशर्मणो गृहं जग्मतुः। द्वयोरपि कुटुम्बयोः 'किं करणीयमि'ति गभीरमन्त्रणा बहुशो जाता। सम्प्रति रामदत्तो नास्ति बालः। सुगृहीतविद्यः परिपूर्णो युवकः। शास्त्राणां गहनाध्येता प्रकाण्डपण्डितश्च। तथापि शर्ममहोदयस्य मनसि 'सः केनचिद्भ्रमजाले निपातित' इति पुनः पुनरुदेति स्म। सः पुनरपि विमृशति- "यद्यहं स्वाभीप्सितं तं कथयामि स मां नोल्लङ्घयिष्यति।" शर्मा शाण्डिल्यमवोचत्- "भवते यद्वचनं मया दत्तं तस्य पालनं भविष्यत्येव। काशीं गत्वा पश्यामि तावत्।" सुशीलाऽप्येभिः शब्दैः शाण्डिल्यभार्यां समाश्वासितवती। शाण्डिल्यस्याग्रह आसीद्यत् साल्वीं नीत्वा वयमपि काशीं गच्छेम। भवतु नाम, स साल्वीं दृष्ट्वा क्वचिदार्द्रमना स्यात्। यत्नपरोऽपि शर्मा शाण्डिल्यं निरोद्धुं न शशाक। स गन्तुं तत्पर आसीत्। शर्माऽऽसीद् विवेकशीलो विद्वान्। 'रामदत्तस्य मनोनिवारणं तस्य च प्रसादनं कथं भवेदि'ति विचारयतस्तस्य रात्रिरेव व्यरंसीत्। 'कोऽपि शास्त्रज्ञः शास्त्रविधिनैव पराजेतुं शक्यते' इति विचार्य महापण्डितस्य मीमांसकवर्यस्य कुमारिलभट्टस्य मीमांसाग्रन्थान् स काशीयात्राप्रसेवेऽकरोत्। यतो हि कुमारिलभट्टेन स्वकीये तस्मिन् ग्रन्थे साधु विविच्य लिखितं यन्मनुष्यः संन्यासग्रहणात्पूर्वमवश्यमेव गृहस्थाश्रमं स्वीकरोत्विति। यदाऽहमेतां शास्त्रमर्यादां रामदत्तमाप्तवचनतया प्रस्तोष्यामि तदा सोऽवश्यमेव मननं करिष्यति। ततश्चापरेद्युस्ते पञ्चजनाः काशीं प्रति प्रस्थितवन्तः।

काश्यां पण्डित-ओङ्कारेश्वरत्रिपाठी प्रतीक्षमाण आसीत्। तथागतानेतान् दृष्ट्वा प्रसन्नो बभूव। तां कन्यकां साल्वीं वीक्ष्य तस्याश्च परिचयं प्राप्य स प्रमुदितो जातः। सोऽपि तां रामदत्तानुरूपां वधूं मेने। शर्मा शाण्डिल्यस्त्रिपाठी च रात्रौ पर्याप्तकालं यावन्मन्त्रणां चक्रुः। 'रामदत्तः श्रीमठपीठाधीश्वरस्य स्वामिनो राघवानन्दस्य विधिवद्दीक्षितः शिष्यः संवृत्तः। अतः इदानीं श्रीमठात्तस्य निवर्तनं नामासम्भवमि'ति

शाण्डिल्यस्याभिमतम्। 'तमुपसङ्गम्य पश्यामः। विश्वसिमि, स शास्त्रसम्मतं ममाग्रहं नोल्लङ्घयिष्यती'ति कथनमासीत्पण्डितपुण्यसदनशर्मणः। त्रिपाठिमहाभागस्तु– "भवतु नामास्माकं गमनं तत्र, किन्तु सोऽस्मत्तर्कं स्वीकृत्यं ततो निवृत्तो भविष्यतीति मे मनो नाङ्गीकरोति।" कियद्दूरं स्थिता साल्वी एतानि परामर्शवचांसि शृणोति स्म। तत्तु श्रावं श्रावं, तया सज्जिता सर्वे स्वर्णस्वप्ना एकैकशश्छिन्नाः। आदिवसं सा अपारे चिन्तासागरे निमग्नाऽऽसीत्। निद्रा तन्नेत्राभ्यामुत्प्लुत्य क्वचिद् गतेव। रात्रेरुत्तरार्धे, न जाने कदा सा जातनिद्रा बभूव। निद्रायामागते स्वप्ने कश्चिन्महात्मा तां सम्बोध्याकथयत्– "सम्पन्ने सति विवाहे तत्क्षणमेव वैधव्यं प्राप्स्यसि।" एतच्छ्रवणमात्रेणैव सा विगतनिद्राऽभूत्। घनीभूताऽन्तर्वेदना तस्याः हृदयं मथ्नाति स्म। शोकसंविग्नमानसा सा किंकर्तव्यविमूढा स्थिता। विकल्पदोलाधिरूढा सा चिन्ताब्रूडनोद्ब्रूडनैर्निःशेषां रात्रिं यापयामास। विवाहं विधायं कस्यचिन्मृत्युकारणं न भवामी'ति तयाऽन्ततो निश्चितम्। स्वीकरोमि दैवोपहृतं कौमारीव्रतमाजीवनमिति तस्या मौनं हृदयं हाहाकृतवान्।

अथ प्रातरुत्थाय सर्वमाप्याह्निकं कर्म निष्पाद्य त्रीण्यपि कुटुम्बानि साल्वीसनाथं श्रीमठं ययुः। तत्र तानागतान् वीक्ष्य रामानन्दः सहर्षमुपगत्य सत्वरं पादानुपस्पृश्य सादरमन्तर्मठं नीतवान्। साल्वी तु तं नेत्राभ्यां पिबति स्म। रामानन्दस्य वैमुख्येन सा भृशमाहता नैराश्यगर्ते निपतिता। तस्या मनस्येका नवीना चिन्ताऽङ्कुरिता। आत्मनः स्वप्नवैधव्यं रामदत्तस्य च यौवनोद्भूतदिव्यानुभावहानिं स्मारं स्मारं जटिलजटिलेऽन्तर्द्वन्द्वपाशे निगडिता। कदाचिद्विचारयति, 'क्व भवति सत्यं स्वप्नवृत्तम्?' कदाचिच्च, 'कोऽधिकारस्तस्या रामदत्तजीवितापहरणे?' 'तस्य जीवनघाताद् वरं तस्या अविवाहितजीवनयापनम्' इति। विचारवीचीनामावर्तस्तस्या निमज्जनोन्मज्जनं करोति। तस्या मनस्तत्र किञ्चिन्मात्रमपि न रमते स्म। सा ततः प्रत्यावर्तनाय मनश्चकार।

यथाकालं रामानन्दस्तान् सर्वान् गुरुवरं स्वामिश्रीराघवानन्दं प्रति नीतवान्। व्युप्तकेशः श्रीराघवानन्दः प्रशस्तं काष्ठासनमधिरुह्य सुखासीनो विराजते स्म। देवोपमोऽयमलौकिको दिव्यपुरुषो महात्मा सिद्धयोगीति तस्यानुभावत एव प्रतीयते स्म। आजानुकटिवेष्टितकौशेयवस्त्रेणापि च श्वेतोत्तरीयाङ्गवस्त्रेण तस्य मनोहारिणी तेजःप्रभाकाशिता काया विभाति स्म। ग्रीवायां लम्बमाना करयोश्च पिनद्धा तुलसिकामाला पूतात्मानं तमधिकतरं पुनाति स्म। योगदीप्ते समुन्नते ललामललाटे सम्प्रदायतिलकं कामप्यपूर्वां शोभां जनयति स्म। एकैकशः सर्व एव तस्य पादावुपस्पृश्य विनीतभावेन समक्षमेवास्तीर्णे कटे समुपाविशन्। रामानन्दस्तु गुरोर्वामपृष्ठे स्थितः। स्वामी राघवानन्दो

शिष्यं रामानन्दं पप्रच्छ–

"क एते?"

रामानन्द उवाच– "(पुण्यंसदनमभिलक्ष्य) एते मम पूर्वजन्मनस्तातचरणाः। प्रयागतः समागताः। (ओङ्कारेश्वरत्रिपाठिनमभिलक्ष्य) एते मम तथैव मातुलः। अत्र काश्यामेव निवसन्ति।"

"भवान् काश्यामेवास्ते। क्व निवासः?"

"किञ्चिद्दूरमधिपञ्चगङ्गाघट्टमेव।"

"अस्ति किमपि विशिष्टं प्रयोजनमागमनस्य?"

"येयं बालिका दृश्यते, तया सह रामदत्तस्य विवाहसम्बन्धः पूर्वतो निश्चितः। (शाण्डिल्यं प्रतीङ्गितं विधाय) एतेऽस्याः पितृचरणाः। सम्बन्धविषयेऽत्रभवतामनुमोदनमवाप्तुं वयं सर्वे समागताः श्रीचरणेषु।"

श्रीराघवानन्दाचार्यः (ईषद्विहस्य भावगम्भीरमुद्रया)– "सम्बन्धस्तु कन्यकाधीनः। एतां कान्यकामेव पृच्छतु भवान्। रामदत्तस्य कथा गतैव। तस्य भौतिकमायुर्निःशेषतां गतम्। अयन्तु रामानन्दः। इदमस्य नूतनमाध्यात्मिकं जन्म। (पुण्यसदनं सम्बोध्य) भवतोऽयं तनय आत्मरूपो भगवानेव। देशमिमं दुःसहविषमदुर्दशावर्तादुद्धर्तुं सनातनीं च संस्कृतिं रक्षितुमस्य लोकावतारः। पश्याम्यस्य हस्ते धर्मस्य, भारतराष्ट्रस्य, विश्वसमाजस्य चोज्ज्वलं भविष्यं सुरक्षितं संरक्षितम्। प्रतीक्षातुरा वर्तते जीवनस्य परमशान्तिरस्य वरणाय।"

मध्य एवाक्षिप्य ओङ्कारत्रिपाठी प्रोवाच– "महात्मन्, कन्येयं वाग्दत्ता। अयं पुण्यसदनः शाण्डिल्येन सह वचनबद्धोऽस्ति।"

स्वामिश्रीराघवानन्दः– (शर्मदम्पतीमभिलक्ष्य) "भवन्तौ भगवन्तं वेणुगोपालं याचितवन्ताविमम्। तदानीं स भगवान् वेणुगोपालो युवां किमकथयत्?"

एतन्निशम्य पुण्यसदनः स्वामिवर्यस्य चरणयोः पपात। आर्त्तस्वरेणावादीत्– "त्रिकालज्ञाः खलु भवन्तः श्रीमन्तः सर्वं जानन्ति। न किमपि परोक्षं भवद्भ्यः। जनयिताऽस्मि पुत्रकस्यास्य। ममापि काचिद्भावनाऽस्त्येव।"

"प्रबला खलु भौतिकी माया। एषः तस्याः विकटबन्धः। स एव बध्नाति भवतः। अस्य बटोर्मार्गस्तु पूर्वपुण्यकृतः। वयन्तु केवलं निमित्तानि। स्व-स्व निमित्तस्य निर्वाहोऽस्माभिः निःस्पृहभावतः कर्तव्य एव।" एवं कथयता स्वामिपादेन यावत् दक्षिणकरः पुण्यसदनस्य शिरसि धत्तस्तावदेव तस्य सकलोऽपि मोहो विगलितः।

पुण्यसदनः कार्तज्ञभावेनोवाच- "चक्षुरुन्मीलितं भवद्भिः। (ततः शाण्डिल्यं सम्बोध्य) क्षम्यताम्। स्वकीयवचननिर्वहेऽशक्तोऽहं जातः।" पुण्यसदनस्यैतन्नितान्तनिष्ठुरं वचनमुपश्रुत्य शाण्डिल्यः ओङ्कारेश्वरश्चावाक्स्तब्धौ जातौ। सश्रद्धं कार्तज्ञं प्रदर्शयन् पुण्यसदनः प्राह- "अनुगृहीतोऽस्मि, कार्तज्ञभारविनतोऽस्मि। भवच्चरणारविन्द-सेवामतिरिच्येदानीं मह्यं किमपि न रोचते।" स राघवानन्दगुरोः पादपद्ममुपस्पृश्य वचनविरतस्तन्मुखासक्तनयनो बभूव।

"यथेच्छमत्रायान्तु यान्तु। सदाशयैर्भवद्भिरयं सदा वात्सल्यभावेन द्रष्टव्यः। परन्त्वयं वेणीमाधव एवे'ति हृदि स्थापयन्तु।"

स्वामिश्रीराघवानन्दस्यैतैर्वचोभिस्तत्रोपस्थितानां समेषां स्वजनानां हृदयानि अपूर्वानन्दमयानि सञ्जातानि। 'कश्चिदवतारपुरुषोऽयं रामानन्द' इति सर्वेषां मनसि पुण्याध्यात्मभावः समजनि। शबलनयनभृङ्गा रामानन्दमुखकमलं विहातुं नेच्छन्ति स्म। राघवानन्दगुरुमभिवाद्य सर्व आपृच्छन्ति स्म। सुशीलायाः नयननिर्झरास्त्रधारया प्रक्षालितचरणयुगलः श्रीराघवानन्दो यावदाशीःकरस्तस्याः शिरसि विन्यसति तावत्तस्या अपि मोहः सपक्ष इवोत्पत्य प्रणष्टः। साध्वी मनो दृढं निश्चिनोति स्म यत्सा आजीवनं ब्रह्मचारिणी स्थास्यति। शाण्डिल्यस्तु मौन एव खिन्नमना आसीद्यतो हि तस्य सर्वाण्याशाकुसुमानि तुषारहतानि। भग्नाशो निहतमानसोल्लासो यावत् स ओङ्कारेश्वरत्रिपाठिनो निवासे प्रविशति तावत्पुण्यसदनोऽब्रवीत्- "गृहाण, स्थापयेदं पुस्तकम्।"

"किमिदम्?"- पप्रच्छोङ्कारेश्वरः।

"प्रयागगौरवभूतस्य महामीमांसकस्याचार्यकुमारिलभट्टस्य कृतिरियम्। एतत्पुस्तकं नीतवान् पुण्यसदनः 'रामदत्तं प्रबोधयिष्यामी'ति प्राह शाण्डिल्यः।"

"किं लिखितमस्मिन्?" ओङ्कारेश्वरेण जिज्ञासितम्।

"अपि नाधीतं भवता?" शाण्डिल्यो ब्रूते।

"नैव।"

"मनुष्येण संन्यासग्रहणात्पूर्वं जीवने गृहस्थधर्मोऽवश्यमेव स्वीकरणीय इति तत्र लिखितं विद्यते।"

"पण्डितप्रवर शाण्डिल्य! एततु समीचीनमेव। यदि गृहस्थाश्रमः सर्वैरस्वीकृतः स्यात्तत्कथमयं संसारः प्रवर्ततेत्? संसारोऽपि तस्यैवेश्वरस्य सृष्टिः। तल्लीलयैवायं संसरति।" एतन्मध्य एव पुण्यसदनः सविषादमुवाच- "न कोऽपि भाविनं प्रामष्टुं

क्षमः। ईश्वरेच्छा बलीयसी। किन्तु यद्भूतं तदुचितमेव। सर्वं सुस्पष्टं जातम्। यदि गौतमबुद्ध इव स निभृतमपसरति तदा वराकिनी साल्वी जीवनपर्यन्तं संक्षुब्धाऽऽकुला वेदनार्दिता भवेत्।" अनेन कथनेन तत्र क्षणं निस्तब्धता जाता। शाण्डिल्यस्य मनस्तूपप्लवाय सन्नद्धमासीत् तथापि स निश्शब्दः स्थितः। ओङ्कारेश्वर एव मुखरो बभूव– "वैदिकजीवनपद्धतिः श्रमणजीवनपद्धतिश्चैते द्वे अपि भारतेऽतिप्राचीनकालादेव प्रचलिते। समाजस्य मार्गदर्शनाय सिद्धपुरुषा अपेक्ष्यन्तेऽपि च सृष्टिसंसृतये गृहस्थजीवनं काम्यते। दिव्यतेजोंशसम्भवा वैराग्यपरा महात्मानो यथासमयं समागत्य लोकं सत्पथेऽग्रेसारयन्ति। देशं धर्मञ्च रक्षन्ति।"

"सदुक्तमेव भवता। सः परमात्मा जन्मतः प्रागेव समष्टिगतस्यापि व्यष्टेः कर्मपन्थानं निर्धारयति। न कश्चित्सम्भवो निरर्थक" इति पुण्यसदनः स्वीयं मतं प्रकटितवान्।

"लोके गृहस्थजीवनमेव प्राथम्येन श्रेष्ठम्। दुर्लभः स वीतरागो यो मोहपाशं छित्वा मोक्षमार्गमनुयाति। नाखिलं जगद्वैराग्यस्य समर्थने नापि गार्हस्थ्यस्य विरोधेऽब्रवीत्। सर्व एव मतस्वातन्त्र्यं बिभर्ति।

रात्रौ विश्रम्य सर्वेऽपरेद्युः प्रयागं प्रतिनिवर्तितुं सज्जा अभवन्। ओङ्कारेश्वरः पुण्यसदनं निवेदयामास– "सुशीलायाः प्रतिपालनमप्रमादेन कर्तव्यम्। अतिसुकुमारं खलु मातुर्हृदयम्। माता वात्सल्यस्य क्षीराब्धिर्भवति। नो चेत्क्वचिद् भग्नाशजीविता स्यात्।"

"इयमेव चिन्ता मां सन्तापयति। स्वामिना हस्तेन स्पृष्टशिरसो मम तु सर्व एव मोहो विगलितः।"

"अहो! कियती प्रशंसा रामदत्तस्य स्वामिवर्येण मुक्तकण्ठतः कृता!! धन्योऽस्ति भवान् यदयं नूत्नो महात्मा भवतोऽजिरेऽवतीर्य क्रीडाकौतुकं कृतवान्। तस्य किलकितैर्भवनं ते गुञ्जितम्।" इत्येवं व्यङ्ग्यभङ्ग्या शाण्डिल्यस्त्रिपाठिगृहान्निसरन्नुवाच। व्यङ्ग्यार्थमधिगत्यापि पुण्यसदनो मौनमभजत्। ततोऽपि व्यङ्ग्यं विस्तारयन् शाण्डिल्योऽब्रवीत्– "मित्रवर! कुमारिलभट्टस्य मीमांसाग्रन्थः प्रसेवे कृतो न वा?"

अथ स्वामिश्रीराघवानन्दो रामानन्दाय विशिष्टाद्वैतसम्प्रदादीक्षामन्त्रं प्रदाय सविधिं तं दीक्षितशिष्यं विधाय सर्वात्मनाऽङ्गीकृतवान्। प्राणायामस्य समाधेश्च विधिं सम्यक् प्रशिक्ष्य निरन्तरं साधनां विधातुं निर्दिष्टवान्। किशोरवयो रामानन्दः पञ्चगङ्गाघट्टोपरि कुटीरे समास्थाय रामभावस्य शब्दसुरतियोगसाधनारतो बभूव। विद्वत्ता शास्त्रज्ञता च

द्वे अपि पूर्वमेव दृष्टे गुरुणा स्वामिराघवानन्देन, तस्य शिष्यस्य विरक्तिरपि तस्मिन् दिने दृष्टा। रामानन्दे प्रादुर्भूतां दिव्यतामपि दर्शं दर्शं स्वामिराघवानन्दस्य हृदये आनन्दसागरो विलसति स्म। तं प्रति पूर्णाश्वस्तो गुरुः शिष्याय रामानन्दाय योगसिद्धिभिः सह स्वीयाः समस्ताः योगशक्तीरपि सविधिं समर्पितवान्। ततो रामानन्दोऽद्वितीयो योगसिद्धो विरक्तो महात्मा सञ्जातः। रामानन्दं तथाभूतं सुनिपुणं परीक्ष्य सन्तुष्टस्य राघवानन्दस्य मनसि सामोदमेवमभूत्- "ममायं शिष्यो रामानन्दोऽधुना विधर्मसङ्कटाद् देशं, समाजं धर्मञ्च त्रातुं समर्थः। स नूनमेव भक्तेः प्रबलधारणा सन्तृप्त्य सनातनं धर्मं भारतञ्च देशमक्षुण्णं विधास्यतीति। एकदा श्रीमठे समवेतेषु श्रद्धालुजनेषु स्वामी राघवानन्दः श्रीरामानन्दं श्रीमठस्योत्तराधिकारिपदे सोत्तरीयं सन्निवेश्य स्वयं दक्षिणापथं प्रति प्रस्थितवान्।"

दक्षिणप्रस्थानात्पूर्वं, स्वामी राघवानन्दः श्रीमठे षडक्षरमन्त्रराजस्य षट्कोट्याहुतिसम्भृतं बृहद् रामयज्ञमायोजयामास। एतदर्थं त्रयस्त्रिंशद् वैदिकविप्राः नियुक्ताः। याज्ञिकेष्वेतेष्वाचार्येषु धर्मनिष्ठः सदाचारपरायणः ख्यातो विद्वान् श्रीतात्याशास्त्री, कर्मकाण्डशौण्डः श्रीकर्मठः, तपोमूर्तिः श्रीधर्मराजो नवयुवविद्वान् श्रीचतुर्वेदि-वर्योऽप्यासन्। एभिस्त्रयस्त्रिंशद्याज्ञिकैः सह काशीस्था अन्येऽपि विद्वांसः कर्मकाण्डक्रतुक्रियाविज्ञानमण्डिताः पण्डिता आमन्त्रिता आसन्। अध्वर्युगणैः समलङ्कृताः सुविस्तृतक्षेत्रविनिर्मिता यज्ञवेदिका विराजन्ते स्म। षडक्षरमन्त्रैः सह गन्धपूरहव्यान्नाहुतयः प्रज्वलितायाग्निदेवाय विधिपूर्वकं समर्प्य यज्ञारम्भो बभूव। 'ॐ श्रीरामाय नमः स्वाहे'ति षडक्षरमन्त्रध्वनिभिः काशीनभोमण्डलं जुगुञ्ज। सुगन्धितहविर्धूमैराकुलिताऽपि काशी प्रयताऽपि पुनः पुनः पूतात्मानमिवानुभवन्ती परं पुलकिता जाता। यज्ञस्य चर्चा वीथीषु गृहेषु जनानां च जिह्वाग्रेषु तिष्ठति स्म। यज्ञदर्शनेन स्वीयां कृतार्थतां कामयमानानां जनानां कोऽपि शिष्टविशिष्टः सम्मर्दोऽनुदिनं वर्धमान आसीत्। यज्ञमण्डपे नित्यमेव सुशिष्येण श्रीरामानन्देन सह स्वामिवर्यो राघवानन्दोऽधिमञ्चं राराजते स्म। धन्याः खलु काशीवासिन आसन् तयोर्दर्शनप्रसादतः।

अतः पूर्वं गुरोराज्ञया श्रीरामानन्दः श्रीमठे पञ्चगङ्गाघट्टे स्वकुटीरे यदा सर्वनिष्ठया योगसाधनारत आसीत्तदानीमेव महान्तो योगिनः तपस्विनः साधवो विद्वांसः तर्कप्रज्ञार्हमनीषिणो मुमुक्षवः संन्यासिनस्तमुपगम्य प्रणिपातपूर्वकं गूढप्रश्नगर्भजिज्ञासानां संशयानाञ्च समाधानमुपलभ्य परमां तुष्टिं समवाप्य कार्तज्ञं ज्ञापयन्ति स्म। तस्य दिव्यदक्षिणावर्तशङ्खस्य मनोमुग्धकारिणा निनादेन समे सामाजिका नागरा अध्यात्मरसप्लाविता इव हर्षनिर्भरा आसन्। अनयाऽऽध्यात्मचेतनया स्वान्तःकरणेषु दिव्यानुभूतिसम्पन्ना विगतमोहा जना अनायासमेव समाकृष्टा नदीप्रवाहमधिरूढानि

तृणानीव श्रीमठं प्रति समायान्ति स्म।

चैत्रमासस्य शुक्लपक्षे द्वादश्यां तिथौ स बृहद्रामयज्ञः सम्पन्नतां ययौ। 'ततो ब्राह्मण- भोजनमि'ति श्रुत्युक्तविधानतो यज्ञसम्पूर्तौ बृहद्भोजनभण्डारस्यायोजनमभूत्। अस्य यज्ञस्याऽलौकिकः सूत्रधारः स्वामिवर्यः श्रीराघवानन्दो यतिवरः प्रवरैः जनैः सुपूजितः 'परमसिद्धाध्यात्मपुरुष' इति भूयो भूयः सभाजितः। यज्ञस्यास्थानमण्डपः सर्ववर्णजनैरतिलस्थण्डिल आसीत्। तत्रैव तेन गुरुणा स्वकीयं दक्षिणापथप्रस्थानं संसूच्य शिष्यप्रवराय श्रीरामानन्दाय श्रीमठपीठस्योत्तराधिकारपदं समर्पितम्। 'यतिवरः श्रीराघवानन्दो विजयतेतराम्' 'सच्छिष्यः श्रीरामानन्दो विजयते'– इत्येवं जयघोषैः नभोमण्डलं पूरितम्।

गुरो राघवानन्दस्य काशीं विमुच्य दक्षिणदिशि प्रस्थानस्य वार्तया तत्र समवेतेषु विद्वज्जनेषु, पण्डितेषु धर्मप्राणजनेषु च महती चिन्ता परिव्याप्ता। तस्य चरणाब्जयोः प्रणिपत्य सर्वे तं महान्तं धर्मगुरुं श्रीराघवानन्दं काशीं वियोगाकुलामकर्तुं प्रार्थितवन्तः। किन्तु मनस्विनो धीराः स्वसङ्कल्पं वितथं विधातुमन्यथाकर्तुं वा नोत्सहन्ते। अतः श्रीराघवानन्दोऽपि भक्तसमुदायं प्रबोधितवान्– "स्वजनसुजनाः! निखिलजगत्तारिणी, सकलतीर्थपुण्यधारिणी, कलिकल्मषौघनिवारिणी, धर्मतत्त्वधारिणी, सन्मार्गप्रचारिणी, देवर्षिमनुजहृदयविहारिणी काशी कस्मै न रोचते? यत्र प्रवहति सुधानिष्यन्दिनी, तापत्रयविध्वंसिनी, शिवमौलितरङ्गिणी मोक्षधामसोपानतरङ्गा कृतजनार्तिभङ्गा भगवती गङ्गा। परन्त्वचिन्त्यं हि विधेर्विधानं पूर्वकृतकर्मफलप्रधानमपूर्वमितिनियतनीतिप्रदानम्। अतोऽहं सूत्रधारसूत्रपिनद्धपुत्तलक इव, वातनीततृणखण्ड इव, चुम्बकाश्माकृष्टायःपिण्ड इव, जलप्रवाहपतितकाष्ठखण्ड इव विवशः परवश इव काशीं विहाय तन्तुवायतुरीसन्निभः पुनः स्वीयां जन्मभूमिं दक्षिणवर्तिनीं प्रत्येमि। मया रामानन्दः काशीपुर्यै काशीपुरी च रामानन्दाय समर्प्यते। मदीयोऽयं शिष्यो रामानन्दोऽस्त्येव दिव्यावतारः। भगवतो विभूतीनामेकत्र विग्रहः। अस्यावतरणं धर्मसंस्थापनार्थायैव। भारतभूमेस्त्राणमयं विधर्मिभिः क्रियमाणैरनाचारैः पीडनैर्मुक्तिप्रदानेन करिष्यति। विश्वसिमि, रामानन्देन दत्तहस्तः सनातनो वैदिकधर्मः सर्वथा सुरक्षितो भविता। समाजस्य शुभोदयो देशे शान्तिश्च भविष्यति। भक्तेः पावनी गङ्गा न कवेलं पञ्चगङ्गाघट्टेऽपितु गृहे-गृहे प्रवहिष्यति।

भावातिरेकात्पुलकितः साश्रुनयनो रामानन्दस्त्वदीनोऽपि दीन इव, सनाथोऽप्यनाथ इव, पुनरपि शरणागत इवार्तमानसः श्रीगुरोश्चरणयोर्निपत्य दण्डाकारस्तस्थौ। 'अहो गुरुरहो शिष्यः' इति भावप्लुतानां जनानां जयकारैः दिग्दिगन्तं परिव्याप्तम्।

गुरोर्महिम्ना साधनागौरवेण च सोऽयं रामानन्दः स्वामी रामानन्दाचार्यो बभूव। सः पञ्चगङ्गकुटीरं परित्यज्य श्रीमठमाजगाम। मठकन्दराकक्षं स्वोपयुक्तं परिकल्प्य तस्य द्वारदेशे तिरस्करिणीं संयोज्य तत्रैकान्तवासमारेभे। ब्राह्मे मुहूर्ते गङ्गामुपगम्य विहितस्नानादिक्रियोऽस्मिन्नेव कन्दराकक्षे तपोनिरतो विशिष्टाद्वैतसम्मतायां दिव्यरामनामसाधनायां मनोयोगं दधौ। सत्संगकालस्तु नित्यमपराह्ण एव आसीत्। विशाले सत्सङ्गप्रशाले काऽप्यपूर्वाऽभिख्या भवति स्म स्वामिनो रामानन्दाचार्यस्य प्रवचनपीठे। वेलाचतुष्टये शङ्खध्वनिमतिरिच्य तस्य दिनचर्या पूर्ववदासीत्। प्रातःकाले, मध्याह्ने, सायंकाले शयनात्पूर्वञ्च स तं दक्षिणावर्तं धमति स्म। एतदरिक्तमपि कक्षाद्बहिर्निःसरणसमयेऽपि चाध्यात्मिकप्रभावं विधातुं शङ्खनादं विदधाति स्म। अयं शङ्खध्वनिरासीच्चमत्कारः काशीवासिनां कृते। तं शङ्खध्वनिं श्रोतुं जना धावन्त आगच्छन्ति स्म। तस्मिन् शङ्खध्वनावासीदाकर्षणशक्तिरपि च सञ्जीवनी शक्तिः। सेयं शक्तिरनुभूता जनैरेकदा। इतः श्रीमठे श्रीरामानन्दो धमति स्म शङ्खं ततो मठस्याधस्तात् कश्चिच्छवो नीयते स्म जनैः। शङ्खध्वनेः प्रभावात्काष्ठमल्ले बद्धो मृतकः सहसैव जीवितो बभूव। अनेन शुभोदर्केन श्रीमठस्य कीर्तिः शरज्ज्योत्स्नेव चकासति स्म। श्रीमठपीठाधीशस्य स्वामिनो रामानन्दस्य दिव्यशक्तीनां चर्चाऽपि गृहे-गृहे समजनि। सत्सङ्गसम्मर्दो दिनानुदिनं वर्धमान एवासीत्। शङ्खध्वनेः प्रतीक्षायां न जाने कियन्तोऽसाध्यरोगाक्रान्ता मरणासन्ना वा नित्यमेव श्रीमठस्य द्वारं प्रतिपालयन्ति स्म। सेवाभावतो लोकसङ्ग्रहधिया स्वामिवर्येण श्रीमठस्य द्वारमहर्निशमपावृतकपाटं कृतं सर्वजनेभ्यः। समाजे स्त्री-पुरुषयोः, स्पृश्याऽपृश्ययोः जातिवर्गयोश्च सर्वानपि भेदान् जीवमात्रस्य कल्याणकामी अभेददृष्टिगामी स्वामी रामानन्दो निराकृतवान् यतो हि स एक एव परमेश्वरः श्रीरामः सर्वभूतानां हृद्देश विराजते। अवितथं तथ्यमिदं प्रतिपादयति ईशोपनिषद्श्रुतिः। श्रुतिसम्मतं प्रामाण्यं लोके व्यवहर्तुं स्वामिवर्येण सिद्धान्तितः-

"विहाय भेदं जातीनां वर्णलिंगभिदां तथा।
यो भजते हरिं नित्यं स हरिर्नात्र संशयः।।"

एवं स्वामिरामानन्दाचार्यस्य सरलं सर्वकल्याणोपेतं सर्वथानुकरणीय-मतिस्मरणीयं विचारमुपगम्य जनता परमं हर्षमवाप। शिशूनां योगक्षेमाय तैस्सह जनन्यः प्रतिदिनं श्रीमठमुपयान्ति स्म यतो हि स्त्रीणां विश्वासः सिद्धमहात्मनामाशीर्वादेष्वधिकं भवति वा त्वौषधीषु। शङ्खध्वनी रामानन्दश्च पर्यायभूतौ प्रतिष्ठितौ। ततः सत्सङ्गे समधिकतरः सम्मर्दो भवति।

स्वामिनो रामानन्दाचार्यस्य धवलधवला कीर्तिः पूर्णचन्द्रज्योत्स्नेव काश्याः परं पारं क्षितिजपर्यन्तं चतुर्दिक्षु वितेने। तस्यालौकिकीं कीर्तिचमत्कृतिमुपश्रुत्य सुधावलराज्यस्य महाराज्ञी स्वीयं यक्ष्मापीडितं तनयं क्रोडे कृत्वा स्वामिवर्यमुपनिन्ये। सत्कारपूर्वकं श्रीमठे निवेश्य स्वामिवर्यः सादरं सधैर्यं तस्याः व्यथाकथां श्रुतवान्। राज्ञी सकरुणमुवाच- "एकोऽयमवशिष्टः सप्तजातेषु। स एषो यक्ष्मानिगडितः। मम मन्दभाग्यायाः करालं कालनिभं कष्टं भवतो नाविज्ञातम्। सर्वं जानाति भवान्। विकलोऽस्ति सर्वोऽपि राजवंशः। निमज्जतस्तृणमिवैष एव दुर्ग्रहगृहीत आशाविग्रहः। पश्यतु भवान् का दुरवस्थाऽस्य मे कुलदीपकस्य। कथं धारयामि स्वीयं हतभाग्यं जीवितम्? कस्य पापस्य फलं भुनक्ति मम नवपरिणीता पुत्रवधूः। मम प्राणानप्यादाय रक्षतु रक्षतु पुत्रवध्वाः सौभाग्यम्। अपनयतु राज्यस्य प्रजायाश्च सुमहत्सङ्कटम्।" राज्ञी एवं निवेद्य भृशं रुरोद।

सन्तः स्वयं परहितेषु कृताभियोगाः। नवनीतकोमलान्तःकरणः स्वामी रामानन्दाचार्यस्तस्याः करुणकथां श्रुत्वा दयार्द्रहृदयस्तामाश्वास्य सधीरमुवाच- "अलं शोकावेगेन। संसारस्तु दुःखमूलमेव। तव तनयो नीरोगो भूत्वा दीर्घायुष्यं प्राप्स्यति। किन्तु मद्वचनं नान्यथा करणीयम्।" क्षणं नेत्रे निमील्य तूष्णीं स्थित्वा पुनरपि नेत्रे समुन्मील्य तं राजकुमारं पुनरुज्जीवयन्निव, तस्मै प्राणदानं प्रयच्छन्निव, विधेर्विधानमन्यथाकर्तुं प्रयतन्निव, स्वचक्षुदीप्तिकिरणैस्तस्य ललाटलेखं परिमार्जयन्निव स्वामिवर्यः सहसाऽऽदिष्टवान्- "प्रक्षिपतु राजकुमारं गङ्गायाः क्रोडे। सप्तमे दिने इहागत्य याचिते सतीयं देवी गङ्गा सहर्षं दास्यति सर्वथा स्वस्थं कनकावदातदेहं सुकुमारकान्तं दीर्घायुसम्पन्नं प्रसन्नं राजकुमारं तव जीविताय, पुत्रवध्वाः सौभाग्याय प्रजारञ्जनाय च।" गच्छतु, पालयतु मद्वचनम्।" स्वामिवर्यस्त्वेतदादिश्य साधनाकक्षे प्रविष्टः।

स्वप्नेऽप्यसम्भावितं स्वामिवर्यस्य वज्रनिभं कठोरवचनं निशम्य राज्ञी तु जडेव, प्रस्तरप्रतिमेव, काष्ठहतेव, शरशतैर्विद्धेव, उल्कापातदग्धेव, निबिडतमोनिमग्नेव, निरालम्बेव विस्फारितनयनाऽवागासीत्। किंकर्तव्यविमूढायास्तस्याः स्थितिरेव शोचनीया संवृत्ता।

तत्रैकत्र सम्मर्दे स्वामिनो दिव्यशक्तेश्चमत्कारद्रष्टारो जना अपि आसन्। ते प्रत्यायनपूर्वकं राज्ञीं सम्बोधितवन्तः- "विश्वसतु राज्ञी, राजकुमार आरोग्यं लप्स्यते। पालयतु स्वामिनोऽविचारणीयं वचनम्। कापि दुश्चिन्ता न करणीये"ति। जनानामसकृदनुरोधात्तस्यार्मातुः हृदये शक्तिसञ्चारो बभूव। सा स्वामिवर्यमिश्वरञ्च स्मारं

स्मारं, मनसा प्रणम्य राजकुमारं करेण धृत्वा गङ्गायास्तीरे जगाम। तत्र घट्टसोपानाद् राजकुमारः स्वयमुत्प्लुत्य गङ्गायाः क्रोडे निपतितः। कियत्कालं प्रतीक्षानन्तरमपि यदा राजकुमारो बहिर्नागतवान् तदा तत्र समवेताः श्रद्धालवो जना ऊचुः- "अलं चिन्तया। धैर्यं धारयतु, विश्वसतु राज्ञी। स्वामिवर्यस्तस्मै शरणमभयं दत्तवान्। यदि राजकुमारस्तं शरणं न गतोऽभूत्, सोऽवश्यमेव जलादुपरि समागतः स्यात्। सर्व एवैकवारमुपर्यागच्छति। गच्छतु, सप्तमेऽहनि अत्रागच्छतु।" जनानामेभिर्वचनै राज्ञी मनाग् विश्वासयुता जाता। वज्रायितेन हृदयेन घट्टात्परिवर्त्य गृहं गतवती। दृश्यमिदं द्रष्टुं समवेतः सम्मर्दः क्रमशो विगलितः। सप्तमेऽहनि यथाकालं राज्ञी तत्र समागत्य भगवतीं गङ्गां याचितवती जीवितसमं जीवितं राजपुत्रम्। निःसृते मुखादभ्यर्थनावचने स राजकुमारो घट्टसोपाने मातुः समक्षं समवस्थित आसीत्। ईषदपि व्याधिलक्षणं नालक्ष्यत्तस्य शरीरे। कनकावदातकान्तं नितान्तमनवद्यं गदोल्लाघोल्लसितं वपुस्तस्य वीक्ष्य जननी स्वकीयमपि पुनर्जन्म मेने। "जयतु गङ्गामाता" "जयतु जयतु स्वामी रामानन्द"- इति जयघोषैः गङ्गातटाभोगनभोमण्डलं सुपूरितम्। सत्त्वरमेव राज्ञी राजकुमारेण सह श्रीमठे प्रविश्य सर्वोपचारैः स्वामिवर्यं पूजयामास। श्रीमठे नवीनं कक्षं निर्माय सेवासमर्पणमुद्घुष्टवती। राजकुमारस्यारोग्यवार्ता श्रीमठे च नवीनकक्षनिर्माणघोषणा समग्रनगरे कर्णगोचरतां गते।

एकदा 'छन्नू' इति नामैको युवा ब्राह्ममुहूर्तेऽलौकिकं शङ्खध्वनिं निशम्य श्रीमठमाजगाम। स्वामिवर्यं समक्षं दृष्ट्वाऽऽत्मानं कृतपुण्यं मन्यमानः स निवेदयामास- "प्रभो ! ते शंखध्वनिना मुग्धोऽहम्। तदानीमहं श्रविश्वनाथमन्दिरे आसम्। रात्रिपर्यन्तं जागरणं सानुष्ठानं विधाय ततोऽविचलितमार्गेणात्रागतोऽस्मि। अत्रैव स्थातुं मे मनसे रोचते अहर्निशञ्च शङ्खध्वनिमिमं श्रोतुं मन्मनोऽभिलाषति। विधेहि मे शिरसि करुणाकरं, देहि मेऽवकाशं पदपद्मयोः" इति।

"को भवान्? कुत आयातः? कस्यात्मजः?"

"भगवन्! छन्नूनामाऽहम्। तनयोऽस्मि महेशपुरवासिनः पण्डितविश्वनाथ-मणित्रिपाठिनः। साम्प्रतं काश्यामेव वसामि।"

"अत्र कस्याश्रये निवसति भवान्?"

"पण्डितश्यामकिशोरस्य। स इदानीं दिवङ्गतः।"

"तदधुना तत्र न कोऽप्यवशिष्टः?"

"सन्त्येव। किन्तु शङ्खध्वनिश्रवणानन्तरं तत्र वासो मे न रोचते। भवत्सेवायामत्रैव

वासं कामये।"

'का ते दिनचर्या भविता?"

"यद् भवानाज्ञापयति।"

(मौनं बहुधा विमृश्य) "अस्तु तावत्।"

ततः प्रभृति छन्नूः पूर्णमनोयोगेन आश्रमस्य मार्जनसंस्कारमारब्धवान्। प्रतिदिनं प्रातःसायं मार्जनप्रक्षालनादिभिस्सदाऽऽश्रमं स्वच्छं विधातुं प्रयतते स्म। दिनस्य शेषे समये स कन्दराद्वारदेशे स्थितः स्वामिवर्यस्यानुज्ञां प्राप्याऽन्यदपि सेवाकर्म विदधाति स्म। कर्णकुहरे प्रविष्टे सति शङ्खध्वनौ, तन्मयो भूत्वा मयूर इव नृत्यति स्म। एवं वर्षपर्यन्तं महत्या निष्ठया समर्पितेन च भावेन श्रीमठस्य स्वामिवर्यस्य च सेवां कुर्वन् तस्य महात्मनो हृदयं विजित्य स स्नेहास्पदो बभूव। परमकारुणिकस्य स्वामिरामानन्दाचार्यस्य मनस्येवमभूत्- "ब्राह्मणोऽयं बालको बुद्धिमान् विद्वानपि। मन्त्रदीक्षया शिष्यत्वमाप्तुमर्हति।" स्वामिवर्यस्य दृष्टेः किं नामागोचरम्? छन्नू इति विप्रबटोः समस्तमेव भविष्यं दर्पणसङ्क्रान्तमिव तस्य समक्षमासीत्। अतः स्वामिवर्येण स छन्नूः पञ्चसंस्कारपूर्वकं मन्त्रदीक्षया शिष्यत्वेन वृणीतः। तस्मै नव्यमभिधानं प्रदत्तम् 'अनन्तानन्द' इति। इत्थं माणवकश्छन्नू अतो 'अनन्तानन्द' इति स्वामिवर्यस्य श्रीरामानन्दाचार्यस्य प्रथमः शिष्यो बभूव। अथ सोऽयमनन्तानन्दो नासीदाश्रममार्जकश्छन्नूः। स प्रथमोऽधिकारी शिष्यः सञ्जातः। आश्रमस्याशेषं कार्यजातं साधिकारं तस्य स्कन्धयोरापतितम्। अतिथीनां स्वागतं, स्वामिवर्यं प्रति तेषां नयनम्- एतत्सर्वं दायित्वं स एव सम्पादयति स्म। किन्तु पूज्यस्वामिचरणानां सपर्या नित्यमेवाप्रमादतया करोति स्म। एवं क्रमेण स स्वामिनो रामानन्दाचार्यस्य प्रधानः प्रथमः शिष्योऽनन्तानन्दः परमः सेवक इति जनैरभिज्ञायते स्म। सम्प्रदाय-नयोऽनन्तानन्दस्य विनयो बभूव।

नास्ति कश्चिद्विभेदो वर्णवर्गजातीनां श्रीमठे इति स्वामिश्रीरामानन्देनानावृतं द्वारं सर्वेभ्यः प्रदत्तमिति श्रवणमात्रेणैव काशीस्थस्य तन्तुवायस्य कबीरस्य मनस्यपि तस्य शिष्यत्वमवाप्तुं लालसा सुप्तोत्थितेवाजृम्भत। सोऽपि प्रतिदिनं सत्सङ्गसत्रेषु श्रवणदर्शनलोभादागन्तुमारेभे। स्वामिवर्यस्य प्रवचने नित्यमेव जातिपङ्क्तिभावनां विहाय सामाजिकं सामरस्यं विधातुं तर्कसम्मतलोकव्यवहारपरं निरवद्यं हृद्यं वचः श्रावं श्रावं शिष्यत्वाभिलाषः सततं वर्धते स्म। 'कदाऽहं शिष्यो भवामि, कदाऽस्य चरणरजःस्पर्शात्पूतो भवामि, कदा मे जीवनं धन्यं स्यादि'ति लुब्धं मनो मथितुमारब्धवान्।

प्रथमशिष्यस्यानन्तानन्दस्य मुखात् स्वामिवर्यं निवेदयामास परन्तु स्वामिश्रीरामानन्दस्य कृपा नाधिगता। तथापि कबीरस्य सत्सङ्गभङ्गो नाभूत्। एकदा सहसैव तस्यान्तःकरणे एका योजना प्रास्फुरत्। स निशीथे निभृतं गत्वा पञ्चगङ्गाघट्टस्यैकस्यां सोपानशिलायां दण्डवत् प्रसुप्तः। आचार्यस्तु प्रतिदिनं ब्राह्मे मुहूर्ते निजावासकन्दरातो निःसृत्य तेनैव सोपानमार्गेण स्नानार्थं गङ्गां प्रति गच्छति स्म। तस्यां रात्रौ कबीरस्य नेत्राभ्यां निद्रा न जाने क्वापसृता। ब्राह्मे मुहूर्ते, सत्येवान्धकारे, आचार्यस्य पदपादुकाध्वनिः तस्य कर्णकुहरे प्राविशत्। समीपात्समीपतरमागच्छन्तं तं ध्वनिं निरन्तरं निशम्य कबीरः सावधानो भूत्वा तथैव तस्थौ। कबीरस्य जीवने दुर्लभं क्षणं घटितम्। गुरोः प्रत्यक्षदर्शनस्पर्शयोः सहजदीक्षाप्राप्तेश्च चिन्तितोपायः सद्य एव फलितः। यावद्गुरोराचार्यस्य दक्षिणपदपादुका कबीरस्य विग्रहपीठे स्पर्शतां गता, 'अन्धकारविवशदृष्टेर्दोषात्कोऽपि मया पदाक्रान्त' इत्यपराधबोधात्सहसा तस्य मुखात् "राम-रामे"ति शब्दो विनिःसृतः। "जाता मे कृतार्थते"ति स्वात्मानं धन्यं मन्यमानः कबीरस्तथैव लगुडवत्तस्थौ।

"कस्त्वम्?"

"कबीरोऽहं ते दासः।"

"कष्टं भोः! आघातो मया दत्तः।"

"नहि, नहि भगवन्! प्रसादस्त्वया दत्तः। कोऽस्तीदानीं मत्सदृशः कृतपुण्यः?"

"मार्गं देही"त्युक्त्वा सोपानपार्श्वादवक्रम्य श्रीरामानन्दाचार्यो 'राम राम रामेति' ब्रुवन् स्नातुं ययौ।

कबीरस्तु हर्षनिर्भरमानसः स्वगृहं गतः। स इदानीं सर्वात्मना रामभक्तो बभूव। गृहं सम्प्राप्य ललाटे रामानन्दसम्प्रदायोचितं तिलकं चकार कण्ठे च तुलसिका माला। रामनामाङ्कितेनोत्तरीयेण स्वशरीरमावृतवान्। अशेषेऽपि शरीरे चन्दनपङ्केन रामरामेति विलिख्यापणे प्रचरति स्म। कबीरस्येदं परिवर्तितं रूपमालक्ष्य सर्वेऽपि विस्मिता आसन्। सायङ्कालस्य कबीरे प्रातःकालस्य च कबीरे महदन्तरमासीत्। एकस्तं पृष्टवान्- "कबीर! किमिदं विचित्रम्?"

"श्रीगुरोः रामानन्दस्य दीक्षितः शिष्यः संवृत्तोऽस्मि"- कबीर उवाच। शनैश्शनैः कर्णमुखपरम्परया वार्तेयं श्रीमठपरिसरपर्यन्तं व्याप्ता। यदा कबीरः सत्संगे प्रविष्टो दृष्टस्तदा प्रवरशिष्योऽनन्तानन्दस्तं स्वामिरामानन्दमुपनीतवान्। पटान्तर्हितः स्वामिवर्यः पप्रच्छ- "कदा मया त्वं मन्त्रेण दीक्षितः शिष्यत्वेन स्वीकृतश्च?"

"पञ्चगङ्गाघट्टसोपाने भवद्भिः स्वीयं चरणशरणं दत्वा श्रीमुखाच्च 'राम-रामे'ति मन्त्रदीक्षापूतं कृत्वा। विगतदिवसब्राह्ममुहूर्ते घटितं तद्वृत्तं मम जीवनं धन्यमकरोत्। तदैव गृहं गत्वा मया गृहीतोऽयं वेशः सविशेषम्। अहर्निशं मे श्वासप्रश्वासाः सिक्ताः श्रीरामनामामृतेन।"

एतच्छ्रवणमात्रेणैव श्रीरामानन्दोऽपारे हर्षपारावारे निमग्नः। कबीरस्य परमोत्कर्षमयीमनन्यां भक्तिमविचलां निष्ठां, सर्वश्रेयस्करीं च प्रीतिमनुभूय भावविह्वलमानसः प्रसन्नवदनः पटावरणं निवार्य सम्मुखमाजगाम। तत्क्षणमेव धर्मवीरं परमधीरं कबीरं कण्ठेनाश्लिष्य गद्गदवचसा- "त्वया मत्तः शिष्यत्वं बालहठाद् गृहीतम्। एकलव्योऽसि वर्तमानयुगस्य। रामनामप्रत्यनन्यनिष्ठैव रामानन्दमता भक्तिः। अविरतं सत्सङ्गरतो भव। रामनाम्नो जपयोगं कुरु" इति भूयो भूय आशीर्वचांसि तस्मै वितीर्य विरराम।

कबीरस्तु साक्षाद् ब्रह्मणो मूर्तेर्गुरोर्मुखात्सञ्जीवनं जीवनरसायनकरुणास्नेहसिक्तं वचनं श्रुत्वा लब्धब्रह्मानन्द इव विस्मृतदेहः श्रीरामानन्दस्य पादपङ्कजयोः पपात। "अथेदं शरीरं भवच्चरणयुगे सर्वथा समर्पितमि"ति बाष्पस्तम्भितकण्ठेन कथञ्चिदुच्चार्य तथैव तस्थौ। अपूर्वमचिन्त्यमलभ्यं दृश्यमासीत्तदानीम्। क्व कबीरः ! क्व च रामानन्दः !! विलक्षणेनालौकिकेन पारसमणिनाऽयोखण्डः काञ्चनाद्रिः कृतः। साक्षी आसीदनन्तानन्दः। रामानन्दस्य प्रेमाश्रुभिः स्नातः कबीरः पूतोऽपि पुनः पवित्रीकृतः। काश्यां पञ्चगङ्गातीर्थे भूयोऽपि त्रिवेणिसङ्गमो बभूव। महात्मनां हृदयन्तु नवनीतादपि कोमलतरं भवति। द्रवितहृदयः श्रीरामानन्दोऽनन्तानन्देनानीतैः दीक्षोपकरणसम्भारैः कबीरं विधिवद्दीक्षितं चकार। कबीरस्तु स्वामिवर्येण गृहस्थशिष्यः कृतोऽतो न नामपरिवर्तनम्। तस्मिन् दिने कबीरः प्रथमो गृहस्थशिष्यो बभूव। कबीरः स्वामिश्रीरामानन्दाचार्येणोपदिष्टायां धर्मसाधनायां लीनो जातः। नित्यं शब्दसुरतियोगमाश्रित्य निष्ठया रामनामस्मरणजपक्रियापरोऽभवत्। अनन्तानन्दवद्गुरोः प्रसादादल्पीयसा कालेनैव चतुर्थं सोपानं गोचरीकृत्वा सिद्धत्वमवाप्तवान्। तन्तुवायः कबीरः सिद्धो महात्मा साधुपुरुषः कबीर इति ख्यातः।

स्वामिनः श्रीरामानन्दाचार्यस्यैकात्मवादमयेषु प्रवचनेषु प्रतिदिनं श्रूयमाणेषु, सर्वभूतानां समदर्शनं, जीवहिंसानिषेधः, अहङ्कारपरित्यागः, सर्वसामान्यो व्यवहारः इति बोधपरैर्मानवधर्ममूलकवाक्यैः काशिकेयाः जनाः भृशं प्रभाविताः बभूवुः। दक्षिणावर्तशङ्खोत्थो ध्वनिस्तु नित्यमेव दिव्यानुभावभाविताञ्जनान् पूर्वतोऽप्यधिकतरं समाकर्षति स्म। "तन्तुवायः कबीरः स्वामिनो रामानन्दस्य दीक्षितः शिष्यः सञ्जात"

इति वार्ता शुष्केन्धनेऽग्निवद् काश्याश्चतुर्दिक्षु व्याप्ता। 'अस्त्येव कश्चिद् विशेष' इति धर्मान्तरणवादिनो रूढवादिनो दुराग्रहिणोऽपि चिन्तनाय विवशाः। "नास्ति कोऽपि सामान्यपुरुषो रामानन्दः, सोऽवश्यमेव परमात्मनः साक्षाद्विग्रहो धर्ममूर्ति"रिति ते विचारयन्ति स्म। अनेन वृत्तान्तेन मतान्तरणस्य बलात्कारादिदुष्कर्मणां च संख्या न्यूनतरा जाता। सनातनधर्मावलम्बिनां सिद्धपुरुषाणां महात्मनां समाजे गौरववर्धनेन सह तान् प्रति जनानां श्रद्धाऽपि समधिकतरा बभूव। अस्मिन्नेव काले घटितैका घटना सत्प्रवृत्तिमिमां सबलामकरोत्।

विख्यातस्य शृङ्गेरीमठस्य शङ्कराचार्यो जगद्गुरुः श्रीभारतीतीर्थमहाराजो धर्मयात्राक्रमे भगवतो विश्वनाथस्य दर्शनार्थं काशीमाजगाम। तेन सह तस्यानुजः श्रीमाधवाचार्योऽप्यासीत्। श्रद्धाभिभूताऽशेषा काशीनगरी तस्य स्वागताय समुत्सुकनयनच्छदवत् पादास्तरणं विस्तारयामास। नगर्यां तस्य शोभायात्राकाले वधूभिः पुष्पाञ्जलीभिः सह नीराजनापूर्वकं नैवेद्यं समर्पितम्। तत्र वीथीष्वापणेषु हर्म्येषु सर्वत्रैवाऽहमहमिकया सर्ववर्णवर्गजना महता भक्तिभावेन माल्यार्पणं चरणवन्दनं सपर्याभिनन्दनं च कृतवन्तः। शोभायात्रायाः मार्गः पुष्पवर्षैः सघनं समावृतः। सकलेऽपि नगरे समन्ततः पर्वोल्लास इवासीत्। श्रीमठे वृत्तान्तोऽयमविदित आसीदिति नैव। उतः श्रीभारतीतीर्थोऽपि श्रीमठस्य श्रीरामानन्दस्य च यौगिकसिद्धिप्रसिद्धिं न श्रुतवानिति न। स्वामिनः श्रीरामानन्दचार्यस्य दिव्यानुभाववार्तां श्रावं श्रावं श्रीभारतीतीर्थस्य मनसि स्वामिनो दर्शनेच्छा प्रतिक्षणं बलवती सम्भूय तत्र गमनोत्कण्ठां जनयति स्म। किन्तु दिवा प्रकटतया कथं गच्छत्विति सङ्कोच आसीद् यद् यस्य चरणयोर्जगन्नमति स कथमग्रगामी भूत्वा श्रीमठं गच्छतु? अस्मिन् भावविवर्ते पतितस्यापि शङ्कराचार्यस्य दर्शनाभिलाषस्तथैवोदग्र आसीत्। सान्ध्यकृत्यं निर्वाह्य नीराजनामनु निभृतं स्वानुजं माधवमेकञ्च सेवकं सनाथीकृत्य श्रीमठं प्रति प्रस्थितवान्। यदा ते तत्र प्राप्ताः, श्रीमठस्य द्वारं पिहितमासीत्। तदानीं श्रीरामानन्दो ध्यानस्थ आसीत्। सुप्तमीनह्रद इव श्रीमठे सुशान्ते, स्वामिनो ध्यानस्थदेहाद्विकीर्णमानोर्जया समस्त एव मठः चैतन्यभूमाववस्थित इति प्रतिभाति स्म। यावद् भारतीतीर्थो द्वारदेशे समापन्नः, तेन स्वात्मन्येकाद्भुतानिर्वचीनया चेतना सञ्चरन्ती अनुभूता। चेतसि आत्मोल्लासस्य विलासप्रतीतिरभवत्। तेन सहागतः सेवको द्वारकपाटे खटखटाशब्दं कृतवान्। शिष्येणानन्तानन्देनानावृतकपाटं द्वारं कृतम्। सम्मुखं विशिष्टं सम्मान्यमतिथिं विलोक्य तं सादरमन्तर्मठं प्रावेशयामास सत्कृतिपूर्वकञ्च गुहासमक्षं काष्ठासने समुपवेशयामास। अचिरादेव गुहायां प्रथमं घण्टिकाध्वनिस्ततश्च शङ्खनादोऽभूत्। दिव्यशङ्खनादस्य प्रभावतः

श्रीभारतीतीर्थो योगनिद्रामवाप। स तदानीं देवदुर्लभ आनन्दे निमग्नः। अवसिता गुरोः पूजेत्यनुमीयाऽनन्तानन्दो यावद् गुहामुखाद् यवनिकामपसारयति तावदेव श्रीभारतीतीर्थस्यैकाग्र्यं सहसा प्रणष्टम्। स सम्भ्रममुत्थितः श्रीरामानन्दस्य चरणयोर्विनतः। स्वामिवर्यस्तु मध्य एव कराभ्यां तं निगृह्य निवारयामास- "किमेतत्! स्वकीयस्य जगद्गुरुस्वरूपस्य मर्यादामभिरक्षय। अस्त्येव तस्य काचिद्विशिष्टा महती प्रतिष्ठा।"

"त्रैलोक्यदुर्लभेन भवदीयदर्शनेन समवाप्तं खलु संन्यासस्य साक्षात् पुण्यमिति धन्योऽहं कृतार्थोऽस्मि।"

"एतत्तु भवन्माहात्म्यम्। धारयन्ति खलु गौरवशालिनो महात्मनो विनयातिशयम्। श्रीमठस्तु विरक्तानां कुटीरः। आगमनात्पूर्वं सूचनाऽपि काचिन्न प्रेषिता भवता। क्षम्यतां प्रतिष्ठानुरूपः सपर्याभावः।"

"किमिहोच्यते! भवदीयदर्शनन्तु सर्वानपि सत्कारानतिरिच्यते। भगवता विश्वनाथेन काशीयात्रायाः मे मनोरथः सफलीकृतः। भवदीया कीर्तिस्तु पूर्वमेव मम श्रवणविषयताङ्गताऽस्ति। तदा प्रभृत्येव भवद्दर्शनोत्कण्ठा नित्यमेव वर्धते स्म। साम्प्रतिके काले भवांस्तु विरक्तेषु मूर्धन्यो हंसेषु च परमहंसः। अभिलषामि, ममानुजस्य माधवस्य शिरसि स्वकीयं वरदं दक्षिणहस्तं विन्यस्य शुभाशीर्वादान् प्रयच्छत्वस्मै, येनायं ऋषित्वमधिगम्य भवेदवितथः संन्यासी, समाचरतु च धर्मस्य समाजस्य शुभोदयमयीं सेवाम्।"

"आचार्य! सुविज्ञोऽस्ति भवान्। 'कर्तृत्वाभिमानस्य त्याग एव सत्संन्यासनिष्ठे'त्युच्यते। सति कर्तृत्वाभिमाने प्राणी कर्मफलमपि नाश्नुते। कर्तृत्वाभिमानस्तु तदैव निरसति यदा चित्तमात्मस्थं स्यात्।"

"एतत्सर्वमपि भवत आशीर्वादादेव सम्भवति। अस्यात्मज्ञानमपि भवदधीनम्। यदि भवानिच्छति, क्षेत्रज्ञस्यापि दर्शनमस्मै सुकरम्। विश्वस्मिन् जगति सम्प्रति नास्ति कोऽपि सिद्धः पुरुषो भवत्सदृशः। कृपया कृतार्थं करोत्वेनम्।"

यावद् भारतीतीर्थो विरमति तावदेव प्राप्तसङ्केतो माधवः स्वामिनो रामानन्दस्य चरणयुगले शिरसा प्रणिपत्य तस्थौ। स्वामिवर्योऽपि भारतीतीर्थस्य विनयानुरोधं सत्कृत्य माधवस्य शिरसि दक्षिणहस्तं विन्यस्य दक्षिणावर्तं शङ्खं नादयामास। तेन ध्वनिना सर्वेऽपि परिवेशाश्चिच्छक्तिसम्पन्नतांगताः। स्वामी रामानन्दः शङ्कराचार्यमुवाच- "माधवे ज्ञानाग्निर्विस्फुरितो जातः। पूर्वजन्मार्जितैः शुभसंस्कारैः सम्प्रति स्थितप्रज्ञोऽयं संवृत्तः संन्यासी। करोत्वयं रामनाम्नः साधनाम्।"

रामानन्दः पुनरपि शङ्खं दध्मौ। तस्य प्रभावतः स माधवः समाधिं गतः। तदानीं तस्य काचिदपूर्वाऽनिर्वचनीया दशाऽऽसीत्। स तु पीतामृत इव, आनन्दाब्धेः परं पारङ्गत इव, तपःपूत इव, धृतमुक्तिव्रत इव, ब्रह्मसाक्षात्कारनिरत इव, संसारप्रपञ्चोपरत इव, धर्मोद्धारभारनत इव, कलिसदननिर्गत इव, पुण्यतीर्थस्नानप्रयत इव, स्तब्धोऽविचलितो निष्पन्दः शान्ताकारो विजितविकारो बभौ। तस्य तामवस्थां वीक्ष्य शङ्कराचार्यो भावविह्वलो जातः। कियत्कालानन्तरं स समाधेरुत्थितः। पुनश्च श्रीगुरोश्चरणयुगले प्रणिपत्य बद्धाञ्जलिस्तस्थौ। अतः परं श्रीशङ्कराचार्य आसनादुत्थितो निवेदयामास– "आज्ञापयतु। मया भवान् सायासः कृतः।"

स्वामी रामानन्दः सस्मितं प्रोवाच– "विनयातिशयमाचरति भवान्। भवदीया महत्ता मामेवं गौरवान्वितं करोत्यन्यथा कोऽहम्?" "अस्मादेव कारणादत्रैकाकी आगतवान्। भवद्दर्शनाज्जाते सति कृतार्थत्वे, आख्यातादैतादिदानीं न बिभेमि। दिव्यमूर्तिर्भवान्। भवन्तं साक्षात् श्रीरामं पश्यामी" त्युक्त्वा कार्तज्ञं प्रदर्शयन् भारतीतीर्थो निर्ययौ। स्वामिवर्यो द्वारपर्यन्तं ताभ्यां सह गत्वा सादरं प्रस्थानमकारयत्। अनन्तानन्दस्तु तैः सह श्रीमठाद् बहिर्गत्वा प्रणम्य निवर्तितः।

अपरेद्युः निखिलेऽपि काशीनगरे, 'शृङ्गेरीमठस्य शङ्कराचार्यो जगद्गुरुः श्रीभारतीतीर्थमहाराजः प्रच्छन्नतया श्रीमठं गत्वा स्वामिनः श्रीरामानन्दस्य दर्शनं कृतवानि'ति वार्ता वह्निगतस्य रक्तमरिचस्य गन्ध इव सर्वत्र प्रथिता। अनेन मेलनेन स्वामिश्रीरामानन्दचार्यं प्रति श्रद्धाब्धेर्वेलावृद्धिर्जनानां हृदयेषु ततोऽप्यधिकतरा समुत्कल्लोलायिता। तस्मिन् दिनेऽपराह्णसत्सङ्गे एतावान् जनसम्मर्दः समवेतो यत्तत्र तिलावकाशोऽपि नादृश्यत्। पूर्वत एव स्वामिवर्येण श्रीमठस्य द्वारं भेदभावं विना सर्वेभ्योऽनावृतम्। अतएव तेऽपि जनाः स्वामिवर्यस्य प्रवचनं श्रोतुं सत्सङ्गलाभञ्च कर्तुं महतोत्साहेन समायान्ति स्म यान् काशीवासिनः कुलीना जना 'अस्पृश्या' इति कथयन्ति तिरस्कुर्वन्ति च। अनेन महात्मना तान् सर्वान् स्नेहतोऽङ्गी कृत्वा तेभ्यो मानवीया प्रतिष्ठा प्रदत्ता। एषु समागतेषु प्रवचनश्रोतृषु 'रविदास' इति नाम्नाऽभिज्ञात एकश्चर्मकार अप्यासीत्। तस्मिन् दिने स स्वीयां स्थितिं विभाव्य जनसमूहात्पृथगेव प्रवचनशालायाः कोणैकान्ते ससङ्कोचं संहृताङ्गः सन् तस्थौ। यथापूर्वं स्वामी रामानन्दः स्वीयेन प्रवचननेन सामाजिककुरीतिनां निवारणाय स्पृश्यापृश्यभावानन्यांश्च कुविचारान् हातुं वञ्चितदलितशोषितांश्च सेवितुमुपदिष्टवान्। तस्य प्रवचनस्य सार आसीत्– 'सर्वप्राणिषु स एवैकः परमात्मा जीवो भूत्वा तिष्ठति। योऽनेन भावेन सर्वं पश्यति स एव पश्यति। परमेश्वरस्य रामस्यानन्या भक्तिरेव मुक्तिसाधनम्। परब्रह्मणि राम एवानुरक्तिर्भक्तिः।

विवेको विमोहोऽभ्यासः क्रिया लोककल्याणमनवसादोऽनुद्धर्षो ध्यानबोधकाश्च यमनियमाः भक्तिसोपानानि। मोक्षावाप्ताविंयं भक्तिरेव सहायिका। तैलधारावत् श्वास-प्रश्वासैः सह रामनामस्मरणमेव लक्ष्यम्। शिरसि शिखा, ललाटे तिलकं, ग्रीवायां कण्ठी, हस्ते च तुलसिकामाला- एवं स्वरूपं संधार्य विशुद्धान्तःकरणेन तस्मिन् परमब्रह्मणि रामे प्रेमासक्तो भूत्वा जगत्कल्याणप्रयत्न एव भक्तेर्लक्ष्यलक्षणम्'ति। स्वामिवर्यकृतेनानेन सरलतमेन प्रवचनेन युवजनस्य रविदासस्य भक्तमनसि सुप्ताः संस्काराः प्रबोधिताः। ततः प्रभृति सः प्रतिदिनं सत्सङ्गप्रवचने आगच्छति स्म। तत्र कियत्कालमुषित्वा मठस्य सेवामपि विदधाति स्म। एवं शनैश्शनैः सः प्रमुखशिष्यस्यानन्तानन्दस्य कृपापात्रतां ययौ। एकदा सः नैजं मनोभावं तमनन्तानन्दं निवेदयामास- "अहमपि श्रीस्वामिवर्यस्य मन्त्रदीक्षितशिष्यत्वं कामये।" अनन्तानन्दस्तु- "भवतु, सनियममागच्छ। लोकविरक्तेरभ्यासं कुरु।"

अथैकदा सुविचारितेन मनसा सोऽनन्तानन्दो भक्तरविदासस्य हितकाङ्क्षया लब्धावसरः परमं गुरुं श्रीरामानन्दाचार्यं निवेदयामास- "इदानीं सनातनधर्मावलम्बिनि समाजे विधर्मिणां यवनानामत्याचाराः नित्यं वर्धन्त एव। प्रचलति बलात् प्रलोभनाद्वा धर्मान्तरणं छलपूर्वकम्। असुरक्षितं हि स्त्रीणां शीलम्। केनाप्युपायेन रक्षा कर्तव्या। अयं समाजोऽस्ति विभक्तो नानावर्गेषु जातिषु च। उच्चनीचस्पृश्यादिचक्रेषु पतितः सीदति। अस्यां विपद्वेलायामस्मिन् समाजे त्वैक्यं नितरामपेक्ष्यते। सर्वात्मना समरसता स्थापयितव्या। सङ्घटित एव समाज इममुपप्लवं निराकर्तुं समर्थः स्यात्। यदि भवान् प्रसीदतु, अयं श्रद्धालुर्भक्तो रविदासोऽपि पञ्चसंस्कारयुतां मन्त्रदीक्षां लब्ध्वा शिष्यो भवेत्, येन तथाकथितोऽस्पृश्यसमाजोऽप्येकत्वमनुभवतु। अनेन धर्मान्तरण-निरोधसम्भावनाऽऽलक्ष्यते। कबीरस्य दीक्षानन्तरं विधर्मिणां कुटिला दुर्नीतयः स्थगिताः। धर्मान्तरणघटनास्वपि ह्रासो दृष्टः।"

एतन्निशम्य स्वामिवर्यः प्रोवाच- "अनन्तानन्द! भारतदेशादेतदध्यात्मज्ञानं न कश्चित् प्रमार्ष्टुं शक्नोति। आगमिष्यति स कालः सा चैका वेला, यदा विश्वं जगत् सन्तप्तः सन् व्याकुलीभूय धावन्निव भारतं शरणमिदमेवाध्यात्मज्ञानमवाप्तुं समागमिष्यति। तस्य जगतो भौतिकं मनोऽत्रैव शान्तिमनुभविष्यति। विमुक्तात्मानः सर्वं पश्यन्तो विद्योतन्ते। ते स्वकीयेनाध्यात्मज्ञानेन सनातननीमिमां संस्कृतिं प्रताडितश्चेमं भारतीयं समाजमुपकर्तुकामाः। भक्तेरेतादृशी धारा प्रवहमाना दृश्यते यस्यामेते विधर्मिण आक्रान्ताः स्वयमेव प्रवाहपतिता भविष्यन्ति। अपि रविदासो दीक्षामन्त्रं ग्रहीतुमभिलषति?"

"अथ किम्? गुरुदेव! स स्वयमेव प्रवृत्तः। महान् खलु तस्याभिलाषोऽस्मिन्

विषये। अस्मिन् युगे वस्तुतो विगलिताभिमानोऽहङ्काररहीनो दीनदर्पोऽयं दलितवञ्चितशोषितसमाज एव बिभ्रति सन्तानामर्हताम्। कुलपूज्या गुरवो नैव दास्यन्ति दीक्षामेतेभ्यः सत्पात्रेभ्यः। एषः श्रीमठ एवैतान् कण्ठेनाश्लिष्यति। नानापथजुषं बहुदेववादसंविभक्तं विविधसम्प्रदायेषु सुदृढमनुरक्तमेतं बृहद्भारतीयं समाजं सामरस्येनैकीकर्तुं प्रभवति नूनमेष ऋजुमार्गः सगुणनिर्गुणमध्यवर्ती रामनामस्मरणशब्दसुरतियोगयुतः। सर्वेऽपि सम्प्रदायवादिनो धर्मावलम्बिनो भवन्त्येव मोक्षकामाः। सगुणनिर्गुणसमन्वयपरोऽयं भवत्प्रवर्तितो मार्ग एव सर्वसुलभः सरलतमश्च मोक्षलक्ष्यमवाप्तुम्। विश्वस्मिन् जगत्यधुना भवानेव मुक्तहस्तेन वितरति विबुधालभ्यं मोक्षं लोककल्याणाय।

"समीचीनं ते कथनम् अनन्तानन्द! समाश्वासयतु रविदासम्।"

अपरेद्युः सम्पन्नताङ्गते सति सत्सङ्गे, यावद् रविदास आशाविकसित नयनमनन्तानन्दमुपययौ, शिष्योऽनन्तानन्दोऽब्रवीत्- "विरमतु तावत्, अपसरन्तु श्रोतारः श्रद्धालवो भक्ताः।" अनेन समाश्वस्तो रविदासः प्रतीक्षमाणः तस्थौ। अल्पीयसैव कालेन सोऽनन्तानन्द इंगिताकारेण तं रविदासं वीक्ष्य स्वामिनमुपसर्तुं दिदेश। रविदासोऽपि तमुपसृत्य साष्टाङ्गमुद्रया प्रणम्य मौन एवोत्थितः समक्षं कराञ्जलिपुटं विधाय स्थितः।

रामानन्दस्तं स्निग्धं निभाल्योवाच- "एवमेव सततमागच्छ। सदाचरणे रतिं कुरु। नित्यं रामस्मरणं कुरु, नामकीर्तनं कुरु। स स्वयमेव त्वामङ्गीकरिष्यतीति। तद्दिनमप्यागतं, रविदासोऽपि स्वामिनो रामानन्दस्यापरो दीक्षाप्राप्तो गृहस्थशिष्यः सञ्जातः। तदा प्रभृति रविदासो व्युप्तकेशः तुलसिकाकण्ठः तिलकालङ्कृतभालो रामनामाङ्कितदुकूलावरणः काश्यां सर्वत्र सञ्चरति स्म।

रामानन्दाचार्येण तन्तुवायः कबीरो दीक्षितः शिष्यत्वेन च गृहीत इति पूर्वं ब्राह्मणसमाजः सरोषः तीव्रं विरोधं प्रकटितवान्। सा विरोधवात्या रोषशब्दाऽऽडम्बरश्च यावच्छान्तिं नागात्तावद्रविदासोऽपि शिष्यत्वेनाङ्गीकृत इति पावनतममात्मानं मन्यमानेषु ब्राह्मणेषु ततोऽप्यधिको रोषः समजनि घोरश्च प्रतिक्रियाध्वनिर्नभोमण्डले समुत्कल्लोलायितः। इयमपवादकथा रामानन्दस्य श्रुतिविषयतां गता व्यथां प्रथितवती। ततः सत्सङ्गप्रसङ्गे स्वामिवर्यः सखेदं सम्बोधितवान्- "ये त्वहं ब्राह्मण इति दम्भं धारयन्ति ते क्षणमात्रमपि ब्रह्मभावे न रमन्ते। जीवनस्य चरमं लक्ष्यं विस्मृत्य मूढतां भजन्ते। विज्ञा अप्यज्ञा इवाचरन्ति। उच्चजातौ जाता इति मिथ्याहङ्कारं पालयन्तो जीवन्ति। कर्मणैव हि कश्चिन्नीच उच्चो वाऽथवा लघुर्महान् वा भवति। यस्तु नाममात्रेणाऽपि हरिं न स्मरति स कथं महान् कथञ्चोच्चो भविष्यति? अलीकोऽयं

गर्वो भौतिकवैभवस्य। एवं क्रियमाणो जनो नश्वरमालिङ्गति, पवनपटले आलिखति, जलप्रवाहे भवनं निर्माति, दिशः फूत्कृतिबलेनापसारयति। अन्तरवस्थितस्य तस्याविनश्वरस्य ज्ञानमेव यथार्थं ज्ञानं, सत्कर्म ह्यवितथा च भक्तिः। समेषां नियन्ता स एव, स एव सूत्रधारः, सर्वं खलु तस्यैव मुष्टौ ततस्तस्य भक्तो दरिद्रो, निर्धनो, लघुर्हीनो वेति कथं भवितुमर्हति! सन्तुष्टः सदा सुखी। सन्तोषस्तु सर्वाण्यपि धनान्यतिरिच्यते। महद्भावस्य मिथ्यावरणेनात्मानमाच्छाद्य ये जीवन्ति त एव समाजं दूषयन्ति देशं च दुर्बलतां नयन्ति। अद्वैतगल्लमल्लास्ते आचरणे तु द्वैतमल्लाः। आकण्ठरागनिमग्नास्तेऽनर्गलं वैराग्यं प्रलपन्ति। एतदेव कारणं यद्विधर्मिणो विषवल्लरीव सर्वत्र विसर्पन्त्यविरतम्। अधुना समाजे समरसत्वमेकात्मकत्वमात्मीयत्वञ्च दृढमूलं स्यादित्यनिवर्ण्यतयाऽपेक्ष्यते।" एवमद्य प्रवचने स्वामिना श्रीरामानन्दाचार्येण परोक्षतः काशीस्थानां ब्राह्मणानां रोषावेशः संवर्धितः।

स्वामिनः श्रीरामानन्दस्येदं सर्वस्पर्शि-अभियानं, मुक्तहस्तदीक्षादानं, सगुणनिर्गुणमध्ये च रामनामशब्दसेतुनिर्माणं न केवलं काश्यामपि तु दूरस्थेषु धर्मस्थलेषु चर्चाया विषयत्वमधिरूढम्। प्रतिदिनमेव काश्यां दूरादतिदूरात् श्रद्धालवो मुमुक्षव आगच्छन्ति स्म स्वामिनं श्रीरामानन्दं शरणम्। एतां स्थितिमाकलय्य स्वामिवर्यो नैजं दायित्वभारं लघुतरं विधातुं स्वकीयं प्रथमशिष्यमनन्तानन्दं दिव्यशक्तिसम्पन्नं कर्तुमारब्धवान्। स तं साधनायाश्चतुर्थं सोपानं प्रापयित्वा ध्रुवलोकस्य साक्षात्कारं कारयामास। एकस्मिन् दिवसे, यथोचितं कालमनुभूय निर्मक्षिके निवेश्य धन्यधन्यं पूर्णकामञ्च चकार। प्रसादमयेन स्वरेण तमुपदिष्टवान् "मन्त्रो न केवलं मूर्तिप्रत्यक्षीकरणशक्तिं बिभर्त्यपितु सकलसदिच्छापूर्तिं स सहजतयैव करोति। मन्त्रस्तु शक्तिस्वरूपमेव। नास्ति काचिदियत्ताऽस्य शक्तिसामर्थ्यस्य।" एवमेव कदाचिदुपयुक्तमवसरमालक्ष्य स्वामी रामानन्दोऽनन्तानन्दं परमगुह्यं तत्त्वमुपदिष्टवान्- "येषां जपस्य त्रयो भेदा अजपाजपस्य चत्वारो भेदाः पराजपस्य चाष्टौ भेदाः सिद्धास्तान् भौतिको मोहो न कदापि विचालयति। ते सिद्धाः जपयोगाः साधकं सकलसिद्धि-भिर्विभूषयन्ति। तथा च गुणातीतः स सर्वज्ञोऽन्तकाले सूर्यमण्डलं भित्वा निर्याति। द्रष्टा मन्त्रराजस्य विरक्त स ब्रह्मविरहाकुलोऽमरत्वं लभते।"

एवं गच्छत्सु दिनेषु, साधनाभूमेः सीमान्तङ्गतं शिष्यप्रवरमनन्तानन्दं स्वामिवर्यः शिष्यदीक्षाधिकारसम्पन्नं कृत्वा सविशेषं तस्मै आचार्यत्वमुपहृतवान्। अथ सोऽनन्तानन्दः शिष्यत्वादाचार्यत्वं समुपलब्धवान्। विनयप्रपन्नः श्रद्धासेवासम्पन्नः प्रसन्नः, स रागमोहविपन्नः शिष्योऽनन्तानन्दो गुरोः परमां कृपामवाप्य आचार्यः संवृत्तः। "सिद्धानां

शिष्टविशिष्टानां लोककल्याणैकभावरतानां सन्तानां महती खलु सुदृढाऽभेद्या तादृशी शृङ्खला निर्मिता भवेद् यया विधर्मिभिर्दत्तहस्ताऽराजकता धर्मान्तरणवात्या चावरुद्धा स्यादि''त्यासीन्मनीषा स्वामिनः श्रीरामानन्दचार्यस्य। सामाजिकैः समजादपि निकृष्टतरान्मन्यमानान् हिन्दुजनान् परित्रातुं ससम्मानं च तान् सनातनधर्मसंस्कृतियुतान् विधातुमेव स्वामी रामानन्दः शिष्यमनन्तानन्दं सर्वसिद्धिसम्पन्नदीक्षादानायाऽऽचार्यं विदधे समर्थम्।

(४)

अथैकदा धौलागिर्याश्रमस्यैकः सिद्धो नाथयोगी कृपाशङ्करः स्वगणैः सहाकाशमार्गेण क्वचिद् गच्छन्नासीत्। मध्याह्नकालिकेन प्रखरतापेन विह्वलताऽप्यासीदेव। स्वामी रामानन्दो दिव्यदृष्ट्येदं दृश्यं पश्यन्नासीत्। एकतः स स्वमानसशक्त्या योगिनः कृपाशङ्करस्यान्तःकरणे आकाशदवतीर्य श्रीमठे कियत्कालं विश्रमितुं भावो नोदितवान् परतः नवनिर्मिति सत्सङ्गभवने तस्य सपर्याव्यवस्थापनाय आचार्यमनन्तानन्दं बोधितवान्। कृपाशङ्करस्तु पूर्वनियोजनादिव यावदाकाशादवतीर्य श्रीमठे प्रविशति तावत्स भवनस्य कुट्टिममूर्णकुथास्तीर्णं पश्यति। स्वागतायाऽतिथिनामाचार्योऽनन्तानन्दो जलपात्रहस्तो द्वारि विराजते स्म। नाथयोगी कृपाशङ्करस्तु पूर्वकृतं सुरुचिपूर्णं प्रबन्धं दर्शं दर्शं विस्मयानन्दितो विचारितवान्- "यदि शिष्य एवेदृशः सिद्धिसम्पन्नस्तदा गुरोर्महिम्नो गरिम्णश्च कथैव का?" स अनन्तानन्दं प्राह- "वयं भवतो गुरुदेवस्य दर्शनकांक्षिणः।" अनन्तानन्दः सधीरमुवाच- "भवतामागमनेन वयं धन्याः। दत्तसेवावसरा भवत्सदृशा योगिनः सुदुर्लभा महता पुण्येन लभ्यन्ते। प्रथमं तावत्स्वीकुर्वन्त्वातिथ्यं, विराजन्तु, क्षणं विश्रमन्तु। श्रीगुरुचरणास्तु स्वत एव दर्शनदानेन कृतार्थीकरिष्यन्ति।" अल्पीयसैव कालेन कन्दरामुखात्तिरस्करिणी अपावृता। स्वामिवर्यस्ततो बहिरागतः। योगी कृपाशङ्करः स्वगणैः सह विनयावनतो भूत्वा तस्मै साष्टाङ्गं प्रणाममर्पितवान्। स्वामी रामानन्दस्तं कण्ठेनाश्लिष्य परमप्रेम्णा स्व पार्श्वे समुपवेशयामास। दिव्यमूर्तेः पुण्यदर्शनेनात्मानं धन्यं मन्यमानो नाथयोगी कृपाशङ्करः श्रद्धाभिभूतोऽभवत्। बद्धकरकुड्मलाञ्जलिः सन् स गद्गदेन स्वरेण निवेदयामास- "क्षम्यतामयं जनो येन प्रचण्डमार्तण्डतप्तमध्याह्ने भवान् कष्टापन्नः कृतः। अस्य शिरसि वरदहस्तं निधायानुगृह्णात्वेनं प्रज्वालयतु चास्यान्तसितं विरहाग्निं यतो परमतत्त्वसाक्षात्कारपात्रं स्यात्। भवानाध्यात्मिकरहस्यानां सकलशास्त्राणाञ्च परमवेत्तेति जानात्ययं जनः। आगमनिगमतत्त्वसंवलि-

तेनागाधज्ञानराशिनाऽधुना भवानेव सिद्धोपायैस्तद्विषयकान् नानासन्देहान् निराकर्तुमखिलेऽपि धरामण्डले सामर्थ्यवानस्ति।" योगिनः कृपाशङ्करस्य वचनं निशम्य क्षणं विचार्य स्वामिवर्योऽवादीत्– "स एव योगी यः सम्भूतिमसम्भूतिञ्चैकत्रैव पर्यवसितं विजानाति। यतिश्चापि स एव यो वैकारिकेऽहङ्कारे स्थितोऽपि नैव स्पृशति काञ्चनं कामिनीञ्च। नारी सा सतीत्युक्ता या रंहसि पुरुषेण सङ्गताऽपि निजचरित्रस्य दृढभूमौ त्वसंशयं स्वतन्त्रमधिकारं निश्चिनोति।"

एवं संक्षिप्तं सारगर्भितं सहजं समाधानमवाप्य निगमागमविषयिणां सन्देहानां, योगी कृपाशङ्करः कृतार्थतायाः भारेण विनतो बभूव। अवसिता मध्याह्नवेला, शान्तश्च झञ्झावात इत्यनुभूय कृतदर्शनपुण्यलाभः कृपाशङ्करो भूयोभूयः स्वामिवर्यस्य चरणाब्जयोः प्रणिपत्य स्वीयैर्गणैः सहाश्रमान्निर्ययौ।

स्वामिरामानन्दस्य योगसिद्धिसामर्थ्यस्य यशः सुगन्धिरनुदिनं दिगदिगन्तुरेषु प्रसरति स्म। कदाचिदेकदा राजस्थानस्य 'गागरोन' इति नाम्नो राज्यस्य प्रजावत्सलो राजा प्रतापरायो यं जनाः प्रेम्णा "पीपाजी" इत्यक्षरसङ्केतैः सम्बोधयन्ति स्म, शिष्यत्वग्रहणलालसया श्रीमठमाजगाम निजपरिकरबलैस्सह। प्रतापरायस्तु प्रथमं शाक्तमतानुयायी देवीदेवल आसीत्। स तु दुर्गादेव्या अनितरसाधारण आराधक आसीत्। बलिप्रदानेन हवनगन्धैश्च स देवीं प्रसन्नां विधातुं प्रयतते स्म। तस्याऽनन्यनिष्ठया देवी अपि सुप्रसन्ना द्विजवर्यानामन्त्र्य सुमहान्तं देवीयज्ञमायोजयामास। बलिभिराहुतिगन्धैश्च तुष्टा देवी प्रकटतयोवाच– "राजन्! आवेदय मनोभिलाषम्, दास्यामि ते।" प्रीतः प्रतापरायः– "मोक्षाकाङ्क्षा मे मनः मथ्नाति। प्रसीदतु, प्रयच्छतु मे मुक्तिम्।" देवी तु– "मोक्षप्रदाने ममाधिकारो नास्ति। मोक्षं विहाय यत्ते रोचते, निवेदय, दास्यामि।" दृढव्रतो राजा– "मोक्षमेव कामये नान्यत्।" देवी– "देवता भौतिकेच्छापूरण एवाधिकृताः नाध्यात्मिकीम्। मुक्तिलक्ष्यार्थं प्रथमं कमपि सिद्धमहात्मानं गुरुं वृणीष्व। गुरोरनुग्रहं विना न मोक्षप्राप्तिः।" खिन्नो राजा– "प्रसीदतु देवी। नाहं कमपि सिद्धमहात्मानं वेद्मि। संसारेऽस्मिन् विरला सिद्धाः, प्रसिद्धास्तु सन्त्यसङ्ख्याः वञ्चका मायाविनः छद्मवेषाः पुरुषाः। भक्तिमिमनुगृहणातु, निर्दिशतु कं प्रति याम्यभीष्टसिद्धये।" देवी– "काशीं गच्छ। तत्र पञ्चगङ्गामुपतिष्ठत्येको रामानन्दः सिद्धमहात्मा श्रीमठे। स एव प्रसन्नस्ते मोक्षमार्गमुपदेक्ष्यति। नेदानीमखिले भुवनंमण्डले कश्चित्तत्समः तत्त्वदर्शी योगी। तस्मिन् श्रद्दधस्व।" देव्या प्रदिष्टमिदमभिज्ञानवचः श्रुत्वा राजा बद्धाञ्जलिपुटं मस्तकमानमय्य हार्दिकं कार्तज्ञं सविनयं ज्ञापितवान्।

अथ गागरोनप्रमुखो मोक्षोन्मुखो महदुत्कण्ठया श्रीमठाभिमुखो बभूव। श्रीमठं

गत्वा सेवकं प्रेष्य तन्मुखात्स्वामिवर्यो निवेदितः- "गागरोननगरादागतो राजा दीक्षाशिष्यत्वमवाप्तुं सेवायां द्वारि तिष्ठति। इदं वृत्तं स्वाम्यनन्तानन्देन गुरवे निवेदितम्।" गुरुः सन्दिष्टवान्- "शिष्यत्वकामी बलसंख्यां न प्रदर्शयति। किमर्थं परिकरगणबलघोराडम्बरः? निवर्तयतु परिकरगणान् सैन्यबलानि च।" राजा त्वरितमेव तथैव कृतवान्। राजा पुनः सन्देशं प्राहिणोत्। ततः स्वामिवर्यः पृष्टवान्- "यदि शिष्यत्वं काङ्क्षति तदा शरीरे राजवेषो बहूमूल्यान्याभरणानि कथम्?" राजा स्वदेहाद्विमुच्याभूषणानि सामान्यं वस्त्रं धारयित्वा तस्थौ। इदमुपश्रुत्य स्वामिवर्यः पप्रच्छ- "अपि राजा ममादेशे तिष्ठति?" राजोवाच- "देव्या निदेशात्त्यक्तसर्वपरिग्रहः तिरस्कृतराज्यसुखः पिपासितः सुधासिन्धुमिव, रवितापसन्तप्तः शीतलच्छायामिव, व्याधिव्याकुलो वैद्यराजमिव, भीतः शरणमिव, अज्ञो गुरुमिव, सकलकामनाभिलाषी कल्पतरुमिव मोक्षेच्छः स्वामिश्रीपादपद्मयुगलं प्रपन्नोऽस्त्ययं जनः। सर्वथा स्वामिवर्याधीनोऽस्ति। यथाज्ञापयाति स्वामी।" स्वामिनो मुखान्निःसृतम्- "रज्जुच्छेदे घटवत्कूपे पततु।" तत्रस्था जनास्त्वेतच्छ्रुत्वा क्षणं प्रस्तरीभूताः। किन्तु राजा मनागपि न विचलितः। सस्मितस्तत्क्षणमेव प्रधाय यावत्कूर्दनार्थं कूपमुखे पदं धत्तवान् तावत्तत्रालक्षितो गतः स्वामी अनन्तानन्दः प्रकटविग्रहस्तं विधृतवान्।

अथानन्तानन्दो राज्ञा सह स्वामिनमुपययौ। स्वामिवर्यः तिरस्करणीमपवार्य प्रथमवारं राजानं दिव्यदर्शनेन कृतार्थं कृतवान्। राजा पीपा प्रणिपत्य स्वीयां श्रद्धां निवेदितवान्। स्वामिवर्यस्तं प्रोवाच- "कियत्कालमत्रैव वसतु।" पुनरनन्तानन्दमभिमुखीभूय- "मानुभवतु कष्टं पीपा। त्वदधीनमस्य वाससौविध्यम्। आश्रमवासपरिचितायास्मै दीक्षामन्त्रः समुचितेऽवसरे दास्यते।" इत्युक्त्वा पुनरपि कन्दरायां प्राविशत्। राजा त्वन्तेवासी भूत्वा तत्रैवानन्तानन्दस्य यथानिर्देशं वासमकल्पयत्। सनियमं स राजा गुरुसन्निधौ सत्सङ्गेऽन्येषु चाश्रमविधिषु त्यक्तराजसभावो विनीतशिष्य इवाचरति स्म। एवं सम्यक् परीक्ष्य स्वामिश्रीरामानन्दः शुभमुहूर्तं विज्ञाय स्वाम्यनन्तानन्दनीतं तं पञ्चसंस्कारयुक्तं विधाय दीक्षितं शिष्यं चकार। ततः पर्याप्तकालपर्यन्तं राजा पीपा स्वामिनोऽनन्तानन्दस्य सविधे यथाविधि रामनाम्नः शब्दसुरतियोगस्य साधनायां निरत आसीत्। तस्य समर्पणभावं ध्येयनिष्ठामभ्यासतपश्च वीक्ष्य प्रसन्नो महामना श्रीरामानन्द उवाच- "गच्छतु, गत्वा तत्र गागरोननगरं क्वचिदेकान्ते वासं विधाय नित्यं स्मरणजपपूर्वकं मन्त्रसाधनां करोतु। कदाचिद्भ्रमणप्रसङ्गे वयं तत्रागमिष्यामः।" गुरोराज्ञां प्रसाद इव शिरोधार्यं कृत्वा शिष्यः पीपा गागरोनं प्रतिनिवृत्तः।

तत्पश्चादेकदा पञ्चगङ्गाघट्टे एका चमत्कारमयी घटना सम्भूता यया श्रीमठस्य

परमाचार्यस्य च श्रीरामानन्दस्य समुज्ज्वला कीर्तिकौमुदी पूर्वादप्यधिकतरं चकाशति स्म। नभसि मासि वृष्टिक्रमः प्रचलति स्म। घटनायाः पूर्वस्मिन् दिवसे धारासारैरतिवृष्टिः संवृत्ता। पतितपावनी गङ्गा महता जलौघेन परिप्लुता क्षुब्धजला सर्वमुत्प्लावितुकामेव भयावहा प्रतिभाति स्म। तस्मिन्नेव विकरालकाले कश्चिद्दाक्षिणात्यो ब्राह्मणो गङ्गारामः काश्यां पञ्चगङ्गाघट्टे स्व-स्वर्गतस्य कस्यचिद् बान्धवस्यास्थिविसर्जनायागत आसीत्। प्रार्थिता अपि कैवर्तकाः नौकया तस्य साहाय्यं नाकुर्वन्। अतः स जलमग्नानि सोपानान्यवक्रम्य जानुपर्यन्तं जले प्रविश्य अस्थीनि भस्मान्तानि प्रवाहयितुं ययौ। सहसा तस्य दक्षिणः पादः स्खलितः। तीव्रजलप्रवाहेण स वेगेन निमज्जनोन्मज्जनविवशः प्लवमान आसीत्। धारायां सङ्कटापन्नं दृष्ट्वा जफरनाम तन्मित्रं तं त्रातुं स्वयमपि गङ्गायां गतः प्रवाहवेगाक्रान्तः। घट्टस्थिताः पण्डा-पूजकजनाः प्लवनप्रवीणाश्च कैवर्तकाः विस्फारितनेत्रैः पश्यन्तो हा-हेति कुर्वन्तोऽपि गङ्गाया रौद्रं रूपं निभाल्य तौ त्रातुं साहसं न चक्रुः। यावन्महद्दुर्घटितमि'ति सर्वे सानुशयं पश्यन्ति तावन्न जाने कुत एकस्तनुयष्टिहस्तः बालकः समायातः सहसा च तडित्-झम्पया गङ्गाप्रवाहे निपत्य तया यष्ट्याऽनायासतः कराम्बिताविव द्वावपि जनौ समाकृष्य तटे कृत्वा तथैवान्तर्धानो बभूव। यावज्जनास्तस्मै कार्तज्ञं ज्ञापयन्ति तावन्निमेषमात्रेण स क्व प्रणष्ट इति सर्वे विस्मयाविष्टाः परस्परं मुखावलोकनं कुर्वन्ति स्म। तत्रस्थाः ये स्वामिनो रामानन्दस्य श्रद्धालवो भक्तास्ते तस्य सिद्धिचमत्कारं विमृश्य, 'जयतु स्वामी रामानन्द' इति जयघोषं प्रारब्धवन्तः। गङ्गारामो जफरश्च क्षणं विरम्य, 'घट्टोपरि व्यवस्थिते श्रीमठे यतिवरो योगी श्रीरामानन्दो विराजते, तयोः प्राणरक्षा तेनैव कृता' इति विज्ञाय तत्र श्रीमठं सत्वरं जग्मतुः। तस्मिन्नेव समये कन्दरातः शङ्खध्वनिः प्रादुर्बभूव। सर्वत्र दिव्यभावः पराशान्तिश्च प्रसृता। तिरस्करणीमपसार्य यावत् स्वामिवर्यो बहिरागतस्तावद् द्वावपि तस्य चरणयुगले पतितौ। साञ्जलिपुटो गङ्गारामोऽपृच्छत्- "भगवन्! गङ्गायास्तीव्रजलधाराया आवयोरुद्धारकर्ता परमकारुणिको भवानेवेति श्रुतमस्माभिः। किमिदं सत्यम्?"

"नैव, कोऽहम्? स तु स्वयं परब्रह्म साक्षात्प्रभुरेव श्रीराम आसीत्।"

"अस्माकं देवलः पण्डा कथयति यद्भवांस्तु परब्रह्मणः श्रीरामस्यैवावतारविग्रहः। भवद्दर्शनेन जीवनं धन्यं जातम्।"

श्रुतमपि तस्य कथनमश्रुतमिव स्वामिवर्येण व्यवहृतम्। अब्रवीच्च- "अयं जफरस्तव परमं मित्रं सहायकश्च। अनेन सह त्वया आत्मीयसुहृद्वद् व्यवहर्तव्यं न तु सेवकवत्।"

इदं स्वामिवचनमुपश्रुत्यानन्दनिर्भरो गङ्गारामः सहसोवाच- "भवादृशः समदृष्टिसम्पन्नः सिद्धपुरुषो मया नावलोकितः। जयतु जयतु भवान्।" इति गद्गदकण्ठेन ब्रुवन् स पुनरपि श्रीरामानन्दस्य चरणयोः संश्लिष्टवान्। रामानन्दो यावत् किञ्चिद् वक्तुमुपक्रमते तावदनन्तानन्दः प्रसादस्य द्वे पुटके नीत्वा तत्रागतवान्। तौ द्वावपि सामोदं प्रसादं गृहीत्वा तं शिरोधृत्वा सादरं साभारं श्रीमठान्निर्जग्मतुः।

यतिवरस्य स्वामिनः श्रीरामानन्दस्य योगसिद्धिचमत्कारकथा जनैः श्रद्धया श्रूयते स्म। स धर्मशास्त्रस्य स्मृतीनां च परमो वेत्तेति वृत्तान्तेनैकेन ज्ञायते। एकदा जङ्गमस्वामिनः सेननापितस्य च मध्ये शिखाकर्तनमधिकृत्य विवादं प्रादुरासीत्। वृत्तान्तोऽयं पञ्चगङ्गाघट्टस्यैव। सेननापितेन शिखां विहाय जङ्गमस्वामिनः कपर्दं व्युप्तवान्। स्वामी तु शिखाकर्तनहठपरो बभूव। सेनस्तु निषेधधिया कथयति- "शिखां कर्तयित्वा नाहं कमपि हिन्दूजनं यवनत्वारोपणरूपं पापकर्म करिष्यामि।" जङ्गमस्वामी तं बहुधा प्रबोधितवान्- "शिखावपनं वैराग्यसूचकं न तु यवनभवनम्। किन्तु सेनः स्वपक्षे दृढतर आसीत्। एवं विवादः प्रगाढतरो जातः।" अन्ततः, "परमविद्वान् यतिवरः श्रीरामानन्दोऽत्रैव श्रीमठे प्रतिवसति। स एवेदानीं काश्यां सर्वमान्यो निरपेक्षो धर्मपक्षधरः। स एव करोतु विवादस्यास्य निर्णयमि"ति निश्चित्य द्वावप्युरिस्थिते मठे गतवन्तौ। यावत्तौ मठं प्रविशतः तावदाचार्यः अनन्तानन्दो दृष्टः। द्वावप्येतौ तं सर्वं प्रसङ्गं सन्दर्भितवन्तौ। तदानीमेव गुहोत्थितं शङ्खध्वनिं श्रुत्वा द्वयोरपि चित्तं निर्मलं संवृत्तम्। गुहायां स्थित एवाचार्यः श्रीरामानन्दोऽब्रवीत्- "द्रष्टुः कवेर्वा प्रज्ञाने नेयं शिखा छिद्यते न वा कश्चित्तां छिनत्ति। परन्तु यदि कश्चिन्मनीषी परितो भूत्वा ब्रह्ममयत्वं भजते, द्रष्टुः भावतोऽविभज्यते तदा शिखा छिद्यते छिन्ना च भवति। स्मृतीनां धर्मशास्त्राणाञ्चायमेव निष्कर्षः।" स्वामिनोऽनेन वाक्येन द्वावपि सन्तुष्टिं जग्मतुः। जङ्गमस्वामी तु तमदृष्टमपि प्रणम्य गतः। किन्तु सेननापितः श्रीमठ एव तस्थौ। तत्र स प्रतिदिनं सत्सङ्गलाभं करोति स्म। एवं क्रमशः स स्वामिनः श्रीरामानन्दाचार्यस्य दीक्षाप्राप्तः शिष्यो बभूव। तस्य सेवाप्रकारैः स्वामिवर्योऽतीव प्रसन्न आसीत्। परमकारुणिकः स तं सेनं महतानुग्रहेण सिद्धमहात्मनां कोटिं नीत्वा स्थापितवान्।

सेनो बान्धवगढस्य मूलनिवासी आसीत्। बान्धवगढस्तु बघेलखण्डस्य राजधानीति विश्रुतम्। सेनः स्वामिवर्यस्य नियोगात् बान्धवगढं प्रतिनिवृत्तः। तत्र मनोयोगेन स साधुसन्तानां सपर्यायां दत्तचित्तो बभूव। श्रीमठात्प्रस्थानकाले स्वामिवर्येण स आश्वस्तः कृत आसीद् यदहं तव योगक्षेमं वहामि। अलं चिन्तया तत्र भक्तेः सम्प्रसारो विस्तारश्च त्वया कार्यः। तत्र राज्ये राजतन्त्रं राजते। अतो विधर्मिणां न

तादृशो भयो यथाऽत्र। यदि त्वं राजानं प्रभावितं कर्तुं प्रभवसि, स भक्तिविस्तारे तव साहाय्यं विधास्यति। बान्धवगढं प्रतिनिवृत्य सेनः केशकर्तनादिषु नापितकर्मसु व्यापृतोऽभवद् भक्तियोगेन सह। यदैष वृत्तान्तो राजारामबघेलेति राज्ञोऽन्तिकमुपययौ, तदा विदितवृत्तान्तो राजा सेनमाकार्य तं स्वशरीरे तैलमर्दनकर्मणि नियोजयामासः। अनेन सेवाकर्मणा सेनस्याजीवः सुकरो बभूव। राज्ञः सपर्याऽतिरिक्तं शेषं समयं स सेनः साधुसेवायां भगवद्भजने चानैषीत्। एकदा राजभवनं प्रति प्रस्थिते तस्मिन्, मध्येमार्गं साधुसन्तमहात्मनामेका मण्डली तस्यैव गृहं प्रत्यायान्ती मिलिता। सा मण्डली सेनं नाम भक्तराजं दृष्ट्वाऽतीव प्रसन्ना बभूव। सेनोऽपि, 'महानयमनुग्रहः परमात्मनः' इति मत्वा, 'साधुसेवावसरो महता सौभाग्येन पुण्येन च लभ्यते' इति धन्यमात्मानं मन्यमानस्तान् सर्वान् सादरमभिवाद्य स्वगृहमनैषीत्। 'अतिथिदेवो भवे'ति साधुसेवा परमो धर्मः। सेनो यथाशक्ति सर्वात्मना साधुसपर्यायां दत्तचित्तोऽभवत्। गृहे साधुमण्डलीं सादरमुपवेश्य भोजनाद्यातिथ्येन कृतार्थतामनुययौ। इतस्तु राजा सेनस्यागमनं प्रतीक्षति स्म। स्वामीरामानन्दस्तथाभूतं सेनं संवेद्य तदाकारो भूत्वा राजानुपजगामः। तस्मिन् दिने स सेनादप्यतिरिच्य राज्ञोऽभ्यञ्जनं कृतवान्। राज्ञो मेरुदण्डे येषदङ्गभङ्गीवेदना बहुकालात् कष्टकारणमासीत्, साऽपि तस्याभ्यञ्जनस्य लक्ष्यतां गताऽवसिता। अपरेद्युर्यावत्सेनो भीत इव राजभवनं प्रविशति तवद्दृष्टमात्रेणेव राजा तमब्रवीत्– "साधु सेन, साधु। ह्यः कृतेन त्वदभ्यञ्जनेन मे मेरुदण्डस्य वेदनाऽपगता। अहो, विगतदिवसस्य तेऽभ्यञ्जनकौशलम्! मे मनः प्रसीदति त्वां पुरस्कर्तुमिति तस्मै स्वर्णवलयं करान्निःसार्य समुपहृतवान्। सेनस्तु मनसा सहसैवोत्प्लुत्य श्रीमठं गतो गुरुदेवस्य श्रीरामानन्दस्य चरणयुगले पपात। अत्र तु गुरोर्महतीं कृपामनुभूय तत्कष्टायात्मानमपराधिनं मन्यमानः प्रत्यक्षं प्रसन्नवदनोऽपि स्वान्तःकरणेन भृशं रुरोद। नेत्रयोरश्रुधारा प्रचलिता। सेनस्याश्रुपातं दृष्ट्वा, "किमिदमि"ति राजा सविस्मयं पप्रच्छ। सेनस्तु– "भवत्प्रसादकृतहर्षस्यैवैतान्यश्रूणि। सेवकोऽयं भवता कृतार्थीकृतः।" गुरोरनया कृपयाऽभिभूतः सेनोऽतः परं भक्तिरसाप्लावितान्तःकरणः साधुसेवायामेव मनो बबन्ध कालयापनञ्च स्वीचकार। भूपती राजरामबघेला कथञ्चित्तद्दिनस्य वृत्तान्तं ज्ञातवान्। बांधवगढे सेनमधिकृत्य गुरो रामानन्दस्य कृपायाः रहस्यं भूपतेरारभ्य प्रजावर्गं यावत् प्रकटितम्। तस्य स्वामिवर्यस्य योगसिद्धिचमत्कारं शिष्यवात्सल्यञ्चानुचिन्त्य सर्वे श्रीरामानन्दचार्यस्य महिमानं जगुः। ततश्च– 'सेनः सिद्धपुरुषः साधु' रिति बघेलखण्डक्षेत्रे तस्य महती प्रतिष्ठाऽभ्यर्चना समजायत। कालान्तरे तस्य नैके शिष्या अभवन् महती च भक्तमण्डली सञ्जाता। ते सर्वे सेनानुग्रहेण शब्दसुरतियोगस्य सियारामनामसाधनायां

निरता मुक्तिमार्गेऽग्रेसरा निजं जीवनं धन्यं चक्रुः।

बान्धवगढे घटितेनाऽनेन वृत्तान्तेन स्वामिनो रामानन्दस्य विख्यातिर्विन्ध्य-मुल्लङ्घ्य सुदूरं दक्षिणदेशमपि गता। दक्षिणदेशादपि दर्शनलालसाः शिष्यत्व-ग्रहणोत्कण्ठिता भक्तिरसप्लुता जनाः धावं धावं पवनोद्वेलिता जलधारेव काशीं श्रीमठञ्चागच्छन्ति स्म।

महाराष्ट्रीयो विट्ठलनामैको ब्राह्मणः स्वामिवर्यस्य सत्कीर्तिं कर्णे कृत्वा, धर्मपत्नीमनापृच्छ्य, शिष्यत्वग्रहणलालसः काशीमाजगाम। काशीं प्राप्यं स स्वामिवर्यस्य दर्शनैरात्मानं प्रयतं विधाय, शिष्यरूपेणाङ्गीकर्तुमार्तमना श्रीरामानन्दं निवेदयामास। सोऽपि स्वाभिमतां भक्तिं दक्षिणदिशि नेतुं 'विट्ठल उपयुक्तो जन' इति विचार्य, तं प्रतीक्ष्य परीक्ष्य च, कियत्कालान्तरं पञ्चसंस्कारयुतं दीक्षामन्त्रं तस्मै प्रदाय, शिष्यरूपेण स्वीचकार। 'भावानन्द' इति नवीनं नामकरणञ्चाभवत्। तत्रैव श्रीमठे स्थित्वा भगवद्ध्यानं कर्तुं सत्सङ्गे च नित्यमागन्तुं निर्दिश्य स्वामिवर्योऽनुग्रहीतवान्। ततो विट्ठलोऽथ भावानन्दः स्वामिनो निदेशात्परमसत्सङ्गी भजनानन्दी च बभूव। प्रतीक्षाकुला तस्य भार्या भृशमुद्योगं कृत्वा कष्टं सहमाना काशीमागत्य शनैः शनैस्तमन्विष्यमाणा थकितेव, व्यथितेव, विस्मितेव, विसृष्टेव, परिमुष्टेव, सन्तप्तेव धर्मशालासु, घट्टेषु, वीथीस्वापणेषु, मठेषु चाहिण्डमाना कथं कथमपीतस्ततो भ्रमन्ती, तदभिज्ञानपृष्टेन केनचित्सङ्केतिता श्रीमठमागतवती। तत्र पतिदेवं तथाभूतं ददर्श, दृष्ट्वा चार्तस्वरेण भृशं रुरोद। श्रीमठस्य शान्तेऽस्मिन् निरातङ्के आश्रमे केयं नारी कथं रोदितीति कुतूहलिनो जनाः समावेताः। स्वामिवर्योऽपि अनन्तानन्दादिभिः शिष्यैस्सह तत्रागतवान्। तां तथा रुदतीं दूरदेशादागतां क्लान्तां श्रान्तां विक्षिप्तामिव दृष्ट्वा क्षणं लोचने निमील्य सर्वमकथितमेव ज्ञातवान्। सिद्धयोगिनां किं नाम दुर्लभमविज्ञातं वा? त्रिकालदर्शिनो भवन्ति परमेष्ठिनः। स्वामिवर्यः शीतलैर्मधुरैश्च वचोभिस्तामाश्वासयामास। अनन्तानन्दः स्वयं तस्यै जलमुपनीतवान्। श्रीरामानन्दस्यानुरोधात्तया कृतो मूलफलमये आहारे प्रणयः। ततश्च तस्या मनःसन्तापमयं दुःखभरं लघुं कर्तुं स्वामिवर्यस्तां पृष्टवान्। साऽपि दुःखकातरा स्वपत्युर्मौनं गृहत्यागं संक्षेपतः स्वामिवर्यं सविनयं निवेदितवती। तत्तो रामानन्दो विट्ठलं सम्बोध्य प्राह—

"श्रूयतां भगवद्वचनम्—

> ''यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
> हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।''

कस्यचिदात्मानं दुःखितं विधाय त्वं सिद्धत्वं नार्जितुं शक्नोषि। दाम्पत्त्यजीवनं भजनं न बाधते। नैके गृहस्थशिष्या सिद्धेः परां कोटिं गताः। इयं ते पतिव्रता भार्या। त्वं

सद्गृहस्थोऽसि। निवर्त्य गृहं गच्छ। एतदेव ते श्रेयसे कल्प्यते। गृहे वसन्नपि चम्पकपुष्पाकरे चञ्चरीक इव वैराग्यभावेन साधनारतो भव, न काचित् हानि"रिति। स्वामिनिर्देशं निशम्य विट्ठल उवाच– "प्रसीदतु स्वामी। इयं मम निवृत्तिप्रवृत्तिं जानाति। नाहं वञ्चकः। इयमहञ्च द्वावपि भवत्समक्षं स्तः। अत्रैव स्थित्वा साधनां कर्तुमीहे।" स्वामिवर्यस्तं प्राबोधयत्– "तव भाग्ये पितृयोगः। विश्वसिहि मम वचनं, तवाजिरे दिव्यसन्ततेः शुभागमनं भविता।" एतच्छ्रुत्वा दम्पती परस्परं मनःप्रसादमण्डितं मुखमवलोकयाञ्चक्रतुः।" तथापि विट्ठलः ससङ्कोचमुवाच– "भगवन्! भवत आशीर्वादः खल्वमोघः एतत्तु वरदानमेव। नास्त्यविश्वासस्य कारणम्। फलत्येव श्रद्धा। अतः श्रद्दधति मे मनः। परन्तु मम हृदयाकाशे जागर्ति खलु महती उत्कण्ठा परब्रह्मणो दर्शनस्य।" स्वामिवर्यः– "अस्त्वेतत्। गृहस्थो विरक्तभावेन जीवितुमर्हति। निश्चप्रचं, ते द्वे अपि मनःकामने पूर्णतामेष्यतः।" गुरोर्वचनं श्रुत्वा विट्ठल आनम्य भालं तस्य चरणकमलयोः, पितृवियोगाशङ्कितो बाल इव सास्रनयनो बभूव। यथा कोऽपि निराशो लुण्ठितं धनं प्राप्य ससुखं तुष्यति तथैव विट्ठलभार्या स्वामिवर्यं प्रत्याभारं मनसि सन्धार्य दीप्तमना प्रसन्नवदना श्रीरामानन्दस्य चरणौ सादरमुपस्पृश्य भर्त्रा सह ततः प्रस्थातुं मनश्चक्रे। आतिथ्यकुशलः सुविज्ञः सोऽनन्तानन्दस्तत्कालमेव पाथेयपुटकं तस्याः करे कृतवान्। गुरुस्तु विट्ठलस्य शिरसि हस्तं न्यस्य स्निग्धमुवाच– "एषा सहधर्मिणी। अनया सह सुखं यापय जीवनम्। गृहं गच्छेदानीं प्रसन्नमनाः। या मन्त्रदीक्षा सत्पुण्यतस्त्वयाऽधिगता यश्च ध्यानविधिर्महतायोगेन प्राप्तः, तत्सर्वं प्रतिपालय। युवयोः कल्याणमस्तु।" एवं गुरोरमृतप्रसादमाशीर्वादं लब्ध्वा विट्ठलः सविनयं निवेदयामास– "भगवन्! यदि कदाचिद् दक्षिणदिशि भवतो यात्राक्रमः स्यात्, कृपयाऽयं सेवकोऽवश्यमेव सूच्यो यतश्चरणकमलसपर्याविधानेनात्मानं धन्यतां नयतु" इति। रामानन्दस्तु मौन एव दक्षिणहस्तमुत्थाप्य स्वीकृतिं ददौ।

स्वामिवर्यस्य यशोविहङ्गः पक्षं प्रसार्य दिग्दिगन्तेषु उत्प्लवते स्म। तस्य शिष्यत्वं समवाप्याऽध्यात्मसाधनाया अहमहमिका मुमुक्षुजनानामुत्तरोत्तरं वर्धते। स्म। तेष्वेकः श्रीचन्द्रहरिरासीत्, शिष्यत्वं गृहीत्वा यः "सुखानन्द" इति संज्ञया प्रथितः। चन्द्रहरिरासीन्मूलतो महाकालपुर्या उज्जयिनीनगर्या निवासी। अस्य पूज्यपिता पण्डितत्रिपुरारीभट्टस्तत्रोपकण्ठे किरीटपुरनाम्नि ग्रामे प्रतिवसति स्मः। चन्द्रहरेर्जननी पूज्या श्रीमती जाम्बवती बहुकालपर्यन्तं तनयसुखं नालभत। सा तु पूर्णनिष्ठया सर्वात्मना समर्पणेन च शिप्रातटे विशालानगर्यां सनियममुषित्वा सविधि नित्यं महाकालं देवाधिदेवमर्चयामास। महाकालस्य प्रसादाज्जाम्बवत्या कुक्षितश्शिशुर्जातः। जातकस्य

शिशोर्ललाटे चन्द्राकृतिः समदृश्यत्। अतः पिता श्रीत्रिपुरारीभट्टस्तस्य तनयस्यान्वर्थकं नाम 'चन्द्रहरि' इति चकार। अयं शिशुर्भगवतो महाकालस्याशीर्वादस्वरूपोऽतः सहजं तमेको फणिधरो रक्षति स्म। एकदा रक्षायां सन्नद्धः स फणिधरो जनन्या जाम्बवत्या दृष्टः। ततः सा कदापि तमेकपुत्रं नैकाकिनं गृहेऽत्यजत्। सा यदापि महाकालस्य दर्शनार्थं याति धृतकराङ्गुलिं तमपि तत्र नयति स्म। 'एका क्रिया द्व्यर्थकरी प्रसिद्धे'ति सूक्तिरनेन चरितार्थतां प्रयाति। एकतः स चन्द्रहरिर्मा भवत्वेकाकी, अपरतस्तु तस्यापि मनसि भक्तिभावो प्रवर्धमानः स्याज्जलसेकाद् बीजाङ्कुरवत्। जाम्बवत्यास्तदुद्योगः फलितः। चन्द्रहरेर्मनसि शिवभक्तिस्तु तादृशी प्रगाढाऽभूद्यदि कदाचित् तस्य जननी महाकालस्य दर्शनार्थं न याति तदा स बालस्तां समाकृष्य नयति स्म। आसीच्चन्द्रहरिर्दिव्यात्मा। विद्याध्ययने तस्य बुद्धेः कुशाग्रता सर्वैरनुभूता। स्वल्प एव वयसि स श्रुति-स्मृति-प्रभृति शास्त्रणां पारङ्गतः। अतिप्राचीनकालादेव तस्मिन् महाकालनगरे शास्त्रार्थपरम्परा सुदृढतया प्रचलिता आसीत्। यदि शास्त्रार्थे कश्चिद् विद्वान् पराजितः, स विजेतृकुटुम्बाय निश्चितं धनराशिं तावत्प्रतिवर्षं ददाति यावत्तस्य कुटुम्बस्य कश्चिद्विद्वान् तं विद्वांसं न विजयते इति सर्वमान्योऽनुबन्धः। एकदाऽनुपस्थिते सति पितरे, विजेतुः श्रीरङ्गराजदीक्षितस्य दूतश्चन्द्रहरिं तथाभूतं धनराशिं समादातुं समागतः। चन्द्रहरिस्तं निषिध्य प्रोवाच- "समुद्यतोऽहं शास्त्रार्थं कर्तुम्।" ततश्चतुर्थे दिवसे शास्त्रार्थसभा समायोजिता। युवचन्द्रश्चन्द्रहरिः श्रीरङ्गराजं शास्त्रार्थसमितौ विजित्य न केवलं स्वपितृमोचनं कृतवानपितु प्रथामिमां खल्वनुचितां छिन्नमूलमकारयत्। तदानीं शास्त्रार्थकाले चन्द्रहरिः सप्तवर्षदेशीय आसीत्। तस्य प्रीतैः कुटुम्बिजनैः विजयोत्सव आयोजितः। चन्द्रहरिर्यदा जात आसीत्तदैव दैवज्ञैः कथितम्- "यदि कदाचिदयं कस्मिंश्चिज्जलाशये निजं प्रतिबिम्बं पश्यति, स गृहं परित्यज्य क्वचिद् गमिष्यति।" विजयोत्सवे व्यतीते, सोऽयं चन्द्रहरिर्महाकालमन्दिराजिरस्थे जलाशये प्रमादवशान्निजं प्रतिबिम्बमपश्यत्। ततो निशीथे गृहं त्यक्त्वा निभृतं निर्जगाम। अपरेद्युर्बहु-धाऽन्विष्यमाणोऽयं क्वचिन्निर्जनोद्याने ध्याने निमग्नो दृष्टः।

श्रीचन्द्रहरेर्विजयवार्ता तूज्जयिनीं व्याप्य बभौ। युवावस्थाङ्गतस्यास्य मनोहरं वपुः, अप्रतिमं गुणं रूपं शीलं सौन्दर्यं दिव्यां च मुखश्रियं दर्शं दर्शं शास्त्रपाण्डित्यमपि श्रावं-श्रावमेका वयःप्राप्ता मधुराकृतिः प्रतिवेशिनी विप्रकन्या कामसायकविद्धेव विवशा प्रेम्णः सहजस्वभावतया मुग्धेव तस्मै स्वहृदयमर्पितवती। तत एकदा रात्रौ निद्रायां कोऽप्यचिन्त्यः तेजस्वी मुनिश्चन्द्रहरिमुपदिष्टवान्- "सैषा माया। माऽस्यां ग्रन्थिग्रन्थिलो भव। गच्छ काशीम्। तत्र दिव्यावतारपुरुषस्य श्रीरामानन्दस्य दीक्षितः शिष्यो भूत्वा

साधनया रतिं कुरु। स एव तव परमजीवनमार्गकृद् विराजते। परत्रेह च शर्मणे ते नान्यः पन्थाः।" विरक्तिबीजं तु पूर्वत एव तस्य मनसि आसीत्। स्वप्ने दिव्यादेशं लब्ध्वा स उज्जयिनीं परित्यज्य काशीं जगाम। श्रीमठमन्विष्यमाणोऽयं गङ्गातटे एकं संन्यासिनं ददर्श। रमाभारतीसंज्ञ एष संन्यासी वार्ताप्रसङ्गे चन्द्रहरौ परमार्थसिद्धेर्विश्वासमुत्पाद्यामुं निजावासं नीतवान्। यदा स रमाभारतिना सह निवसन्नासीत् तदैव ऋचीकर्षिः दर्शनं दत्त्वेमं प्रोवाच- "स्वप्नादेशे तु मुनिना त्वं रामानन्दं प्रति प्रेषितोऽसि, तत्र न गत्वा कथमत्र निवससि?" चन्द्रहरिः सरलस्वभावतया वार्तामिमां रमाभारतीं प्रति न्यवेदयत्। तन्मुखादेवं श्रुत्वा चतुरः संन्यासी रमाभारती सर्वमूहापोहं कृत्वाऽन्ततश्चन्द्रहरिमग्रे कृत्वा श्रीमठे स्वामिवर्यमुपजगाम। सर्वं वृत्तान्तमाख्याय स निवेदितवान्- "अयं चन्द्रहरिर्नूनमेव शास्त्रवेत्ता परमोत्साहयुतो युवजनः। अस्य विरक्तेर्गभीरो भावो मया सुपरिक्षितः। विधिवन्मन्त्रदीक्षाप्रदानेनेमं शिष्यमिति स्वीकरोतु कृपया।"

एवं निवेदितः श्रीरामानन्दाचार्यः शिष्यत्वेन प्रस्तुतं चन्द्रहरिमङ्गीकृतवान् पञ्चभिश्चः संस्कारैः प्रयतं विधाय मन्त्रदीक्षया समुपस्कृतवान्। दीक्षान्तरं चन्द्रहरिः 'सुखानन्दः' सञ्जातः। सुखानन्दस्तत्र मठे स्वामिनोऽनन्ताचार्यस्य सन्निधाने गुरोर्नियोगात्साधनारतो बभूव। स्वल्पीयसा कालेन सम्प्रदाययोगमभ्यस्तवान्। एकनिष्ठानन्यसाधनया सुखानन्दोऽचिरमेव सिद्धिवैभवं लब्धवान्। अस्य पूर्वसिद्धेन वैदुष्येन सद्यःप्राप्त-सिद्धिवैभवेन च प्रीतः समाश्वस्तः स्वामिवर्यः श्रीरामपदपङ्कजपूतेऽनसूयो-पदेशात्पापावधूते भरतकृतपादुकासङ्ग्रहधृततपोविग्रहे, विन्ध्यगिरिकामदमुखे पुण्यतीर्थे सकलकलषुविध्वंसलीलानटे स्वर्गसोपानवीथीरिङ्गत्तरङ्गायमानविमलसलिल-पूरमन्दाकिनीतटे विकटे चित्रकूटे तमाश्रमं कर्तुं नुनोद निर्दिष्टवांश्च तत्रादिवासिनां समाजे कलावेकवारं पुनः सकलसुखसम्पत्सन्दोहप्रदां शुष्कप्रायमूलां निर्मलविशलामिव मोक्षमनुकूलां रामभक्तिचूलां दृढं स्थापयितुम्। गुरोराज्ञां स्वकृतेऽनुग्रहमिव मन्यमानः सुखानन्दः काशीतः प्रयागं गत्वा तत्र गुरोर्जन्मभूमिं नत्वा त्रिवेणीसङ्गमे पुण्यतोये स्नात्वा चित्रकूटं प्राप्य कामदगिरिं प्रदक्षिणीकृत्य श्रीरामशरण्यस्थानगतः योगसाधनानिरतः सन्तजनमनोमन्दिरेषु पदं कृतवान्। गुरोर्निदिशानुसारं सङ्कीर्तनैः प्रवचनैः योगसिद्धेश्चमत्कारैः स सर्वजनमनःसिन्धावगाहनं कर्तुमारेभे। क्रमेण च गच्छत्सु दिवसेषु सिद्धः सुखानन्दः प्रसिद्धः सर्वत्र। जनतायां स्वात्मानं प्रत्यास्थाभावमालक्ष्य सुखानन्दो यत्र तत्र सर्वत्र कान्तारेषु, गिरिषु समविषमक्षेत्रेषु ग्रामाद् ग्रामं पर्यटन् लोकसंग्रहं विधातुं श्रीरामनन्दस्यामोघं भवोन्मुक्तिप्रसादं मुक्तहस्तेन वितरितुमारेभे। अनेन सुविहितेन

धर्मजागरणेन लोकसङ्ग्रहेण चादिवासिनां समाजे विसर्पमाणा विषवल्लरी स्वत एव शुष्कमूलतां गता। समाजतो विधर्मिणां भयोऽप्यपगतः। चित्रकूटे कृतावस्थानस्य सुखानन्दस्य सत्कर्मभिः श्रीगुरुचरणानां प्रभावतः श्रीरामानाममहिम्ना चाखिले समाजे सद्धर्मोत्थानात् संरक्षितः सुरक्षितश्चातिथिसाधुविप्रगवां मानः।

तस्मिन्नेव काले काश्यामेकमतीवमनोरञ्जकं वृत्तमुपस्थितम्। सिसोदियावंशस्यैका रूपयौवनसम्पन्ना राजकुमारी अविस्मृतपूर्वजन्मवृत्तान्ता स्वामिनः श्रीरामानन्दचार्यस्य योगसिद्धेश्चमत्कारं दैवसम्पत्प्रशंसामाकर्ण्य श्रीमठमागतवती। तस्याः पूर्वजन्मनामासीत् 'शशिः'। सा च तस्मिन् पूर्वस्मिन् जन्मनि विप्रकन्या आसीत्। तदानीं सा 'पुन्नू' इति नाम्नो युवकस्य प्रेमपाशे निपतिता तनैव सह विवहितुमैच्छत्। किन्तु तयोर्विवाहो नाभूत्। अस्मिन् जन्मनि पूर्वस्मृत्यनुसारं, तया तस्या राजपरिवारेण च पुनर्जातः 'पुन्नू' बहुधाऽन्विष्टः। नैकान् दैवज्ञान् पृष्ट्वाऽपि कृतैर्बहुभिःप्रयत्नैः स 'पुन्नू' नाधिगतः। स्वामिनो रामानन्दस्यान्तर्यामित्वं सर्वज्ञत्वं चोपसृत्य सा पितृभ्यां सह तं शरणमागतवती। स्वामी अनन्तानन्दः तेषां परिचयमत्रागमनस्य च कारणमभिज्ञायाविलम्बं गुरोः सकाशं नीतवान्। तस्याः पूर्वजन्मनः प्रणयवृत्तं श्रुत्वा तस्याश्च राजकुमार्याः सत्प्रेमदार्ढ्यमनुभूय द्रवितान्तःकरणः स्वामिवर्यः प्रोवाच- "वत्से! ते मनोरथसिद्धिर्ध्रुवं भविता। श्रीमठो न कमपि नैराश्यकूपे पातयति। अत्र कियत्कालं प्रतिपालय। तव पूर्वजन्मनः प्रियतमोऽत्रागन्तुकामः।"

एवं कथिते सति स्वामिनि, राजकुमार्याश्चक्षुपटले तानि सर्वाणि प्रणयवृत्तानि चलचित्रमिवैकैकं समागतानि। नवनवोन्मेषशालिनी तस्याः प्रसुप्ता प्रणयचेतना स्फुरति स्म। हृदये नवस्पन्दनं वामाङ्गेषु च स्फुरणं समजनि। नयनयोश्चमत्कृतिरानने चारक्तता ललास। स्वामिवचने श्रद्दधाना सा मनसा तस्य चरणयोः पपात। यथाश्रुतं स्वामिवर्यं तथाभूतं प्राप्य सा त्वानन्दसागरे निमग्ना।

श्रीरामानन्देनादिष्टः स्वामी अनन्तानन्दस्तेषां सर्वसौविध्यसम्पन्नमातिथ्यं चकार। विश्रामकालेऽपि राजकुमार्या हृदयमविश्रान्तमासीत्। एकैकं क्षणं युगमिव प्रतीयते स्म। सा चेतसा जननान्तरप्रणयक्रीडितानि स्मरति स्म। कदाचिन्नदीपुलिने, कदाचिन्माधवीलतामण्डपे, कदाचिन्निर्भरमञ्जरीभृते कोकिलकूजिते सहकारोपवने कदाचित्सिन्दूररागरञ्जितगगने निशागमने, कदाचिच्चण्डमार्तण्डप्रखरकरनिकरे मध्याह्नप्रहरे, कदाचिल्लतातिरस्करीणीसनाथे गुहाभवने, कदाचिद्दूहरितमृदुशाद्वलशयने तस्या नयने स्मृतिवातायने चकितचकिते मेचकिते प्रविश्य सर्वं पश्यतः स्म। एवमेव तद्दिनमवसितम्। अस्तङ्गतेऽर्के प्रदोषवेलायां श्रीमठे नीराजनायाः समवेतध्वनिं निशम्य

सा राजकुमारी अतिथिकक्षतो निर्गत्य सपरिकरा सत्सङ्गभवनं गता। भगवच्चरणानुरक्ता भक्ता मधुरेण स्वरेण कीर्तयन्ति स्म। सा तत्र क्षणं विरम्येतस्ततो दृष्टिपातं कुर्वती दक्षिणवर्तिनी भूत्वा तत्रैकस्मिन् गवाक्षे दत्तमुखी सुमुखी भागीरथ्या अलौकिकीं नयनाभिरामां शोभां निभालयति स्म। तदानीं गङ्गाया वीचीषु दोलायमाना चम्पककुड्मलनिभा दीपनिकरा गहनतमसाच्छन्ने नभोमण्डले तरलतारामण्डलानि प्रतिभान्ति स्म। सा गङ्गा तदानीं तस्यै नानाभरणभूषिता सौभाग्यवती वधूरिव प्रतीता। इदमपूर्वं नेत्रनिर्वाणप्रदं सुखदं शुभदं दृश्यं नयनपुटकाभ्यामापिबन्त्यास्तस्या मनस्येवमभूत्- "हे मातर्गङ्गे! कुरु स्वामिवचनमवितथम्। सफलां विधेहि मम जन्मजन्मान्तरप्रीतिम्। सत्यं विरचय मनःप्रतीतिम्, स्नेहरीतिम्। यदि मे कान्तोऽचिरमेवायातु, भवेन्नामावयोर्मिलनम्, प्रसीदतु स मां स्वीकर्तुम्, अहं त्वां माल्यैर्भूष्यामि, सविधि पूजयामि।"

एतस्मिन्नन्तरे रणथम्भौरस्याधिपते राणाहम्मीरस्य मन्त्रिपरिषदो वरिष्ठ एकः सदस्यः 'पुहकरसी' फलपुष्पमिष्टान्नादिनानाप्रकारोपहारभरैः प्रवरैश्वरैः सुदक्षैश्च रक्षैस्सह भक्तसेवकानुमतः सत्सङ्गभवनं प्रविश्य तान् सर्वानशेषोपहारान् स्वामिचरणमूलाय समर्पितवान्। तदानीं सत्सङ्गभवनवेदिकायां विराजमानस्य परमयोगिनः स्वामिवर्यस्य श्रीरामानन्दाचार्यस्य काप्यपूर्वाऽभिख्याऽऽसीत्। दिव्यावतारस्य तस्य ब्रह्मतेजोदीप्तिदीप्ते मुखमण्डले स्तिमितस्मितिमयी शान्तिर्विकचकमलनयनभ्यां मनःप्रसादमेवादाय वितरति स्म। कामप्याज्ञां प्रतीक्षमाणाः शिष्या ईषन्नता विनताः बद्धकराञ्जलयः सहस्रदलं परिवेष्ट्य कमलकुड्मला इव स्थिता आसन्। सोऽपि 'पुहकरसी' जानुभ्यामुपविश्य सम्मुखं दूरत एवानम्य भालं स्वामिवर्यं प्रणम्य तस्थौ।

अथानाहूताऽपि निजान्तःकरणप्रेरिता सा सुदती सिसोदियाकुलकुमारी गवाक्षाद्गङ्गादर्शनादुपरता पुनर्दर्शनाय स्वामिसकाशमागतवती। अहो भाग्यस्य वैचित्र्यम्! मन्ये, स्वामिवर्यस्य योगसिद्धेश्चमत्कारो दैवमप्यनुकूलयति। अनायासमेव सहजमिव द्वयोर्मेलनं तेन साधितम्। तदद्भुतमालोक्य राजकुमारी विस्मिता। चपले अपि नयने एकस्मिन्नेव युवजने स्थिरीभूते। नितान्तैकान्तकान्तं कनकावदातं देवोपमं शालप्रांशुवपुः विशालवक्षःस्थलं वृषस्कन्धमुन्नतभालं रुचिरोष्णीषमण्डितचिकुरचयं लसितमन्दहास्यमास्यं मूर्तिमन्तं सजीवबलविग्रहं सर्वयुवतिमनोऽभिलषितं तमपरजीवितमिव दर्शं दर्शं सा स्तम्भजटितशृङ्गारपुत्तलिकेवात्मानमपि विस्मृतवती। कदापि पूर्वमनालोचितस्य तस्य युवजनस्य विशिष्टानुभावं सुनिपुणं निरीक्ष्य, तस्मिन् पूर्वजन्मनः 'पुन्नू' इति प्रियतमस्य विशदविशदां छबिमालोच्य तस्या हृदयं

सूर्यमुखपुष्पमिव सद्योविकसितं जातम्। सोऽपि राजपुरुषः पुहकरसी सर्वानवद्यावयवां दूर्वाकाण्डमिव श्यामां स्फुटविद्रुमाधरां, लज्जावनतकमलदललोचनां शशिवदनां पुष्पस्तबकभारभूषितां सञ्चारिणीं पल्लविनीं लतामिव कामपूर्वशोभासम्पन्नां राजकन्यां यावत् पश्यति तावत्तस्यापि मनसिजमधुप्रीते मनसि, पूर्वजन्मसंस्कारवशादजायत प्रगाढप्रणयानुरागोऽनाकाङ्क्षितोऽपि तस्याश्रमस्य विरक्तिमर्यादामुल्लङ्घ्य। योगसिद्धिसमर्थस्य महात्मनो न भवति किमप्यविदितं नाम। यदा स्वामिवर्येण द्वयोरपि परस्परं दृढानुरागकर्षणमालक्षितं तदा राजकुमारीं प्रति मनोभावनानुकूलेनामृतवचसोक्तम्- "पश्य, अपि नामायं पूर्वजन्मनस्तवानुरागपात्रं पुन्नू? एषोऽभिज्ञायताम्।" एवं स्वामिवर्ये प्रोक्ते सति लज्जया राजकुमार्या आननमारक्तमिव जातम्। नतानना सा ससङ्कोचमुत्पक्ष्मराजीवलोचनाभ्यामिषत्तिर्यग्वलयीकृतग्रीवयापूर्वदृष्टमपि प्राणसमं जीवनसर्वस्वं तं क्षत्रियकुमारं पुनरपि ददर्श। पुहकरसीमभिलक्ष्य स्वामिवर्यः सस्नेहमुवाच- "सिसोदियावंशावतंसेयं राजकुमारी। इयं पूर्वजन्मवृत्तान्तस्मृतिसम्पन्ना। पूर्वजन्मनि युवयोर्विवाहो नाभूत्। अस्मिन् जन्मनि त्वामन्विष्यमाणा तवाभिज्ञानायेहागतवती। एषाद्यापि त्वां प्राप्तुकामा तिष्ठति।" एवमुक्त्वा स्वामिवर्यः स्वकीयं दिव्यं दक्षिणावर्तं शङ्खं दध्मौ। तद्ध्वनेरलौकिकप्रभावात् तौ द्वावपि पूर्वजन्मसम्बन्धे स्मृतिमन्तौ। समस्तं पूर्ववृत्तं साक्षादिवानुभवगोचरं बभूव। अत्यन्तं कारुणिकमासीत्तद्दृश्यं यद्विधर्मिभिर्यवनैः साऽस्माद् बलात्पृथक्कृताऽपहृत्य नेतुमभिलषिता। अन्यमात्मरक्षोपायमशक्यमिति विचार्य तदानीं द्वाभ्यामपि जननान्तरे मिलनसङ्कल्पं दृढं विधाय प्राणत्यागेनात्मोत्सर्गः कृतः। तज्जननान्तरप्रणयोऽधुना सुप्तोत्थित इव साकारतां गतः। द्वयोरपि प्रेमार्द्रेऽन्तःकरणे मिलनोत्कण्ठा सरसभूमौ बलवत्तृणाङ्कुरमिव प्रादुरासीत्।

अथ सा मङ्गलवेला समापतिता यस्याः प्रतीक्षा द्वौ जीवौ जन्मान्तरतः कुर्वन्तावास्ताम्। स्वामिवर्यस्य सङ्केतमनुसृत्य गुहातो द्वे निर्माल्ये सद्यःप्रयुक्ते सरसे सुगन्धियुते समानीय स्वामिवर्यस्य करे कृते। ते पवित्रे अपि स्वामिस्पर्शात्प्रसादपूते जाते। स्वामिवर्यस्तु तयोरेकैकं माल्यं कुमार्यै कुमाराय च सम्प्रददौ। सर्वलोकपूज्यस्यान्येषां च बान्धवानां समक्षं यज्ञाग्निं साक्षीकृत्वा परमप्रीत्या स्वं स्वं माल्यं परस्परं कण्ठार्पितं कृत्वा साफल्यसूत्रधारस्य चरणकमलयुगले प्रणिपत्य गुरुजनानां चरणावुपस्पृशवन्तौ। सर्वैः सुमनःसुमनोञ्जलियुतैः शुभाशीर्वचोभिस्तयोः दाम्पत्यजीवनाय मङ्गलकामना पुरस्कृता। पवित्रपरिणयसूत्राबद्धौ तौ स्वामिवर्यं परमार्थं याचितवन्तौ।

स्वामिवर्यः सस्नेहमुवाच– "का त्वरा? विधिविपरीतमाचरितुं कथमिच्छथः? इदानीमपि युवयोः कण्ठे वैवाहिकं माल्यमम्लानं विराजते। गृहस्थजीवने प्रविश्य पूर्वजन्मनोऽपूर्णां प्रणयगाथां पूर्णां कुरुतम्। अपूर्णायां तस्यां परमार्थावाप्तिरशक्या। दाम्पत्यभावेन तत्प्रेम विशुद्धं मर्यादितञ्च भविष्यति। सतीत्वेन सत्यव्रतेन चानुयुज्यैवात्रागमनं वरम्। तदानीमेव परमार्थज्ञानमपि सहजं स्यात्। प्रतिकूलयति परमार्थसाधनमुद्दामकामभावः। वैराग्यं खलु परमार्थसाधनस्य,प्रथमं सोपानम्।" इत्याशीर्वचोभिरुपकृतौ तौ तत्रैव श्रीमठे परमप्रीतौ गुरुभिर्विनीतौ स्थण्डिले पृथक् शयनासनाभ्यां तां रात्रिं निनायतुः।

अपरेद्युः ब्राह्ममुहूर्त एव दम्पती सविधिं मज्जनं विधाय कृतमङ्गलवेषौ परमाचार्यश्रीरामानन्दं प्रणम्य गङ्गापूजनं कृतवन्तौ। भागीरथ्यै सङ्कल्पितं माल्यं सुविततं समर्प्य बिन्दुमाधवं सम्पूज्य गणपतिं गौरीपतिं काशीविश्वेश्वरं तथा चान्नपूर्णादेवीं महत्या भक्त्या दर्शनपूजनैः प्रसाद्यात्मानं कृतार्थीकृतवन्तौ! श्रीमठं गत्वा परमाचार्यमापृच्छ्य सर्वांश्चाभिवाद्य प्रसादपाथेयं गृहीत्वा ततो स्वगृहं प्रति प्रतस्थुः।

यत्प्रयोजनमुद्दिश्य स्वामिनो रामानन्दस्य भारतभूमाववतरणमभूत् तत्तु एतद्देश्यसंस्कृतिधर्माध्यात्मसंरक्षणमेव। तस्य साहाय्यं विधातुं नैके दिव्यात्मानोऽप्यवतीर्णा इति सूक्ष्मरूपधारिणो विचरन्तो देवा अपि जानन्ति स्म। समाजमास्तिक्यभावापन्नं कर्तुं मोक्षस्य परमात्मदर्शनस्य लालसा जनानां हृदयेषूदेत्विति प्रयतनीयमासीत्। 'भवकर्मबन्धनान्मुक्त्यर्थं रामानन्दं शरणं गच्छ, तस्य शिष्यत्वमवाप्नुहीति सन्दिशंति देवगणा अपि तथाभूतान् पुण्यात्मनः। उपदिशन्तु नामैवं शास्त्राणि विद्वांसो देवगणा अपि किन्तु यदि स्वयमीश्वरोऽप्येवं कथयतीत्यविश्वसनीयं महदाश्चर्यकरञ्च। किन्तु विद्यते वृत्तमेकमीदृशम्। राजस्थानगतस्य टोंकजनपदस्य धुवनग्रामे पन्नाजाटस्य पुत्र आसीत् धन्ना यो परमभागवतोऽनन्यभक्तश्च। एकदा भगवान् प्रत्यक्षतस्तमुवाच– "धन्योऽसि धन्ना! अपूर्वा खलु तव भक्तिः। परमप्रीतोऽस्मि।" मया कथितमेव–

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।"

"इत्येवम्भूतं स्वकीयं कथनं सर्वथा प्रतिपालयामि। अतः त्वत्कृते सर्वदा सर्वथा प्रस्तुतोऽस्मि। परन्तु त्वया क्रियमाणायामुपासनयामेकोऽभावो मां खेदयति। त्वया कस्यचित्पूतात्मनः सिद्धगुरोः शिष्यत्वं न गृहीतम्।"

धन्ना सविनयं कराञ्जलिपुटं कृत्वोवाच– "भगवन्! प्राप्तोऽसि मया। अत

आप्तकामोऽस्मि। त्वयि जगद्गुरौ सति, काऽपेक्षा कस्यचिदन्यस्य गुरोः?"

भगवानुवाच- "वत्स! इयं मर्यादा मयैव प्रतिष्ठिता। सद्वृत्तेन नरेणेयं पालनीयैव। अन्यथा तु भक्तिरपूर्णा स्यात्। तादृशो भक्तः पुनर्जन्मबन्धे पतति। नार्हति मोक्षाधिकारम्।"

धन्ना प्रोवाच- "अहं तु भवत्सान्निध्यं कामये। मोक्षेन किम्?"

भगवान् तं प्रबोधितवान्- "वत्स! यदा त्वं स्मरसि, त्वामुपसर्पामि। प्राप्ते सति मोक्षे, त्वं ममैव सह भविष्यसि। अपि त्वं मम कष्टस्य हेतुभूतं भवितुमेवमेवेच्छसि?"

धन्ना निवेदितवान्- "प्रभो! क्षमस्व मामज्ञानमूढम्। भवतः कष्टस्य नाम्नैव कम्पितोऽस्मि। कोऽधमः प्रभुं कष्टापन्नं द्रष्टुमिच्छति? कृपया प्रबोधय। कं करोमि गुरुम्?"

भगवान् सन्दिष्टवान्- "सम्प्रति धराधाम्नि समर्थो गुरुरेक एव रामानन्दः काश्यां काशते। स साक्षान्ममैव विग्रहः। स त्वां शिष्यत्वेनाङ्गीकरिष्यति।"

धन्ना जाटो भगवतो निदेशानुसारं काशीं प्रति प्रस्थितवान्। काश्यां भक्तधन्नाजाटस्य पदार्पणात्पूर्वमेव भगवतोऽयं दिव्यसन्देशः श्रीरामानन्देन स्वयोगजसामर्थ्येन समवाप्तः। स भगवतो लीलां प्रणम्य धन्नाजाटस्यागमनप्रतीक्षारत आसीत्। धन्नाभक्तोऽपि निरन्तरं पदयात्रयाऽचिरमेव काशीं प्राप्य प्रसन्नमनसा श्रीमठं ययौ। स्वजीवनस्याशेषमाध्यात्मिकं यथार्थं स्वामिवर्याय सविनयं निवेदितवान्। तस्य भक्त्या प्रसन्नो भगवान् सेवकवत् कृषिकर्मणि श्रमरक्षासाहय्यं विदधाति। सत्यमिदमुपश्रुत्य श्रीरामानन्दो विस्मितः सस्मितः भगवल्लीलां स्मारं स्मारं केवलमिदमब्रवीत्- "ईश्वरेच्छा बलीयसी। तस्यादेशं प्रमार्ष्टुं कः क्षमः?" सद्यः समुपनीतैरुपकरणसम्भारैः स्वामिवर्यस्तं धन्नाभक्तं पञ्चसंस्कारसंस्कृतं साधयित्वा विधिवन्मन्त्रदीक्षाप्रदानेन शिष्यरूपेणाङ्गीचकार। अनन्तानन्दस्तु सविधि रामनामशब्दसुरतियोगसाधनायां तं साधु प्रशिक्ष्याऽभ्यासं कारयामास।

श्रीरामानन्दाचार्यस्तं धन्यं धन्नाशिष्यं प्रोवाच- "कियत्कालपर्यन्तमत्रैव स्थित्वाऽभ्यासयोगेन सिद्धत्वमवाप्नुहि। ततः स्वग्रामं निवर्तयस्व। पूर्वसंस्कारवशात्त्वं भगवतोऽनन्यभक्तोऽसि। अधुनाऽनया साधनासिद्ध्या मोक्षसुखमपि लप्स्यसे। जीवनमुक्तः सन् भगवता सह स्वैरं विहरिष्यसि। एतत्सौभाग्यं बत केन लप्स्यते?"

अतः किञ्चित्कालपर्यन्तं धन्ना त्वेकान्तसाधनयाऽऽत्मदर्शनेनार्जितजीवन्मुक्तिः स्वग्रामं धुवनं प्रत्यावर्तत। प्रतीक्ष्यः स भगवान् स्वयमेव तस्य प्रतीक्षायां लीन आसीत्। तथागतं तं विलोक्य कण्ठेनाश्लिष्य परं सुखं मेने।

श्रीमठस्य द्वारमनावृतं स्वामिवर्येण स्त्रीजनेभ्योऽपीति सर्वथा निर्भ्रान्तोत्क्रान्तेनोपक्रमेण विहितं स्वीयं रामानन्दीयं धर्मदर्शनं विश्वमानवधर्मदर्शनमिति एकतः स्वामिवर्यस्य सुयशश्चमत्कारयानमधिरुह्य भारतीयसीमान्तस्य परं पारं याति स्म; अपरतश्च तस्यौदार्यमपि समुद्भिन्नपक्षं निरन्तरं प्लवते स्म। नासीदियत्ता खलु स्वामिवर्यस्य महिम्नः। भारतस्य पूर्वसीमान्ते 'त्रिपुरा' इति प्रान्ते आसीत् कश्चित्पण्डितः प्रभाकरशर्मा, तस्यैकमात्रमपत्यं 'पद्मा' नाम्नी कन्या, प्राप्ते वयसि ज्ञानपिपासोत्कण्ठिता सा काशीं गन्तुं युगावतारं स्वामिनं श्रीरामानन्दं च द्रष्टुं स्वपितरं निर्बन्धं चकार- "तातपाद! नयतु मां काशीम्। स्वामिश्रीरामानन्दस्य दर्शनं विना प्राणान्नैव धारयिष्यामि। दर्शय दर्शय, मेलय मेलय मां रामानन्दमि"ति। अप्रतीकारः खलु बालहठः। पद्मा तु प्रभाकरस्य नेत्रकनीनिका। एकमात्रञ्चापत्यम्। स कथं तस्याः निर्बन्धम-सकृत्कृतमसत्करोतु? स आशैशवादेव तां श्रद्दधते स्म, स्निह्यति स्म यतो हि साऽऽसीदलौकिकलीलावती, अपूर्वप्रतिभाप्रकाशिका, सहजमेधाविनी, कर्मणि कुशला, कमनीयकलेवरा, सर्वतोऽप्रतिमसौन्दर्यबलात्स्वयं लक्ष्मीरिवागता भूलोकं पद्मासना पद्मा। स मनागपि न सहते स्म तस्या नैराश्यमौदास्यं वा। तन्मयीभूतेन मनसा स प्रभाकरो नित्यमेव लक्ष्मीं समाराधयति। भगवती लक्ष्मीरपि तस्याराधनया सुप्रीता विराजते। एकदा सुप्रसन्ना सा भगवती विष्णुप्रिया प्रियं कर्तुं तस्य जायाक्रोडेऽकरोत्कमलपुष्पमाशीरुपायनरूपम्। धन्यधन्यायास्तस्याः कुक्षौ तदनु समागता सैषा कन्या। लक्ष्म्याः प्रसाद इति मत्वा दम्पती अस्या अभिख्या 'पद्मे'ति चक्रतुः। तयोर्दृढं विश्वासो यदियं लक्ष्म्या वरदानरूपा, तस्या अनुग्रह एव कुक्षौ हरिताङ्कुरो जातः। अतः सपत्नीकः प्रभाकरः पद्मया सह गृहान्निर्गत्याऽव्यवहितमार्गेण काशीं सम्प्राप्य श्रीमठं व्यवसितवान्।

किं नामाविदितं सर्वान्तर्यामिना स्वामिना श्रीरामानन्दाचार्येण? स त्रिकालज्ञ आसीत्। श्रीमठप्रविष्टेभ्यस्तेभ्यस्त्रिपुरागतेभ्यः स पूर्वतो विज्ञात इवानावृतं निरवरोधं द्वारं दर्शनं ददौ। एवं स्वामिवर्येण कृतार्थीकृतः सुकृतवान् प्रभाकरो सपरिकरं यथोचितमभिवादनं विधाय पद्माया जन्मत आरभ्य श्रीमठगमनहठपर्यन्तं सर्वमपि वृत्तान्तं निवेदयामास। यद्यपि सर्वमिदमैतिह्यं स्वामिवर्यो जानाति स्म तथाप्यजानन्निव महता मनोयोगेन तत्सर्वं वृत्तं कर्णगोचरीकृतम्। तस्य स्मृतिपटले सर्वं चलच्चित्रमिव प्रतिभाति नित्यं यद् द्युलोकस्था दिव्यात्मनो भारतस्याध्यात्मिकजीवने विधर्मिभिः क्रियमाणं क्रूरं प्रहारं दर्शं दर्शं भारतीयनारीणां भृशं प्रपीडनं नित्यमेवानुभूय करुणार्द्राः

सन्तः दिव्यशक्तिविग्रहान् प्रेषयन्ति भारते परित्रातुमुद्धर्तुं च समाजे नारीणां वैदिककालगतं सम्मानं पुनः स्थापितं स्यादिति तेषां प्रयासः। तस्मिन्नेव क्रमे पद्माया अप्यवतरणं भूलोक इति मत्वा स्वामिवर्यस्तां दिव्यदृष्ट्या सुनिपुणं परीक्ष्य, तस्या आग्रहमविफलयन् सम्यगधिकारिण्यै तस्यै दीक्षामन्त्रं दातुं स्वीचकार। अथैतन्निमित्तं प्रभाकरं निर्दिष्टवान् कियत् कालपर्यन्तं काशीवासाय यतो हि पद्मा दीक्षामन्त्रेण सनाथीभूत्वा, सिद्धिभिरलङ्कृता साधु आत्मसाक्षात्कारिणी दिव्यशक्तिसम्पन्नाऽभीष्टप्रयोजनप्राप्त्यये समर्था सम्पद्येत्। वैराग्यभावापन्ना निःशेषविरक्तिमाप्नुयात्। परिपक्वप्रज्ञावती तत्रभवती पद्मा समाजं संस्कर्तुं स्त्रीणाञ्चाऽऽध्यात्मिकीमुन्नतिं विधातुं सर्वथा प्रभवेदिति स्वामिवर्यस्यासीन्मनोभिलाषः। स्वामिवर्यस्य मनोभावं सम्यगनुभूय पद्मायाश्च स्वभाववित्पुण्यात्मा पण्डितप्रभाकरशर्मा, परमाचार्यस्य निर्देशं शिरोधार्यं कृत्वा काशीवसाय मनश्चकार। श्रीमठमुपकण्ठेऽन्विष्य कमप्युचितमावासं तत्र गृहबुद्धिं बबन्ध। ततश्च प्रतिदिनं यथाकालं श्रीमठमागत्य दम्पती पद्मया सह सत्सङ्गचर्यामभजताम्। कामपि शुभवेलां निभाल्य स्वामी रामानन्दः पञ्चसंस्कारयुतां मन्त्रदीक्षां दत्त्वा तस्यै शब्दसुरतिभक्तियोगमप्युपदिष्टवान्।

पद्मा त्वनुश्वासं दीक्षामन्त्रस्य जपं कुर्वाणा प्रायेण नैकहोरा पर्यन्तं समाधिस्था भवति स्म। तस्या अयमभ्यासः क्रमशो वर्धमानो विरेजे। शनैः शनैरध्यात्मेचतना कण्ठद्वारेण हृदयं समवाप। कियत्कालानन्तरं, मणिपूरं स्वाधिष्ठानञ्चोत्क्रम्य मूलाधारधारया सुषुम्णागता चतुर्थे द्वारि प्राप्ता। तस्या इयं दिव्योपलब्धिः सद् गुरोरेव वरदानस्य प्रतिफलमित्यत्र नास्ति सन्देहलेशः। अपि च, तस्या जन्म दीव्यमेव। पूर्वजन्मसंस्कारोचितास्तस्याः वासनाः दिव्यताखचिता। अत एव, सा ताभिर्वासनाभिः प्रेरिता, स्वतः स्फूर्ता वाऽत्रोचितं स्थानमागत्य सर्वसामर्थ्यसम्पन्नस्य श्रीगुरोः सन्निधौ स्वभावानुकूलं यौगिकज्ञानं लभमाना विद्योतते। अनेनैव कारणेन, चतुर्थद्वारस्यार्गलोद्घाटने तया न मनागपि विलम्बितम्। सियारामसंयुतस्य शब्दसुरतियोगस्य परिपक्वतया चतुर्थं द्वारमुद्घाट्य स्वात्मदेवतायाः दर्शनं कारितम्। सा पद्मा परिपूर्णतया अवस्थामुपगम्य सर्वथाऽऽत्मस्था बभूव। जीवनमुक्तेः कोटिं लब्ध्वा दिव्यजीवनचर्यया सह सा समाजमुपकर्तुं सन्नद्धा जाता।

'स्वामिनः श्रीरामानन्दस्य प्रभावतस्त्रिपुराप्रान्तादागतैका ब्राह्मणकन्या सिद्धेः परां कोटिं जगामे'ति वार्ता न केवलं धर्मालयेषु भक्तजनेषु वाऽपितु काश्याः वीथीसु सामान्यजनेषु च परिव्याप्ताऽभूत्। इतश्च, सिद्धयोगारूढा पद्मावती स्त्रीणां पृथक्सत्सङ्गसभासु हृदयङ्गमैर्मधुरवचनैः स्वीयानुभूतिं मुक्तहस्तेन वितरति स्म।

"भगवान् विश्वनाथोऽपि 'राम' इति मन्त्रं जप्त्वा मान्त्रिकीं-तान्त्रिकीं-शक्तिं समुपार्जितवानि"ति तस्याः प्रवचनेषु नित्यमेवाऽवितथं तथ्यं श्राव-श्रावं, विश्वेश्वरसमर्चापराः स्त्रियोऽपि पद्मासनं विरच्य पद्माननं वीक्ष्य रामनामजपनिरताः संसारभोगविरताः सञ्जाताः। एवं हि, भगवतो विश्वनाथस्य पुर्यां सामाजिकसमरसताया अपूर्वः कश्चिन्नव्यो भावः समुदेति स्म। भगवतो शङ्करस्य मन्त्रो 'राम-नाम' इति मत्वा काशीस्थासु स्त्रीषु 'रामनाम' प्रति कोऽप्यतिविशिष्टोऽनुरागः समजनि। तपःपूतायाः पद्मावत्या 'रामनाम' इति मन्त्रप्रचारेण श्रीमठेऽपि प्रसन्नता समधिकं प्रचरति स्म। नैकवर्षपर्यन्तं पद्मावती, स्वामिवर्यस्य निर्देशानुसारं, दूराद्-दूरं गत्वा लोकजागरणस्य दुष्करमपि कर्म सोत्साहं सधैर्यं निष्ठया निर्व्यूढवती। विधर्मिणामत्याचारैर्नारीसमाजं रक्षमाणा ताभिः सह राष्ट्रं, धर्मं, संस्कृतिञ्च दृढं युनक्ति स्म। वयसोऽवसाने पद्मावती स्वामिवर्यं प्रार्थितवती 'निजं धाम सम्प्रेषितुमि'ति। तस्या इच्छानुसारं, स्वामिवर्यः सामादिशत् निजं धाम गन्तुम्। भक्तमाले स्वकीयममर्त्यं नाम विटङ्क्य सा स्वीये चिरन्तन आनन्दधाम्नि प्राविशत्।

'सङ्गीतमस्तीश्वरीयं वरदानमि'ति स्वामिरामानन्दस्यानवद्यं मतम्। कण्ठोत्थिता मधुरा स्वरलहरी तमानन्दयति स्म। लक्ष्मणपुरस्योपकण्ठेऽस्ति 'पैखम' इति नाम्ना प्रसिद्धो ग्रामस्तत्र निवसति स्म पण्डितसुरेश्वरप्रसादशर्मा। तस्यापत्यं पुमान् भायणकुमारः। आशैशवाद् भायणकुमाराय सङ्गीतं समधिकं रोचते स्म। स आसीन्मधुरकण्ठस्य स्वामी। कण्ठात्समुत्थितायां स्वरलहर्यां, तत्र श्रोतारो ग्रामजनाः शिरो घूर्णनपूर्वकं तन्मयिनो भवन्ति स्म। वपुषा वेषेणापि स सुदर्शन आसीत्। तस्य सङ्गीतेन श्रोतारो मन्त्रमुग्धा भवन्ति स्म। पुत्रस्य सर्वे संस्कारा यथाकालं पित्रा पण्डितसुरेश्वरप्रसादशर्मणा शास्त्रीयविधिना सम्पन्नाः कृताः। तस्य सङ्गीतशिक्षा परम्परागते लक्ष्मणपुरस्य सङ्गीत-गुरुकुले पूर्णतां जाता। कृतविद्यस्य सुयोग्यगुरोनिर्देशने कृतेनाभ्यासेन तस्य सङ्गीतप्रतिभा चमत्कारैः सङ्गता। पित्रा श्रीशर्ममहोदये-नोपनयनसंस्कारमनुवर्त्य तेन गायत्रीपुरश्चरणमपि कारितम्। अनेन तस्य मानसे भक्तिसंस्कारोऽपि कृतपदो व्यवस्थितः। भायणकुमारस्य गणना तदानीं भक्तिसङ्गीतगायकेषु कनिष्ठिकाधिष्ठिता बभूव।

भायणकुमारस्य सङ्गीताऽऽसक्तः कश्चिन्नारायणो नाम ब्राह्मणस्तस्य गृहे यज्ञोपवीत- संस्कारादारभ्य गायत्रीपुरश्चरणपर्यन्तं सर्वेष्वनुष्ठानेषु ह्यनामन्त्रितोऽपि स्वयमागच्छति स्म। केनचित्सम्बन्धेन भायणस्तं 'मातुल' इति सम्बोधयति स्म। सोऽपि भायणस्य सङ्गीतसाधनया समाकृष्टः प्रसन्नश्च तं स्नेहसिक्ताभिधानेन 'नारद'

इति नाम्नाऽऽकारयति। नादब्रह्मोपासकस्य समर्चितसङ्गीतविद्यस्य स्वरसाधनानिरवद्यस्य तस्य भायणकुमारस्यातीतकैशोर्यस्य देवोपमे सुघटिते देहे पौरुषोचितेन नवयौवनेन पदं कृतम्। स्वरसिद्ध्या श्रोतृपेयताङ्गतस्य तस्य सङ्गीतस्य प्रभावात् क आसीत्तदानीं यस्य हृदये न प्रविष्टः सः? तस्यैका प्रतिवेशिनी निसर्गसौन्दर्यसम्पन्ना विप्रकन्या भायणस्य वयसा, सौन्दर्येण, रूपेण, शीलेन, भक्त्या, हृत्झङ्कृतेन स्वरेण मधुरेण गुणेन वाऽनुरक्ता मौनमेव तस्मै आत्मसर्वस्वं हृदयं समर्पितवती। रसालमूलाऽङ्कुरिता मालतीलतेव सा तमालिङ्गितुमियेष। अनिन्दितयौवना सा सुरसरि नाम्नी कन्याऽहर्निशं तं सुकुमारं कुमारमेवानुचिन्तयति स्म। किन्तु स कुमारस्तु सर्वथाऽनेन वृत्तेनानभिज्ञश्चम्प-कोद्यानस्य मिलिन्द इव संसाररागतो निर्लिप्तः स्वरगुञ्जारविस्तार एव संल्लीन आसीत्। नारायणोऽपि तस्य भक्तिसङ्गीतायाध्यात्मिकं चरमोत्कर्षं प्रदातुं तं निरन्तरं नुदति स्म काशीं गत्वा रामानन्दस्य शिष्यत्वं ग्रहीतुम्। श्रीमद्रामानन्दस्य नाम भायणस्य श्रुतपूर्वमासीत्। यदा नारायणो मातुलो यागिराजस्य श्रीमद्रामानन्दस्य दिव्यगन्धिचमत्कारवृत्तं नित्यनूतनं वारं वारं तस्य श्रवणपथमानीतवान् तदा जगद्गुरोर्दिव्यदर्शनेन स्वकीयं जीवनं धन्यं विधातुं भायणो मनश्चकार। भक्तेः परां कोटिमधिगन्तुं स सोत्कण्ठो बभूव। अन्ततो नारायणेन सह स काशीं प्रति प्रस्थितवान्।

भायणकुमारस्य काशीगमनं श्रीमद्रामानन्दस्य च शिष्यत्वग्रहणमिति वार्ता कुतश्चित्सुरसरेः कर्णविवरे नैकधा प्राविशत्। स्वप्रेमाङ्कुरस्य पल्लवनात्पूर्वमेव दहनकल्पनया तस्याः हृदयं वेपते स्म। अतः श्रीमद्रामानन्दमेव शरणं गच्छामीति दृढं सङ्कल्प्य सा भायणात्प्रागेव काशीं गत्वा श्रीमठमन्विष्य तत्रोपस्थिताऽभवत्। तदानीं स्वामिवर्यो बहिर्भाग एव विराजते स्म। दिव्यानुभावं महात्मानं दृष्ट्वा, 'अयमेव स स्वामिवर्य' इति बुद्धिं विधाय सहसा चरणयोः पपात। स्वामिवर्यस्तु तां वयःप्राप्तां कन्यकां निवेशार्थिनीं मन्यमानः शिरसि हस्तं प्रसार्य "सौभाग्यवती भव" इति मङ्गलाशीर्वचसा योजयामास। अस्तङ्गते दिनकरे, दिवसावसाने शिष्यैः श्रीमठस्य द्वारं पिहितम्। सन्धिते सति कपाटयुगले, तदानीमेव भायणकुमारोऽपि श्रीमठस्य द्वारदेशमाजगाम। अतस्तत्र प्रवेष्टुं न शशाक।

स तत्र कमपि किमपि नोक्त्वा गानगुणसदनो निजसङ्गीतकलया श्रीमठमाराधितुमियेष। श्रीमठस्य द्वारदेशे तैलवर्तिकायुतान् पञ्चदीपान् स्थापयित्वा सुमधुरेण कण्ठेन सालापं दीपकरागेण गातुमारेभे। विद्यावतां कवीनां कलाकाराणां च सहज एव विज्ञानाऽहंकारो भवति। भायणेऽप्यस्य नापवादः। दीपकरागस्यावतरणक्रमे तस्य सुस्वरेण कण्ठमाधुर्येण समाकृष्टो जनसम्मर्दस्तत्र समवेतः। भायणस्य

रागसिद्धिप्रभावेण सहसा प्रज्वलितान् चम्पककुड्मलनिभान् सर्वान् प्रदोषदीपान् दृष्ट्वाऽपि चापूर्वं सान्ध्यज्योतिरनुभूय चमत्कृता विस्मिताः सस्मिताः सर्वे जनाः करपुटवादनपुरस्सरं साधुवादं वितीर्य तं प्रशंसितवन्तः। तस्मिन्नेव काले गुहागर्भाच्छङ्खध्वनिः समुत्थितः। तेन शङ्खध्वनिना भायणस्य हृत्तन्त्री अनाहतनादेन झङ्कृता। समनन्तरमेव स आनन्दसागरे निमग्नो जातः। बहिर्भूतं जनरवं निशम्य यावच्छिष्यैर्मठस्य द्वारमनावृतं तावदेव भायणकुमारो जनानुपेक्ष्य मार्गण इव सत्वरं गुहाद्वारमुपययौ। आर्त्तस्वरेण हठतो निवेदयामास– "कुर्वन्तु स्वामिवर्याः पुनरप्येकवारं शङ्खनादं नान्यथा मे प्राणा न भविष्यन्ति।" सद्य एवैतद् घटितम्। निश्चेतनः स भूमौ पपात। सहसा तं विगतचेतनमुपसृताऽऽचार्योऽनन्तानन्दः तस्याननेऽभिमन्त्रितं जलं निषिक्तवान्। अनेन चैतन्यङ्गतः स उत्थाय स्थितः। गुहाद्वारस्य तिरस्करिणीं संहृत्य निर्गतेन परमाचर्येण सद्गुरुणा स्वामिवर्येण श्रीमद्रामानन्देन दत्तेन दिव्यदर्शनेन स कृतार्थीकृतः। भायणस्तु पीतामृत इव, ज्योत्स्नास्नात इव, पुनर्जीवित इव, आनन्दप्लुत इव, दर्शनातृप्त इव स्वामिवर्यस्य तपःप्रभामण्डितं मुखं वीक्षमाणः चरणयुगलं विधृत्य निवेदयामास– "सकलजगद्वन्द्य गुरो! नारायणो नामैकः कृपालुजनः परमार्थबोधाय मां भवत्सकाशं नीतवान्। स मयैव सहात्र सोपानेभ्योऽवतीर्य मठस्य द्वारदेशं आगतवान् किन्तु ततो मां विमुच्य सहसा क्व प्रणष्ट इति नाहं जाने। शरणागतोऽस्मि। अनुगृह्णन्तु माम्। भवतो दिव्यज्ञानोपदेशतो ब्रजतु मे जीवनं धन्यताम्।"

तदानीं तत्रत्या जनाः, शिष्याश्च साश्चर्यं परस्परं विलोकयन्ति स्म। एतस्मिन्नेवान्तरे सुरसरिः सहसोपसृत्य स्वामिवर्यस्य चरणयोर्निपत्याऽब्रवीत्– "भगवता मह्यं 'सौभाग्यवती भवे'ति शुभाशीर्वादः प्रदत्तः। यद्ययं मे प्राणधनो विरक्तो भविता, कथमयमाशीर्वादः प्रतिफलति?" स्वामिवर्यस्त्वन्तर्यामी महापुरुषः। स स्वकीयं शङ्खं दध्मौ। द्वयोरपि मानसं वीतरागभावापन्नं सञ्जातम्। ततः सुरसरिरपि परमार्थोपदेशं याचितवती। पञ्चसंस्कारैर्निर्मलान्तःकरणाभ्यां ताभ्यां मन्त्रदीक्षां प्रदत्तवान्। मन्त्रदीक्षितस्य भायणकुमारस्य नूतनं नामाऽभवत् 'सुरसुरानन्द' इति। 'सुरसरि' इति नाम स्वामिवर्याय रोचते स्म, अतस्तन्न परिवर्तितम्। "तवाभिख्या 'सुरसरि' एव स्यादिति। आचार्यनन्तानन्दो गुरोर्मनोभावमनुभूय, पूजावेदिकातः शोभनामेकामम्लानां प्रसादिनीं मालामानीय सुरसरेः करे कृतवान्। "ममाशीर्वादः सार्थकतां व्रजत्विति मालामिमां सुरसुरानन्दस्य कण्ठे मेलये"ति श्रीमद्रामानन्दः सुरसरिमादिदेश। गुरोराज्ञया सुरसरिः प्रसन्नमनसा तथैव कृतवती। "अतः परं युवां दम्पती विरक्तभावेन मन्त्रजपसाधनायां निरतौ भवतम्। अयमनन्तानन्दो युवां शब्दसुरतियोगेन सह विधिवद्रामभक्तिमुपदेक्ष्यति। तेनैव

विधिनाऽप्रमादेन युवयोः साधना प्रचलत्वि''ति निर्दिश्य स युगपुरुषः पुनरपि गुहालीनोऽभूत्।

तेष्वेव दिवसेषु दक्षिणापथे मलिककाफूर इति मुस्लिमशासकस्यात्याचारैर्जनता भृशं पीडितेति वार्ता निरन्तरं स्वामिवर्यस्य कर्णगोचरतां याति स्म। स सुरसुरानन्दं सुरसरिञ्चादिष्टवान्- "दक्षिणापथं गत्वा स्वप्रभावात्प्रजाकष्टं निवारयतम्। तस्य मदान्धस्य नयने समुन्मील्य तथा कुरुतं यथा स शासनाधिकारमदं परित्यज्य ऋजुतां समालिङ्गतु।" गुरोराज्ञां शिरसाऽङ्गीकृत्य तौ दम्पती दक्षिणापथं जग्मतुः। तत्र सुरसुरानन्दस्य प्रथमारम्भ आसीत् स्वप्ने मलिककाफूरांय स्वीयं दर्शनं दत्त्वा सत्पथगमनाय निर्देशः। अनेन वृत्तेन मलिककाफूरः सुप्तोत्थित इव बभूव। विस्मितः स स्वप्नदृष्टं साधुपुरुषमनुसन्धाय, तस्य विषये कृतपरिचयः स्वयं गत्वा सुरसुरानन्दमुपसेवितवान् याचयामास चाशीर्वादम्। सुरसुरानन्दस्तं प्रबोधयामास। तत्त्वज्ञानमुपदिश्य स तस्मै बुद्धिवैशद्यं ददौ। 'मदीयोऽपराधः क्षन्तव्य' इति निवेद्य स सुरसुरानन्देनाऽकथित एव हिन्दूप्रजां प्रति क्रियमाणानत्याचारान् निवारयामास। 'महात्मनः सुरसुरानन्दस्य प्रभावोऽयमि'ति हिन्दूसमाजे हर्षोल्लासः समजनि। स महात्मा सर्वपूज्यः श्रद्धेयश्च बभूव। एवं सुरसुरिसुरसुरानन्दौ बहुकालपर्यन्तं दक्षिणभारते समन्वयसद्भावं विस्तारितवन्तौ।

नियतिचक्रेण सुरसर्याः निवारितायां जीवनलीलायां गतायां च तस्यां भगवद्धाम, सुरसुरानन्दोऽपि प्रवृद्धे वयसि काशीं निवर्तितः। कियत्कालानन्तरं स अयोध्यां प्रति जगाम। तत्रैव तस्यात्माऽपि मुक्तिं गतः।

श्रीमठे निवसतो वीतरागिणोऽपि श्रीमद्रामानन्दस्य लोकचिन्ताऽचिन्त्यैवासीत्। परमकारुणिकः स नित्यमेव विधर्मिणां शासकानामत्याचारं श्रावं श्रावं, वैदिकधर्महानिं दर्शं दर्शं, हिन्दूप्रजानामुत्पीडनमनुभूय द्रवति स्म। कलेः प्रभावादेवैते अत्याचारा इति मनसा विमृश्य तानुपरोद्धुं स कलियुगं स्वसमक्षमाहूय निर्दिष्टवान् 'समाजस्य हितकरकार्याणि न बाधितुमि'ति। कलिस्तु स्वामिवर्यस्य स्मरणमात्रेण परमश्रद्धया विनतेन शिरसा करधृतराजदण्डस्त्वरितपद्भ्यां तं सकाशमागत आसीत्। स्वामिवर्यस्याह्वानपात्रं भूत्वा स आत्मानं धन्यं मेने। गुहायां पञ्चपात्रेषु स्वर्णमयेष्ववस्थितः स स्वामिवर्यं स्तौति–

नमो नमः स्वामिवर्याय।।१।।

नमामि रामं जगतो हिताय

धरावतीर्णं पुरुषोत्तमं वै।

गुहाप्रविष्टं परमात्मरूपं
लोके सदाऽलौकिककर्मनिष्ठम्।।२।।
आनन्दयुक्तं रामं भजेऽहं
कारुण्यमूर्तिं दिव्यात्मतेजः।
धर्मप्रतिष्ठायै यस्य जन्म
जगद्गुरुं तं शिरसा नमामि।।३।।
समभावभूत्यै यतते सदा यो
यः श्रीमठे पावनज्ञानराशिः।
विधर्मिणां येन कृतः पराभवः
तं स्वामिवर्यं सततं नतोऽस्मि।।४।।
आदित्यभूताः शिष्या यदस्य
धर्मप्रचाराय सदा द्रवन्ति।
योऽयं कृती साक्षाद्धर्मरूपो
जगद्गुरुं तं शरणमुपैमि।।५।।
जातिर्न पङ्क्तिर्न विभेदभावो
हरिं भजन्ते हरेर्जनास्ते।
सर्वे प्रपत्तेधिकारिणः स्यु-
रित्थं मतं यस्य तमेव वन्दे।।६।।
सर्वं विधास्यामि मनीषितं यत्
त्वया प्रभो! लोकशुभैकहेतो!
तवोग्ररोषात्कलिर्बिभेति
प्रसीद भगवन्! रचितोऽञ्जलिस्ते।।७।।

कलिकृतं हार्दमेतत्स्तवनं श्रीमद्रामानन्दस्य महते परितोषाय बभूव। प्रीतः प्रसन्नवदनः सुधासदनः स कलिं सम्बोधयामास-"मम प्रत्येकोऽवतारः समाजस्य शोषित-वञ्चित-दलितजनानामुद्धारायैव कल्प्यते। मानवोचिता या मानप्रतिष्ठा स तेभ्यो मया साधिता। युगे-युगे ये तिरस्कृताः शूद्राः याश्च प्रताडिता अबलाः तेषां सर्वेषामवलम्बनाय धराधाम्नि प्रतियुगमवतरामि। परमब्रह्मणा नारायणेनापि कृतमेतत्। साधूनामुद्धाराय दुष्टानाञ्च विनाशाय दिव्यशक्तीनामाविर्भावो भवति। अहमपि

तेष्वेकस्तमेवानुसरामि। अतस्त्वामस्मि वच्मि यन्मना सह तव विरोधो मा भूयात्। मया क्रियमाणेषु लोककल्याणारम्भेषु मा भवेत्ते हस्तक्षेपः। यतोहि जगद्विदितस्ते स्वभावः। तवोपस्थितिमात्रेण सर्वेऽनर्था, अशेषपापाः, निखिलानि दुष्कर्माणि समस्ताश्चाराजकताः समवेत्यापतन्ति। एतेषां निवारणं तु जानामि किन्तु त्वया सह संघर्षः कदाचिद्दुष्करः।" स्वामिवर्यस्य वचो निशम्य कलिः सद्य एव तस्य चरणयोः पपात। पुनश्च कृताञ्जलिः स्तोतुमारेभे–

नमो नमः श्रीस्वामिवर्याय।।१।।
हे दीनबन्धो! करुणैकसिन्धो!
सम्यग् विजानामि महोमहात्मन्!
त्वं तत्त्ववेत्ता परमेश्वरस्त्वं
प्रयोजनादेव विभासि नित्यम्।।२।।
गङ्गातटे पुण्यमठे तु काश्यां
गुहानिलीनोऽपि जगत्पुनासि।
हस्ते तु या सिद्धिरथ प्रयोक्तुं
न तत्र बाधा मनसोऽपि मत्तः।।३।।
यो बीजमन्त्रस्तव 'रामनाम'
जानामि तन्महिमानं यथेष्टम्।
तन्नाम जप्त्वैव शिवः शिवोऽभूत्
जानाति को नो तस्य प्रभावम्?।।४।।
अणोरणीयान् महतो महीयान्
तद्रामनाम विश्वेऽस्ति व्याप्तम्।
तत्सत्तयैवास्ति मदीयवृत्तिः
तद्बीजमन्त्रेण कदर्थितोऽस्मि।।५।।
रामस्य नाम्ना च गुरोः प्रभावाद्
ह्यसि द्वितीयः किल रामचन्द्रः।
अध्यात्मशक्त्या परिवर्धितं त्वां
जनाः सश्रद्धं परिपूजयन्ति।।६।।
जानीहि भगवन्! सहयोगिनं मां
क्रियासु सर्वासु शुभासु नित्यम्।
सदाऽनुकूलो भवतो भवामि
न मेऽस्ति वचने सन्देहलेशः।।७।।

इत्थं स्तुत्वा साक्षाद्विग्रहः कलिः स्वामिनश्चरणं समुस्पृश्यऽऽशीर्वादमाचकाङ्क्ष। तारकमन्त्रेण तमनुयुज्य स्वामिवर्यः सस्नेहं तं प्रस्थापितवान्।

एकतो यावत्कलिः वहिर्याति, अपरतस्तावत्पतितपावनी गङ्गा पायसपूर्णपात्रं समादाय स्वामिवर्यमुपगम्य सादरं तस्मै समर्प्य विनिवेदयामास- "स ब्रह्मचारी यत्पायसं भवते आनयति तत्रैवोपयुज्यताम्। अपवित्रं खलु तस्मिन् प्रयुक्तं धान्यम्। पायसनिवेदकोऽपि न सदाचारी। महात्मभिः सात्त्विकमेवान्नमुपभुज्यम्। शुचिमनसः सदाचारिणश्चैव भोज्यान्नं ग्रहणप्रयतं भवति। अन्यथा तु साधकानां सिद्धिर्विपर्यतामेति। उक्तञ्च लोके- "यथान्नं तथैव मनः।" अपि च, "मनः प्रसीदति शुच्यन्नभक्षणात्।" अतो ग्राह्यमेतत्पायसं त्याज्यं च तदानीयमानम्।" इत्युक्त्वा कुमारिकाविग्रहवती जाह्नवी ततोऽपसरत्। कियत्कालानन्तरं स ब्रह्मचारी पायसपूर्णपात्रं करे कृत्वा स्वामिवर्यमुपायातः किन्तु तेन तन्निषिध्योक्तम्- "इदमत्र पायसं कुमारिकया भगवत्या गङ्गया पूर्वमेवानीय प्रदत्तम्।" इदं चमत्कारवृत्तं विदित्वा स ब्रह्मचारी विस्मितानन्दितोऽभूत् पायसञ्च तत्तथैव निवर्तयामास।

तस्मिन् दिने सत्सङ्गसभायां प्रवचनक्रमे परमाचार्यः तथ्यमिदमाख्यातवान्- "जीवने आहारशुचिताया महन्महत्त्वम्। रामभक्तैर्विशेषतो ध्यातव्यं यत्तेषामाहारो व्यवहारश्च सदैव सात्त्विककर्मार्जितः पूतो भवेत्। विशुद्धा खलु जीविका जीवने महान्तमुल्लासं जनयति। सात्त्विकस्त्रोतसः समायाता सम्पत्तिः सदा सुखकरी सम्पद्यते। अनया सोऽर्जकोऽप्यात्मिकं सन्तोषमनुभवति। पापकर्मभिरुपार्जितं पुञ्जीभूतं च द्रव्यं कलुषयति साधनोपायमन्तर्मानसं च। कालुष्येन चित्तस्य स्थैर्यं विनश्यति ध्यानञ्च बाधते। दुरन्नं दूषयति चित्तवृत्तिम्। उक्तञ्च-

"यथा यथा हि पुरुषः पापान्नानि निषेवते।
निर्मर्यादो भवेल्लोके क्षीयते स तथा तथा।।"

एवं कथयता तेन तत्पायसवृत्तं श्रावयामास। अहोरात्रे केवलमेकवारं पायसग्रहणमित्याहारः स्वामिवर्यस्य। परमाचार्यस्यानेन सम्बोधनेन समुपस्थिताः श्रद्धालवः श्रोतारो भृशं प्रभाविता आहारशुद्धिं प्रति दत्तावधनाः ययुः।

देशे, धर्मे समाजे चानुदिनं विधर्मिणां वर्धमानैराक्रमणैः स्वामिवर्यः श्रीरामानन्दो भृशं चिन्तातुर आसीत्। सर्वेषु धार्मिकसम्प्रदायेष्वैकमत्यं स्थापितुं तेषाञ्च परस्परं क्षुद्रगर्हितहठोपेतान् विवादान् निवारयितुं स सविशेषं प्रयत्नपर आसीत्। अतस्तेन सर्वधर्मसमभावमतीनां शिष्याणामावश्यकता निरन्तरमनुभूयते स्म येन तादृशी विषमा

परिस्थितिर्नियन्त्रिता स्यात्। कालोऽपि तस्य सहयोगाय तत्पर आसीत्। तस्मिन्नेव काले श्रीमहेश्वरमिश्रो देव्या विन्ध्यवासिन्या निर्देशतः स्वेन पुत्रेण सह श्रीमठमाजगम। 'उपनीतः पुत्रः स्वामिश्रीरामानन्दस्य सेवार्थं प्रेषितव्य' इत्यासीद्देव्या आदेशः। 'नरहरिं' इति अभिधानमस्ति तस्य तनयस्य। वृन्दावनसमीपस्स्यैकस्य ग्रामस्य निवासिनः श्रीमहेश्वरमिश्रस्य भार्या अम्बिका आसीत्। अनपत्यताऽन्तर्दाहपीडितौ दम्पती भगवतीं विन्ध्यवासिनीं तन्मन्दिरे गत्वा सुचिरं समाराधयामासतुः। प्रसन्ना देवी पुत्ररत्नं ददौ ताभ्याम्। आदिदेश च, "नायं सामान्यो नरो, देवपुरुषोऽयम्। अस्य जन्मनः किञ्चिद् विशिष्टं प्रयोजनम्। महन्महतां कार्याणां सम्पादयितायं भविता। अस्य हस्ते लोककल्याणम्।" ब्राह्मणोचिते प्राप्ते वयसि, बालकस्योपनयनसंस्कारविधिं सम्पाद्य, देव्या वचनमनुस्मृत्य पण्डितमहेश्वरमिश्रो यदा श्रीमठमाजगाम, तत्राचार्योऽनन्तानन्द एव तेषां प्रथमो द्रष्टा। महेश्वरः सर्वमपि वृत्तं यथावत्तस्मै निवेदितवान्। श्रुत्वा च, स आचार्योऽब्रवीत्- "मन्त्रदीक्षां दातुं गुरव एवार्हन्ति।" तदानीमेवान्तर्यामी सर्वज्ञः स्वामिवर्यः स्वीयं दक्षिणावर्तं शङ्खं दध्मौ। यथास्थितः स बालको नरहरिः समाधिदशामाप्तवान्। किञ्चित्कालानन्तरं गुहामुखात्तिरस्करिणीमपसार्य परमाचार्यः श्रीमद्रामानन्दो बहिरागतः। अथागमनेन सह स्वामिवर्यस्य, तस्य बालकस्य समाधिरपि भग्नोऽभूत्। प्रथमं महेश्वराम्बिके ततश्च नरहरिरपि स्वामिवर्यस्य चरणावुपस्पृश्य तस्थुः। यावदनन्तानन्दः किमपि ब्रूते, तावत्स्वामिवर्योऽब्रवीत्- "सम्पन्ना खल्वस्य बटोर्दिव्यदीक्षा लौकिकदीक्षयाऽभियुज्य साधनाविधिमुपदिश।" इत्येवं निर्दिश्यानन्तानन्दं, स्वामिवर्यः पुनरपि गुहां प्राविशत्।

आचार्योऽनन्तानन्दः तस्मै बालकाय सविधि मन्त्रदीक्षां प्रदाय तस्य नूतनं नामकरणं 'नरहर्यानन्द' इति कृतवान्। स क्रमेण सर्वान् धर्मग्रन्थान् सतत्त्वमुपदिष्टवान्। साधनापथे सुदृढं पदं न्यस्य नरहर्यानन्दः शब्दसुरतियोगस्य शिक्षामवाप्तवान्। रामनामजप एव शब्दसुरतियोगः। ततश्चानन्तानन्दः शिष्यं नरहर्यानन्दं श्रीमठस्य मूलभागस्थे गङ्गातटे एकान्तैकस्मिन् कक्षे प्रेषयामास, तत्रोषित्वा नामध्यानसाधनाभ्यासाय। यथानिर्दिष्टः शिष्यो नरहर्यानन्दस्तत्रैकान्ते संसारनिरपेक्षः सन् भक्तिसाधनारसे निमग्नोऽभूत्।

श्रीमठे निवसतो नरहर्यानन्दस्य रूपयौवनं निभाल्य विमुग्धा कस्यचिच्छ्रेष्ठिनः कन्या तं स्वीयं जीवनसर्वस्वमिति मन्यमाना, विवाहाय हठात् हठं समारब्धवती। तस्या इयं दुराग्रहवार्ता यदा स्वामिवर्येण श्रुता, तदैव नरहर्यानन्दः चातुर्मास्यानुष्ठानाय प्रयागं प्रेषितः। तत्र 'अलोपीबाग' इति स्थाने स एकस्मिन् लघूटजे निवसति स्म।

ततश्चित्रकूटं जगाम। एवं स्थानात् स्थानं परिभ्रमन् स पुरुषोत्तमपुरीं ययौ। तत्र चातुर्मास्यानुष्ठाने दत्तावधानः स अनुष्ठानावसाने, "गढखला" इति ग्रामस्य निवासिना ठाकुरश्रीविजयवहादुरसिंहेण साग्रहं सविनयं राजस्थानं नीतः। तत्र राजस्थाने रामानन्दमतस्य प्रतिष्ठापनेन, रामभक्तेश्च प्रचारेण लोकेऽयं प्रचुरं यशोऽर्जितवान्। वृद्धे वयसि नरहर्यानन्दः पुनरपि चित्रकूटं सिषेवे। चित्रकूट एव तस्य जीवनलीलाऽवसिता। अस्यैव स्वामिनो नरहर्यानन्दस्यैकोऽप्रतिमः शिष्योऽभवत् गोस्वामितुलसीदासः परमरामभक्तो 'रामचरितमानस' इति ग्रन्थस्य प्रणेता। बालकस्य नरहरेर्दीक्षातः पूर्वमेव स्वामिवर्यः श्रीरामानन्दोऽनन्तानन्दं सङ्केतितवान् यदयं बालकोऽन्यैः ऋषिभिः सह देशस्य, धर्मस्य, समाजस्य च रक्षायै धराधाम्न्यवतीर्णोऽस्ति। नरहर्यानन्दस्यैको योग्यो वरशिष्यः तुलसीदासो भविष्यति। इमौ द्वावपि धर्मस्य परमसंरक्षकौ देशस्य समाजस्य चोद्धारकौ भविताराविति।

राजस्थानं नाम स्वामिवर्यस्य श्रीमद्रामानन्दस्य सविशेषं दृष्टिलक्ष्यमासीत्। क्षत्रियशासनबहुले राजस्थाने विधर्मिणां धर्मविध्वंसप्रयासः कुण्ठितो भविष्यतीति तस्य दृढो विश्वास आसीत्। धर्मान्धतायाः प्रवातप्रभञ्जने इमे राजपुत्राः सर्वथा समर्था अत्याचारं निरोद्धुं सततसन्नद्धाः दृश्यन्ते। अतो यदा कोऽपि राजस्थानतो रामानन्दस्य शिष्यतामङ्गीकर्तुं समायाति, तं प्राथम्येन ग्रहीतुं सोऽनन्तानन्दं निर्दिष्टवान्। एकदा 'बांसवाड़ा' इति स्थानस्यैको युवविद्यार्थी, यः काश्यां कुत्रचिन्न्यायशास्त्रस्याध्येता यज्ञेशदत्तो नाम। स्वामिवर्यस्य सन्निधौ तस्य प्रभावेण तेन विरक्तं जीवनं स्वीकृतम्। एकदा पञ्चगङ्गाघट्टं प्रति प्रस्थितेन तेनोक्तम्- "नाहं पुनरागमिष्यामि।" तस्य भार्या तेनोक्तमिदमुपहसितं वचनमिति मत्वा यावद्दिनं प्रतीक्षमाणा तस्थौ। किन्तु प्रदोषारम्भेऽपि नायाते तस्मिन्, सा तपस्विनी तद्वचनं सत्यमिति मत्वा स्वशरीरं तत्याज। रात्रौ यज्ञेशदत्तो यदा गृहं प्रतिनिवृत्तः तदा निष्प्राणदेहां प्रियां दृष्ट्वा भृशं शुशोच। अन्त्येष्टिसंस्कारं कृत्वा सर्वमपि श्राद्धकर्म निष्पाद्य शुचिर्भूत्वा स रामानन्दं शरणं ययौ। शिष्यत्वं ग्रहीतुं प्रार्थयामास। तस्यास्थां परीक्षितुं परमकौतुकी स्वामिवर्यस्तस्य समक्षमेकमनुबन्धं प्रस्तुतवान्- "यदि त्वं शतं घटिका यावदेकेनैव पादेन देहस्थितिं विधास्यसि, दीक्षां ते दास्यामी"ति। स सहर्षं तमनुबन्धं स्वीकृत्वा समुद्यतः सन् तथैवाकरोत्। कालावेक्षणे नियुक्तः सोऽप्यनन्ताननन्दस्तस्य निष्ठया परं प्रीतोऽभूत्। प्रायेण नियतावधिं परिपालयन् किञ्चित्पूर्वमेव पादकम्पेन विचलितोऽभवत् किन्तु दयालुः आचार्योऽनन्तानन्दो हस्तं दत्वा तमाललम्ब। प्रसन्नः श्रीमद्रामानन्दो यज्ञेशदत्तं शिष्यं चकार। स्वयमेव दीक्षाविधिं सम्पाद्य सोऽब्रवीत्- "यतो ह्यनन्तानन्दस्तुभ्यमालम्बनं

ददौ, अतः स एव ते प्रथमो गुरुः।" अनन्तानन्दः परमप्रेम्णा तस्मै साधनाविधिं समग्रमेवोपदिदेश। तस्य नूतनं नाम चकार 'योगानन्द' इति। राजस्थानं रामभक्तिमयं कर्तुं परमाचार्यस्य निदेशतोऽनन्तानन्दः श्रीमठेऽनेकान् तत्रत्यान् शिष्यान् प्रावेशयत्। ये राजस्थानीयाः शिष्यास्तेन दीक्षितास्तेषु जयपुरे गलतापीठसंस्थापकः कृष्णदासपयहारी, अग्रदासः, कर्मचन्दः, अल्हः, टीलारामदासप्रभृतयः सप्तशिष्या प्रमुखाः सन्ति। एते साधनामार्गे सिद्धिं समवाप्य राजस्थानं गत्वा महन्निष्ठया रामभक्तेः रसधारां सर्वत्र प्रवाहितवन्तो येन लोककल्याणमार्गः प्रशस्तोऽभूत्।

विधर्मिणामत्याचाराः निरन्तरं वर्धमानाः सन्तीति स्वामिश्रीरामानन्दो निपुणं पश्यति स्म। प्रलोभनाद्भयाच्च समाजस्य दलितवञ्चितवर्गो विशेषतया धर्मभ्रष्टो विधीयमानो दृश्यते स्म। एतत्सर्वमनुभूय स्वामिवर्य एकदा कबीरदासं रविदासञ्चाहूय चिन्तातुरः सन् सम्बोधयामास– "इदानीं हिन्दुसमाजो विधर्मिभिः कदर्थितः कमपि मार्गदर्शिनमुद्धारकमपेक्षते। महती आवश्यकता खलु वर्तते गुरुमुखस्य। अभिजातवर्गाणां गुरुषु पुरोहितेषु च महान् दम्भः कुलीनतायाः। त आत्मानं सर्वोपरिं मन्यन्ते। युगधर्मो विस्मृतो हि तैः। न देशं निभालयन्ति न वा समाजस्य दुर्दशां विचारयन्ति। केवलं स्वार्थं परिपोषयन्ति। आत्मकल्याणं जगत्कल्याणमि"ति।

कबीरदासो रविदासश्च गुरुदेवस्याशयमधिगतवन्तौ। ये भक्तिभाजः पुरुषास्त एवेदानीं लोकसङ्ग्रहं कर्तुमर्हन्ति। काल एव तान्निर्दिशति। अतो लोकसङ्ग्रहं प्रत्युन्मुखीभवनं श्रेयः। रामभक्तियोगस्य मार्ग एव सर्वसुलभः फलप्रदो भविष्यति। एवं गुरोराज्ञां शिरसाऽङ्गीकृत्वा द्वावपि शिष्यप्रवरौ ग्रामाद्ग्रामं, नगरान्नगरमटन्तौ सर्वजनहिताय रामभक्तेः शङ्खनादं चक्रतुः। तयोर्दृष्टिरासीत्समाजस्य दलित–वञ्चित–शोषितवर्गेषु। प्रतिदिनं तयोरभियानं समाजं रामभक्तिमयं कर्तुं, विधर्मिणां प्रति हनुमद्दार्ढ्यं व्यवहर्तुं प्रसरति स्म। वस्तुतोऽयमासीत् स्वामिनः श्रीरामानन्दस्य धर्मप्रचाराम्भो मठाद् बहिर्निःसृत्य। अनेन समाजः सनाथीभूत्वा धर्ममार्गे प्राचलत्। श्रीरामपञ्चाय–तनस्येयमुपासनामृतधारा सुदीर्घं कालं यावत्समाजं भक्तिरसाप्लावितमकरोत्।

(६)

श्रीमद्रामानन्ददतिरिच्येदानीं धर्मस्य समाजस्य च नास्ति कोऽपि संरक्षक इति निरन्तरं वर्धमानस्य यशसः सुगन्धिमाघ्राय पीडिता जनास्तं शरणमुपायान्ति स्म। तदानीं जूनाखाँतुगलकस्यात्याचारैः भृशं कदर्थिताऽऽसीदयोध्यानगरी। बलाद्धर्म–

परिवर्तनं तस्यात्याचारस्यैकमात्रं प्रयोजनम्। अयोध्यानरेशस्य सूर्यवंशोद्भवस्य श्रीहरिसिंहदेवस्य भ्रातृजः श्रीगजसिंहः श्रीमठमागत्य परमाचार्यं धर्मावतारमार्तजनत्रातारं सकलशास्त्रसमुदाचारं सर्वक्लेशापहर्तारं वैधर्म्यपाखण्डमूलोच्छेदकर्तारं भवतापसंतप्तदीनजनशरणदातारं, शरणागतभर्तारं, रामभक्तिसरित्सुधाधारापथविधातारं श्रीमद्रामानन्दं स्वीयां व्यथाकथां निवेदयामास। तेन प्रस्तुतं विवरणमतीवलोमहर्षणमासीत्। जूनाखाँतुगलकस्यात्याचारैः भृशमुद्वेलितो धर्मपरिवर्तनभयाद् भीतः श्रीहरिसिंहदेवः क्वचिद्वनं गत्वा तपोनिरतोऽभूत्। संन्यस्तेन तेन न्यस्तराज्यभारोऽहं यदा प्रजापालनतत्पर आसम्, तावदेव स तुगलकोऽयोध्यामाक्रम्य मां विजित्य तां स्वाधीनां विधाय सर्वान् धर्मभ्रष्टानकरोत्। योऽपि मुस्लिमधर्मं नाङ्गीकृतवान् स क्रूरं हतः। गवां ब्राह्मणानाञ्च परमः शत्रुः सः। यत्र कुत्रापि तान् पश्यति तत्रैव हन्ति। तस्य नृशंसस्य क्रौर्यगाथा ह्यकथनीयैव। किं कथयामि, न कञ्चिदुपायमवेमि। सीदामि खलु वैधर्म्यपापपङ्कमग्नः। जीवनं खलु नरकायते। पण्डिताः मां तिरस्कुर्वन्ति नैव कश्चिद्हिन्दूमुख्यजनोऽङ्गीकरोति। पुनरप्यहं वैदिकसनातनधर्मधारामवगाहितुमिच्छामि। किन्तु मदीयमन्तर्दाहं न कश्चिदनुभवति। मया श्रुतं, भवान् सर्वानालिङ्गति। प्रजाभिः सहास्मुद्यतो हिन्दूधर्ममङ्गीकर्तुम्। भवतो यशः श्रावं श्रावमयमहं धावं धावं भवन्तं शरणं समागतोऽस्मि। अतो भवान् मां निराशं कर्तुं नार्हति।

स्वामिवर्यो गजसिंहदेवमुखादिमं करुणवृत्तान्तं निशम्य द्रवीभूत्वा तमाश्वासयामास। सान्त्वनावचोभिः स तमब्रवीत्– "अलं चिन्तया। भवितव्यं भवत्येव। अपुण्यं खल्वस्य देशस्य यद्विधर्मिणः शासका एवमत्याचारैः हिन्दुधर्मावलम्बिनीं प्रजां क्रूरमुत्पीडयन्ति। अहो विधर्मिणां धर्मान्धता बुद्धिविकारश्च ! भवतु नाम, अहमचिरादेव शिष्यैः सहागमिष्याम्ययोध्यापुरीम्। तत्र भगवतः श्रीरामस्य बालक्रीडासङ्गिनी पुण्यसलिला सरयूः विराजते। तस्यां युष्मान् सर्वान् स्नापयित्वा मन्त्रदीक्षया सविधिं प्रयतेऽस्मिन् हिन्दूधर्मे सभाजयिष्यामि।" एतच्छ्रुत्वा गजसिंहदेवः सहर्षं वारंवारं प्रणम्य सद्गुरुं प्रतिनिवृत्तः।

स्वकीये साधनाजीवनेऽयमासीत्प्रथमोऽवसरो यदा क्रान्तद्रष्टा जगद्गुरुः श्रीमद्रामानन्दः समाजस्य धर्मस्य च रक्षणाय गुहातो बहिरागत्य काश्याः परिधिमुल्लङ्घ्य क्वचिदन्यत्र ययौ। सुविचारितायां तिथौ धर्मपताकामग्रे निधाय स्वकीयैः प्रौढशिष्यैः सह स अयोध्यां प्रति प्रस्थितवान्। स्वामिवर्यस्याऽयोध्याऽऽगमनं श्रुत्वा सर्वमप्यानन्दमयं जातम्। तत्र स्वागतोत्सुकानां जनानां हर्षस्य सीमैव नासीत्। 'स्वामिश्रीरामानन्दो विजयतेतराम्' 'जगद्गुरोः स्वामिवर्यस्य जयोऽस्तु 'धर्मो विजयताम्' इत्यादिभिः

बहुभिः जयघोषैः हर्षनादैर्दिङ्मण्डलं परिव्याप्तं बभूव। मन्ये, श्रीरामः पुनरपि कलियुगे लङ्कां विजित्य राक्षसान् निहत्य राजधानीमयोध्यापुरीमागतः। समुपस्थिते जनसम्मर्दे हर्षोल्लासस्य का कथा? केचन बद्धाञ्जलयः प्रणमन्ति, केचन श्रीचरणकमलयोः साष्टाङ्गदण्डवत्प्रणिपातं कुर्वन्ति, केचन कण्ठे पुष्पहारमर्पयन्ति, केचन पुष्पवृष्टिं वितन्वन्ति, केचन पाद्यमर्घ्यं जलं समर्पयन्ति। सशिष्यं स्वामिवर्यं सभाजितुं, तस्य कृपाकटाक्षं लब्धुं जना अहमहमिकया धावन्ति स्म। तदानीं तत्राऽयोध्यापुर्यां स्वर्गात् किमपि पुण्यपर्व समवतीर्णं बभूव। न कश्चित्कस्यचिच्छृणोति, न कश्चित्कमपि पश्यति। सर्वे मन्त्राविष्टा इव, कयाचिददृष्टशक्त्या समाकृष्टा इव, सौभाग्यदेवताभिरादिष्टा इव, दैवेन निर्दिष्टा इव, नियतिकृतनियमेन परामृष्टा इव, यस्यां दक्षिणदिशि सोऽभ्यागतः श्रीमद्रामानन्दः तस्यामेव दिशि मनोवेगेन गच्छन्ति स्म। श्रीमद्रामानन्दोऽविरतपदो भगवन्तं श्रीसीतारामं स्मरन् शिष्यैः सह महता जनसम्मर्देनानुगतः सरयूतटं प्राप्य रामघट्टं गतवान्। तत्र सरयूतीरे यावद्दृष्टिप्रसरस्तावन्नरशिरोनिकरः समदृश्यत। श्रीस्वामिवर्यस्य निदेशतः सर्वे नरा नार्यः बाला युवानो वृद्धाश्च सहैव स्वामिनः जयघोषैः सरयूं प्रविश्य ब्रूडनोद्ब्रूडनैर्यवनधर्मपरिहारप्रायश्चित्तं कृतवन्तः। ततः स्वामिवर्योपदिष्टान् मन्त्रान् सश्रद्धं परमप्रेम्णा भक्त्या च समुच्चार्य पुनः हिन्दूधर्मे परावर्तिताः। 'श्रीरामोऽवतु माम्' 'श्रीरामो रक्षतु माम्' 'श्रीरामः शरणं मम' इति त्रिःकृत्वा बद्धं सुबद्धं विहितवन्तः। ततः स्वामिवर्येण स्वकीयः सुघोषो दक्षिणावर्तः शङ्खः समाध्मातः। अनेन शङ्खध्वनिना वातावधूतास्तूला इव यवनत्वदोषा अपाकृताः। मृतेषु प्राणसञ्चार इव समेषामन्तःकरणेषु दिव्यभावः समजनि। यवनान्धकारिते पुरे नवप्रभातं हसति स्म। प्रकृतिस्तदानीं सर्वत्रोल्लासमयी जाता। पुनरपि शास्त्रविधिना संस्कृत्य तान् सर्वान् तत्रैव सरयूतटे स्वामिवर्यः प्रबोधितवान्- "सदेहमयमस्म्यत्रा-गतोऽयोध्यावासिनां विश्वासं दृढं विधातुं यदस्मिन् सङ्कटकाले ते नैवैकाकिनः। साम्प्रतं न केवलमयं रामानन्दोऽपितु सकला अपि भौतिकदैविकशक्तयः सूक्ष्मतया प्रत्यक्षं भवद्भिः सह तिष्ठन्ति। अलीकं खलु भयाकुलितं धर्मान्तरणम्। अतोऽलमुद्वेगेन दूषितेऽपि शरीरे नात्मा दुष्यति। स्वभावोऽध्यात्ममुच्यते। एवं हि धर्मस्तु भावरूपः। अविकृते सति सद्भावे बलात्कृतस्य भौतिकविकारस्य का चिन्ता? नात्मिकः सः। भारतस्य सनातनं धर्मज्ञानं, सर्वप्रयतमध्यात्मं तथा चाक्षुण्णा सांस्कृतिकी परम्परा-एतैस्सर्वैः भवन्तो दत्तहस्तावलम्बाः। भारतेन भारतेनैव विश्वं ज्ञानमयं कृतम्। विश्वसन्तु, इयं कालरात्रिरचिरमेव गमिष्यति। पुनरपि ज्ञानस्याध्यात्मस्य च प्रखरो भास्वानुदेष्यति। भौतिकतायाश्चाकचिक्येन सम्भ्रान्ता धर्मलोभिनः कदाचिदवश्यमेवागमिष्यन्ति शान्तिं

कामयमाना अस्यैव भारतीयाध्यात्मं शरणम्।" तुमुलकरतलनादैर्जयघोषैश्च नभोमण्डलं गुञ्जितम्। श्रीमज्जगद्गुरोरनेन पुण्यानुष्ठानेन साऽयोध्या तस्मिन्दिने महोत्सवा विराजिता। स्वस्थाननिवृत्तेरिदं दृश्यमविस्मरणीयमासीन्महन्मनोमुग्धकरम्। अहो प्रभावो रामानन्दस्यालौकिकशक्तेः।

ततः रामजन्मभूमिं, हनुमान्गढीं कनकभवनञ्च गत्वा, तत्र तत्र दर्शनं विधाय सुदर्शनो महात्मा श्रीरामानन्दः सत्सम्बोध्याऽयोध्यावासिनः काशीं प्रत्यागतः। सर्वत्रैकैव चर्चाऽऽसीदहो सुधीरसाहसो रामानन्दः! दिव्या च तस्य योगशक्तिः!! स्वामिवर्यो दीक्षागुरुत्वमुत्क्रम्य धर्मोद्धारगुरुत्वं समपद्यत्।

अथ घटिता पुनश्चैका चमत्कारिणी घटना। श्रावणीपर्वावसरे काश्यामायोजितमासीदेकं विराट् धर्मसम्मेलनम्। सुदूरदूरेभ्यः स्थानेभ्यो विद्वांसो धर्माचार्याः समागता आसन्। अनुष्ठिते सति श्रावणि पर्वणि, यथाकालं समायोजितायां धर्मसभायां चर्चाया विषय आसीत् समाजस्य धर्मस्य च रक्षणं संरक्षणम्। समवेता विद्वांसो धर्माचार्याश्चासन् विक्षुब्धाः देशस्य दुर्दशां विवर्ण्य। विधर्मिणां शासकानाममानुषिकाः क्रूरा अत्याचाराः दिनानुदिनं वर्धमाना एव दृश्यन्ते। गर्ह्यमपि कुकृत्यं कुर्वन्तस्ते न लज्जन्ते। विधर्मिभिः हिन्दूनां शास्त्रग्रन्थविमाननं, धर्मप्रतीकचिह्नानां यज्ञोपवीतसूत्राणां त्रोटनं, भालतिलकानां प्रोञ्छनं, शिखानां कर्तनं माल्यादीनां विमर्दनं निःशङ्कं निरङ्कुशं सर्वत्र क्रियत इति सर्वेषां रक्तानि क्वथन्ति स्म। सुदुःसहा धर्मान्तरणवात्या सनातनधर्मपोतं निमज्जयति। युवतीनां कुलवधूनां पतिव्रतानां शीलापहरणं तैः धर्मपरिवर्तनस्य साधनमिव प्रयुज्यते। शास्त्रग्रन्थानां प्रज्वलनं, मन्दिराणां मूर्तीनाञ्च विभञ्जनं, कूपजलानाञ्चापवित्रीकरणं स्वैरं क्रियते। सङ्कटापन्नं खलु हिन्दुत्वं परिवर्तिता च सनातनजीवनपद्धतिः। तत्र समवेतानां विदुषां धर्माचार्याणां मुखात्प्रतिरोधस्योजोमयी भाषा तु स्फुटमभिव्यक्ता किन्तु रोषः कथं परिणमतु? कथं विफलयन्तु क्रूरशासनस्य शस्त्रप्रयोगम्? विद्वांसो धर्माचार्यास्तु स्वकर्मनिरताः शान्तिप्रियाः। लघु-लघुकानि राज्यानि शासमानाः परस्परं शत्रुतया जीवन्तो राजानोऽपि निरुपायाः हतप्रभाः कञ्चित्प्रतिरोधं कर्तुं नोत्सहन्ते, का कथा सामान्यजनानाम्? प्रजारक्षणेऽसमर्थास्ते भूपतयः दीना इव विधर्मिशासकतेजोऽसहमानास्तेषां चरणेष्ववनमन्ते। अथ कुत्र त्राणं लभेत धर्मः? कथं संस्कृतिः संरक्षिता स्यात्? स्वर्गोपमेयं भारतभूमिः कथं न नरकतुल्यतां यातु? शाश्वतं तत्त्वज्ञानं कथं व्यवहारे तिष्ठतु? तत्र सर्वे वक्तारः सरोषं भृशमाक्रुष्टा अपि हस्तसंवलनं जिह्वाचालनञ्चातिरिच्य किं कुर्वन्ति? कं शरणमुपयान्तु? अशक्ताः खलु प्रतीकारकरणे। अन्ततो बहुधा विमृश्य तेषां चिन्तननिष्कर्षं आसीद्यच्छ्रीमद्रामानन्द

एवेदानीमाशाकिरणपुञ्जः। स एव सम्प्रति महान् सिद्धो योगी ह्यलौकिकशक्तिसम्पन्नः सर्वसमर्थः। यदि देशे विधर्मिशासकाः कुतश्चिद्बिभ्यति केवलं श्रीमठादेव। अतः श्रीमद्रामानन्दस्य शरणमेव श्रेयसे स्यात्। सद्यएव विगतदिवसेषु तेनाऽयोध्यायां यत्पूतं साहसकर्म समनुष्ठितं तत्तु तेनैव शक्यमिति सर्वविदितम्।

अपुरेद्युरेतमेव सदाशयमुररीकृत्य विदुषां सर्वसम्प्रदायाचार्याणामेकं प्रतिनिधिमण्डलं श्रीमठं जगाम। अन्तःसञ्ज्ञया विज्ञायाऽऽचार्यानन्तानन्देन पूर्वत एव तेषामतिथ्यस्य व्यवस्था विहिताऽऽसीत्। तेषां तत्र सम्प्राप्तिकाल एव प्रवरशिष्य आचार्यानन्तानन्दः समुचितां सपर्यां विहितवान्। स्वामिवर्यो रामानन्दस्तदानीं गुहास्थ एवासीत्। सर्वे गुहाद्वार एव स्थित्वा स्वामिवर्यं देशस्य समाजस्य धर्मस्य च कारुणिकीं दुर्दशां सकरुणं निवेदितवन्तः प्रार्थयामासुश्चेदानीं भवानेव त्रातुं समर्थोऽस्तीति। अतश्चात्र देशस्य गगनमण्डलमतिव्याप्य स्थितं कालं विपन्मेघाडम्बरं विलोपितुं भवानेव शक्त इति महती खल्वस्माकमाशाऽभ्यर्थना च। एतदेवास्मदागमनप्रयोजनम्। कृपया पुनातु देवोऽस्मान् दिव्यदर्शनेनेति।

स्वामिवर्यः तिरस्करिणीमीषदपवार्य तत्र गुहान्तर्निविष्ट एव परमतेजसा तान् सर्वान् कृतार्थीकुर्वन्नब्रवीत्– "धारयन्तु धैर्यम्। अचिरादेव दिव्यात्ममिरियं भारतभूः सनाथीक्रियते। विश्वसन्तु तां परमां शक्तिम्। श्रद्दधन्तु परमेश्वरम्। इदं भारतं तस्मै बहुरोचते। अस्योपरि तस्य महान् स्नेहः। स नैव सहत अस्याः भूमेः कदर्थनम्। अतस्तेन हेतवो व्यवस्थाप्यन्ते। प्रसरति सर्वत्र तस्य कल्याणयोजनेत्यहं पश्यामि। निवेदयामि भवतः बुद्धिमन्तः। त्यजन्तु क्षुद्रस्वार्थान्, अपसारयन्तु गर्हितसङ्कीर्णताः, अपनयन्तु परस्परं विद्वेषं, प्रशमयन्तु मैत्रीहारिणीमीर्ष्यां, स्वीकुर्वन्तु औदार्यवृत्तिं, सज्जन्तु निर्दोषदर्शनां दृष्टिं, विस्तारयन्तु सौहार्दवृष्टिं, स्वाङ्गीकुर्वन्तु सौमनस्यसृष्टिं, वितरन्तु हार्दहृष्टिम्। एवं हि समरससमाजनिर्माणाय प्रयतन्तु सर्वे। परस्परप्रेमसङ्घटित एव हिन्दूसमाजोऽस्याः विपत्तेः सफलं प्रतिरोधं कर्तुमर्हति। विघटितेन समाजेन नेयं समस्या समाधेया। विदांकुर्वन्तु मदीयमिदं कथनं ग्रन्थिबन्धनेन। यत्र सुमतिस्तत्रामृतधारा, यत्र दुर्मतिस्तत्रावशोष इति।" सन्तुष्टाः सर्वे स्वाम्यनन्तानन्देन सभाजितास्ततः प्रयाताः।

तस्यामेव रात्रौ स्वामिवर्येण कृत एकोऽद्भुतश्चमत्कारः। प्रातर्नमाजं सूचयितुं यदा इस्लामपुरोहिता मस्जिदमारूढास्तदा तेषां सर्वेषां कण्ठा अवरुद्धाः। तेषां कण्ठेभ्यो ध्वनिरेव न निःसृतः। इयं सुविचित्रा घटना, न केवलं काशीस्थं मुस्लिमसमाजमपितु देहलीपर्यन्तं तान् सर्वान् विधर्मिजनान् कम्पयामास। सैयद–शेख–मुल्ला–मोमिनजनाः सर्वे किंकर्तव्यविमूढा जाताः। देशे प्रायेण सर्वत्र मुस्लिमसमुदाये काश्याः घटना

चर्चिता बभूव। इब्ननूर-मीरतकीप्रभृतयो मौलवीमुख्याः परस्परं विमृष्टवन्तः। 'इदं दुष्करं कृत्यं कस्यचिद् हिन्दूसिद्धमहात्मन एवेति' निष्कर्ष आगतः। यतो हीयं घटना काश्यां घटिता, अत एव सर्वेषां दृष्टिः श्रीमठाधिपतिं स्वामिवर्यं रामानन्दं प्रत्येव वलिता। मस्जिदाजिरेषु पक्षं विपक्षं चावलम्ब्य विचारोत्तेजिकाश्चर्चाः प्रादुरासन्। 'मारय-मारय, कर्तय-कर्तय' इति शब्दाः अपि क्वचित्कर्णकुहरेषु गताः किन्तु योजनद्वयविस्तीर्णे पञ्चविंशतिसहस्रसंख्यकोद्भटशिष्ययुते चमत्कारखनिनिभे दिव्यशक्तिसेविते राघवपालिते श्रीसम्पन्ने श्रीमठे सुगमतया प्रवेष्टुं न कस्यापि साहसः। अतस्तैर्मौलवी-मुख्यैर्विनिश्चितमुपगन्तुं प्रथमं श्रीमद्रामानन्दस्य शिष्यं कबीरमिति। सोपायनहस्तास्ते कबीरावासमुपजग्मुः। कबीरस्तानुपहारान् निषिध्य तेषामनुनयविनयानुरोधवशात् केवलमिदं स्वीकृतवान् यत्स तैः सह श्रीमठं गत्वा श्रद्धेयं गुरुवर्यं तेषामागमनं निवेदयिष्यति। मार्गे कबीरस्तान् प्रतिबोधितवान्- "पादशाहेन जले ज्वलनं सन्धानितम्। बुभुक्षितः सिंहः प्रकोपितः। किं कर्तुमर्हामि। नैव पारयामि।" एकः सहगामी मौलवी प्राह- "योऽप्यादेशः स्वामिवर्यस्य, स सर्व एव पादशाहं सूचयित्वा क्रियान्वितः स्यात्। अस्माकं जीवनं मरणं वापि हिन्दुभिः सहैव। तव साहाय्यं विना नेदं सम्भवति।" कबीरः पुनरपि तान् धिक्कृतवान्- "हिन्दूनां विनाशाय प्रज्ञाप्रयत्नस्तेषामेव देशे, गृहे वा निवसितैर्युष्माभिः। हिन्दून् प्रत्यमानवीया अत्याचारास्तेषाञ्च नैतिकभावनोत्पीडनम्। एतत्सर्वमसह्यं खलु।" मुस्लिमप्रमुखाः सदैन्यं कबीरं प्रति भृशमभ्यर्थितवन्तः। तावदेव श्रीमठः प्राप्तः।

किं भवेद् गुप्तमन्तर्यामिनः श्रीस्वामिवर्यात्? मुस्लिमप्रमुखैः सह कबीरः श्रीमठं प्रविशतु, एतत्प्रागेव गुहास्थ एव स्वामिवर्यः शङ्खं दध्मौ। तं शङ्खध्वनिं श्रुत्वैव तत्प्रधिनिधिमण्डलं विमोहनस्थितिं संययौ। ततः कबीरस्तन्मण्डलप्रमुखं शनैरुक्तवान्- "पूज्यचरणानामादेशो यथावत्स्वीकर्तव्यः। इत्येव कल्याणम्।" सोऽपि शनैरुत्तरयति स्म- "प्रस्तुता वयम्"। कबीरो गुहाद्वारं गत्वा विनतो भूत्वा मुस्लिमप्रतिनिधि-मण्डलस्यागमनं निवेदयामास। स्वामिवर्यस्तु अन्तर्यवनिकासंस्थ एव सर्वश्राव्यमुवाच- "निखिलस्यापि जगतः स्रष्टा ईश्वरस्त्वेक एव। सर्वे सम्प्रदायास्तमेकं परमेश्वरम-वाप्तुमामनन्ति। सर्वेषां गन्तव्यमप्येकमेव। तस्य परमपुरुषस्याभेदमयी दृष्टिर्न पक्षपातिनी। सदैव सर्वसामान्यां कृपावृष्टिं वर्षति। बाह्यभेदास्त्वस्मद्विरचिताः। तानाश्रित्य विवादो व्यर्थ एव। नोचिता खलु हिंसा। सर्वमिदं जगत्तस्मादेव परमात्मनो जायते तस्मिन्नेव प्रलीयते। तं पूजितुमाराधितुं सर्व एवाधिकारिणो मताः। एतत्प्रयोजनमिदं शरीरम्। सर्वे तस्मिन् सोऽपि सर्वस्मिन्। न केवलं त्वामुद्दिश्य तस्य सत्ता। सर्वांशस्तस्य विभुत्वविलासः।

तत्कथमितरेषां धर्मपालनं वाधसे? भिन्न-भिन्नभिज्ञः स एक एव। तत्त्वतस्त्वनिर्भिन्नो विभाति। तत्किमर्थमस्माकं भेदबुद्धिः प्रसरति? स्वमतं जीवनमित्यत्र सर्वे स्वान्तन्त्र्येणाधिकृताः। स्वकीयप्रबलधर्मान्धतया कथमन्यान् त्रासयसि? युष्माकं पादशाहो हिन्दूप्रजां स्वैरं कदर्थयति। कस्यचिदन्तःकरणं क्लिष्टं विधाय कथं कश्चित्सुखमनुभविष्यति? कदापि नैव। स परमात्मा सर्वं पश्यति। स एव परमो न्यायाधिकृत्। न किमपि तेनाविज्ञातम्।"

स्वामिवर्येणेदमुपदिष्टं तत्त्ववचनं श्रुत्वा स मण्डलप्रमुखः प्रोवाच- "भवदाज्ञा शिरोधार्या। भवतो मन्तव्यं पादशाहं प्रापयित्वा सप्रयत्नं तस्य स्वीकृतिं प्राप्स्यामः। वयं ते कृपाऽऽकाङ्क्षिणः। प्रसीदतु प्रसीदतु भवान्।"

स्वामिवर्यः पुनरपि सम्वोधितवान्- "श्रूयन्ताम्; यदि परमात्मनस्तस्याराधने सर्वेषामधिकारस्तदा हिन्दवः कथं जजियाकरणोत्पीड्यन्ते। भवन्तो मस्जिदं निर्मान्ति तथैव हिन्दवोऽपि मन्दिरनिर्माणे प्रभवन्तु। कथं मन्दिरनिर्माणे आपत्तिः। मन्दिरमस्जिदयोः सुधाप्रस्तरयोः को नाम भेदः? ईश्वरस्त्वेक एव। तस्य प्राप्तेर्नैके मार्गाः प्रथिताः। स्वायत्तं भवतु साधनम्। तत्किं बलाद् धर्मान्तरणम्? समेषामास्थाऽनाहता स्यात्। हिन्दवो गां मातृवत्पालयन्ति पूजयन्ति च। तासां वधो हिन्दुनामास्थासु प्रहार एव। अतो गोवधनिषेधोऽविलम्बमेव भवतु। एवमेव सनातनधर्मस्य पवित्राः श्रद्धेया ग्रन्था अपवित्रतां नीयन्ते दह्यन्ते च। किमर्थमिदम्? धर्मग्रन्थास्तु सत्पथनायका भवन्ति। ते खलु निवारकाः दुर्वृत्तीनाम्। अतः पुस्तकानां तेषां दाहनाशः शीघ्रमेव विरमतु। अत्याचाराणामपि भवति काचित् सीमा। मुस्लिमजनाः सत्ताबलेन मत्ता हिन्दूस्त्रीषु बलात्कारं कुर्वन्ति। तास्तेऽपहृत्य बलान्नयन्ति। यदि नारीणां मर्यादा स्वाभिमानञ्च न हि रक्ष्यते, समाजः कथं प्रवर्त्स्यते? भारते नारीणां यत्सतीत्वं तस्यानिर्वचनीयः खलु महिमा। स महिमा मुस्लिमजनानां दुष्कृत्यैरपहीयते। अतोऽस्यापि शमनं भवेत्। अत्रत्याः सर्वे सामाजिकाः प्राप्ताधिकाराः सौविध्यसम्पन्नाः पूर्वत एव सम्मानभाजः प्रतिष्ठितास्सन्ति। यदि राजकुमारोऽश्वारोहणं कर्तुमर्हति ततो हरिजनतनयो न कथम्? स कथमश्वारोहणान्निषिध्यते, बलादाकृष्याऽवतार्यते। परमात्मदृष्टौ सर्वे समानाः ततः कथमयं भेदभावः? यदि कश्चिद् हिन्दूः वाजिनमारुह्य मस्जिदसम्मुखमायाति तदा स किमर्थमवरुध्यते? हिन्दूनां पूजापद्धतौ शङ्खवादनमप्यधुना निषिध्यते। कुम्भादिषु पर्वसु तीर्थयात्रिणो करग्रहणैः पीड्यन्ते। 'मोहर्रम' इति पर्वणोऽवसरे हिन्दूनां पर्वायोजनं प्रतिबन्धितम्। सन्ति केवलं मुस्लिमजना एव वरेण्याः? अपि तेषामन्येषां व्यक्तित्वमवशिष्टं नैव? निषिद्धानि कीर्तनानि, विलोपितानि पूजनानि। अपहृतं खलु

हिन्दूनां सर्वमपि स्वातन्त्र्यम्। नास्ति तेषां किमपि स्वायत्तम्। हिन्दवस्तु बहुसंख्यकाः, सन्ति तेऽत्रत्या मूलनिवासिनः। अस्ति तेषां विशिष्टा प्राचीना संस्कृतिः, पावनाश्च सर्वकल्याणहेतवः सन्ति धर्मग्रन्थाः। विश्वजनीनं खल्वस्ति हिन्दूदर्शनं चिन्तनञ्च। तेषां विलोपनं, दहनं, ध्वंसनं, हिंसनं कुतोऽपि नोचितं प्रतीयते। प्रजारञ्जनं हि राजधर्मो नाम। प्रजाप्रसादानाय, सरंक्षणायैव राजाऽधिकृतः। न तु प्रजापीडनाय। अयं मुस्लिमजनो मामकीनः, अयं हिन्दूजनो द्वेष्य इति भेदबुद्धिर्नोचिता गर्हिता खलु। यस्य राज्ये बहुसंख्याकाः प्रजाः सीदन्ति, न राजा प्रसीदति, अपित्वन्ततो दुर्गतिं याति। स्मरणीयमिदं परेषां त्रासदो न कदापि सुखं लभते" इति।

मदीयं द्वादशमपीदं तर्कसम्मतं वचनं स्वकीयं पादशाहगयासुद्दीन-तुगलकमुस्थापयन्तु तस्य च लिखितां स्वीकृतिं गृहीत्वा सर्वत्र राजकीयघोषणाभिः प्रसारयन्तु। परमात्मा भवतां सङ्कटमवश्यमेवापनेष्यति। ते मुस्लिमप्रतिनिधयः स्वामिवर्यस्य वचनं सत्यमित्युररीकृतवन्तः ततश्च प्रस्थितवन्तः 'राजकीयमुद्रार्पितं घोषणापत्रमेतद्विषयकं' शीघ्रमेवानेतुमिति। तैः सह द्वारपर्यन्तमागत्य कबीरस्तान् सभाजितवान्।

ते मुस्लिमप्रतिनिधयो देहलीं गत्वा स्वामिवर्यस्य वचनानि पादशाहं संज्ञाप्य साधुपरामर्शेण यावद् राजस्वीकृतिं प्राप्य घोषितवन्तः तावद् देशे चतुर्दिक्षु ग्रामे-ग्रामे, नगरे-नगरे पटहनिनादाः प्रादुरासन्। सर्वत्र स्वामिनः श्रीरामानन्दस्य जयघोषा गगनमण्डलं गुञ्जितवन्तः। जनानामानन्दसागरे तस्य प्रशंसावीचयो विलसन्ति स्म- 'स्वामिवर्यो महान् धर्मरक्षक' इति। 'श्रीमद्रामानन्दो राष्ट्रोद्धारको महात्मा' इति ख्यातिः प्रसरति स्म सर्वत्र। मुल्ला-मौलवीनां (मुस्लिम-पुरोहितानां) कण्ठावरोधो विलुप्तः। मस्जिदेषु पूर्ववत् अजानो नमाजश्च प्राचलत्। मुस्लिमजनाः स्वामिवर्यस्य तथा विधमुपकृतं शिरसा स्वीकृत्य, 'स सर्ववन्द्यः समन्वयी महात्मा' इति मेनिरे। तत आरभ्य द्वावपि समाजौ शान्तियुतं मैत्रीभावमङ्गीकृत्य निजधर्मकर्मनिरतौ जातौ।

स्वामिनो रामानन्दस्येमं प्रयासं सर्वातिशयं प्रशंसितवान् दिल्लीस्थो महान् सूफी महात्मा ख्वाजा निजामुद्दीन औलिया। तस्य प्रमुखः शिष्य आसीत् खुसरो कविः। तेन कविना स एकं पत्रं स्वामिवर्यस्य सेवायां प्रेषितवान्। तत्पत्रं स्वर्णिमाभिः पत्रभङ्गिभिरेतादृशं सुसज्जितमासीत् यदस्मिन् किञ्चिद् लिखितमपि वर्तते इति सामान्यदृष्ट्या न प्रतीयते स्म। तदक्षराण्यपि पत्रभङ्गिमयानि। अरबभाषायां यवनानां यः पवित्रोग्रन्थः 'कुरानशरीफ' इति तस्यैकं सूत्रं- 'इल्ला वजिक्र अल्लाह तत मैनुल कुलूब' इत्युट्टङ्कितमासीत्। एतत्सूत्रस्य भावोऽयम्- 'भगवतः स्मरणादेवाऽयमात्मा

शान्तिमुपैती' ति। कविः खुसरो श्रीमठं गत्वाऽऽनीतमिदं पत्रं तेनाऽऽचार्येणाऽनन्तानन्देन माध्यमेन गुहास्थस्य स्वामिनः सकाशं प्रेषयामास। प्रतीक्षिते सति पर्याप्तकाले, स्वामिवर्यस्य किमप्युत्तरमनवाप्य कविवरः खुसरो तस्य प्रशंसायामेकां कवितां श्रावयामास। तस्याः कविताया एका पंक्तिः पारसीकभाषायामपरा च पंक्तिः हिन्दीभाषायामासीत्। इयं कविता खलु प्रस्तौति स्म स्वामिवर्यस्य 'दयालुतामेकामनिर्वचनीयसौन्दर्यसम्पन्नां नायिकामि' ति रूपकम्। कविस्तां प्रति स्वकीयं निश्छलं प्रगाढं प्रेम व्यनक्ति। कवितापाठो यावत्समाप्तिमेति तावदेव शङ्खध्वनिना सह तिरस्करिणी ह्यपाकृता। तां छबिमपूर्वां निभाल्य खुसरोकवेर्नयनेऽतृप्ते खलु परितोषवञ्चिते एव तस्थतुः। तदानीं कविरात्मिकीं शान्तिमनुभूतवान्। एतस्मिन्नन्तरे सतृणचञ्चुरेका चटका गुहां प्राविशत् तथा च मण्डलाकारमुत्पतति स्म। सा चटका यावच्चञ्चुगृहीतं तृणं गुहादेहल्यां स्थापयति तावदेव स्वामिवर्यः तत्तृणं करस्थं कृत्वा चटकां प्रति आचमनीयेन पात्रेण जलं प्रक्षिप्तवान्। तान् जलशीकरान् शिरसि धृत्वा सा चटका निर्ययौ। ख्वाजा निजामुद्दीन औलिया एव चटकारूपेणागतः। अपरेद्युः काश्यां चर्चिते सत्यस्मिन् घटिते, स्वामिवर्यस्य दिव्यता सर्वत्र प्रशंसिता। अथ स्वामिश्रीमद्रामानन्दो द्वयोरपि समाजयोः पूज्यो वन्द्यो बभूव।

इयं प्रसङ्गवार्ता सुदूरेषु पश्चिमदेशेष्वपि प्रसृता। एकदा एकान्तसाधनारतस्य महात्मनो यासीनस्य शिष्या 'फातिमा' श्रीमठे स्वामिवर्यमुपाययौ। तदानीं सत्सङ्गस्यारम्भवेलाऽऽसन्नाऽऽसीत्। सा सत्सङ्गमण्डपेऽतिशालीनतया एकतो भित्तिमाश्रित्य मौनमुपाविशत्। तत्र श्रद्धालवो भक्तजनाः पूर्वतः समवेता आसन्। तेषु केचन कौतूहलिनस्तां वीक्ष्य प्रश्नान् कर्तुमारब्धवन्तः। किन्तु सा मौनमवलम्ब्य तस्थौ। ततोऽपि यदा ते तूष्णीका नासन्, विवशतया तया केवलमेतदेवोक्तम्- "ये जानन्ति ते नैव जल्पन्ति, ये जल्पन्ति ते नैव जानन्ति।" अतः परं सा गमनोद्यता बभूव। तस्या ज्ञानगर्वितैश्शब्दैराकृष्टाः केचित्साधुपुरुषास्तां स्निग्धवचोभिराकारयन्ति स्म। अथ सा पुनस्तत्र गत्वोपाविशत्। किञ्चित्कालानन्तरं स्वामिवर्यस्य ध्यानसाधना विरमिता। तत्सूचकं घण्टिकानादमुपश्रुत्य, आचार्योऽनन्तानन्दः, फातिमानाम्नीं तां स्त्रीमुपसृत्य पप्रच्छ- "अप्यत्रभवती स्वामिवर्यस्य दर्शनं काङ्क्षति?" मौनतयैव तया शिरःकम्पेन स्वीकृतिःसङ्केतिता। ततोऽनन्तानन्दः स्वामिवर्यमुपसृत्य, "काचित् फातिमा नाम्नी साध्वी स्त्री भवतो दर्शनेनात्मानमुपकर्तुमिच्छती" ति निवेदितवान्। तत्क्षणमेव तिरस्करिणीमपसार्य स्वामिवर्यस्तस्यै दिव्यं दर्शनं दत्तवान्। तद्दिव्यदर्शनेन फातिमायाः शरीरे दिव्यचेतना प्राविशत्। हर्षोवेगेन समाश्लिष्टाऽपि संयततया साऽक्लिष्टतयोत्थाय

स्वशिरः स्वामिवर्यस्य चरणकमलयुगले न्यपातयत्। स्वामिवर्यस्य प्रसादमानुकूल्यञ्चानुभूय सा प्रोवाच– "मदीयाः श्रद्धेया गुरुवर्याः श्रीयासीनमहाभागा मां भवतां सेवायां प्रेषितवन्तः। ते परमार्थनिकषं ज्योतिरवाप्तुं भवतां पादपद्मरजांसि वाञ्छन्ति। यतो हि तै रजोभिः सौविरं निर्माय नेत्राभ्यञ्जनं कुर्वन्तु। भवतां यशांसि बहुकालान्मच्छ्रवणगोचरतां यान्ति स्म। मम मनस्तदारभ्य एव भवद्दर्शनाय सोत्कण्ठमासीत्। गुरुचरणानामादेशस्तु मम सौभाग्यमेव। भवद्दर्शनान्मेऽन्तः करणममृतरसेनाप्यायितम्। सर्वमपि मनीषितं पूर्णतां यातम्। एतावद्दूरादहमागताऽस्मि छद्मवेशिनी। भवतां सुधास्यन्दिनी कृपा मह्यमपि वर्षतु। मदीया गुरुवर्याः मनसा वाचा कर्मणा नित्यमेव सर्वात्मना भगवद्भजने लीनाः वर्तन्ते।"

फातिमाया वचनं स्वामिवर्यो महता मनोयोगेन श्रुतवान् प्रोवाच च– "तत्र तु भारतदेशान्नैके सिद्धसाधका महात्मानः सशरीरं गतास्सन्ति। भारतीयदर्शनस्य सर्वविधप्रचारप्रसारमेव तेषां प्रयोजनम्। 'सूफ'– वस्त्रपरिधानात्ते 'सूफीसन्त' इत्युच्यन्ते।"

"भवतां महिमोत्कर्षं न कोऽपि महात्माऽखिलेऽपि जगतीतले स्प्रष्टुमर्हति। भवन्तस्तस्याः दिव्यशक्तेः स्वामिनस्सन्ति याऽत्र गुहास्थैव कमपि साधकं ज्ञानस्य चतुर्थं सोपानं प्रापयति। अप्रतिमाः खलु भवन्तः। न कश्चिदपरो भवत्तुल्यो यतो हि नोपमोपलभ्यते भवताम्। यदि पाश्चात्यमहात्मजनेष्वेतावती शक्तिर्भवेत्, गुरुवर्या यासीनमहानुभावाः कथं मामत्रैतद्दूरं प्रेषयन्तु?"

"तस्य श्रेष्ठत्वमेतद् यन्मामेतावान् प्रश्रयते। उच्यताम्, अन्तिमयात्रायाः (अलविदा इति) पूर्वमेवाहं तत्रागत्य तद्वाञ्छितं पूरयिष्यामि।"

"एषा खलु महती कृपा भवतां न केवलमस्मद्गुरुवर्यान् प्रत्यपितु सर्वं प्रतीच्यजगत्प्रति। नयनयोर्मे भवत्प्रतीक्षा स्थास्यति। अथाऽऽज्ञापयन्तु गन्तुमाशीर्वादप्रदानेने"त्युक्त्वा सा त्रिप्रदक्षिणीकृत्य चरणयोर्विनिपत्य निर्ययौ।

आचार्योऽनन्तानन्दस्तां ससम्मानं द्वारदेशं प्रापयामास। सत्सङ्गार्थमागताः श्रद्धालवो भक्तास्तस्याः सौभाग्यं प्रशंसयन्तस्तां प्रीतिपूरितनेत्रैः सतृष्णं निभालयन्ति स्म।

एवमेवैकदा पाश्यात्त्यदिग्वर्तिनोऽसरारदेशस्य निवासी 'नामवर' इत्यक्षरैरलङ्कृतनामाः कश्चिदेको धनाढ्यः ('अमीर' इति) परमार्थान्वेषणाय दत्तचित्तः काश्यां श्रीमठमाजगाम। नवे वयसि कृतपदस्य तस्याङ्गेषु कौमार्यं लसति स्म। शिरसि बभ्रुकुञ्चितकेशाः, दीप्तो ललाटभागः, मृदुकञ्जनिभमाननं, दीर्घो घोणावंशः, चञ्चलभृङ्गाविव

कनीनिकाविलसिते लोचने, अनुद्भिन्नकूर्चश्मश्रू कपोलौ, कम्बुनिभा ग्रीवा, आजानुलम्बौ बाहू-इत्येतानि सर्वाणि तस्य महानुभावत्वं सूचयन्ति स्म। अश्वमारुह्य दीर्घं पन्थानमतिक्रम्य स इहागतः। स युवजनः सात्त्विकवृत्तिः संस्कृतज्ञो भगवद्भक्तिनिमग्न आसीत्। स सत्यपरः पृथिवीशायी चासीत्। यवपिष्टातकनिर्मिता रोटिकैव तस्याऽऽहारः। मठं प्रविश्य स आचार्यमनन्तानन्दं पप्रच्छ- "अपीदानीं स्वामिवर्याः सन्ति सुलभदर्शनाः?" सोऽब्रवीत्- "सम्प्रति दर्शनं नोपलप्स्यसे। किन्तु शङ्खध्वनिं श्रोतुमर्हसि।" "सन्ति मदीयाः काश्चन जिज्ञासाः। तासां समाधानं प्राप्तुमिच्छामि।"

"सत्सङ्गप्रसङ्गे परमार्थजिज्ञासाऽनुमन्यते।"

"एतावानपि कश्चिदन्यूनो लाभः।" इत्युक्त्वा स प्रतीक्षापरस्तस्थौ। किञ्चित् क्षणानन्तरमेव गुहातः शङ्खध्वनिः श्रुतः। तं सम्मोहनं शङ्खध्वनिं श्रुत्वैव स धनिको युवा नामवर आध्यात्मिकानन्दनिमग्नो जातः। या तुरीयावस्था प्रोच्यते तस्यामर्धचेतनाऽवस्थायां सम्प्राप्तः। चिरादेव स पुनः सामान्यावस्थां प्राप्तवान्। संस्कृतज्ञः गीर्वाणवाण्या आशुकविरप्यासीत्। यावत् स्वामिवर्यः प्रवचनार्थं सत्सङ्गमण्डपे समागच्छतु तावदेव स स्वामिवर्यस्य शङ्खध्वनेश्च प्रशंसायां संस्कृतगीतं रचयामास। अथ स्वामिवर्यस्य शुभागमनावसरे, स समुत्थाय स्वोपज्ञेन संस्कृतगीतेन तमभिवादयते स्म-

"हे मुनिवर! यतिवर! योगीश्वर!
प्रभो! विभो! हे सिद्धसुधाकर!
हे कलिकालप्रभाविनाशक!
विद्याविनयविवेकप्रकाशक!!
हे शरणागतपालक! निश्छल!!
तव चरणौ प्रणमामः। तव चरणौ......।।
कृपाकरम्बितकरुणासिन्धो!
अशरणशरणदीनजनबन्धो!
ब्रह्मसूत्रव्याख्यानपरायण!
धर्मधुरन्धर! हे नारायण!!
मुक्तिप्रदायक! सत्पथनायक!!
तव चरणौ प्रणमामः। तव चरणौ......।।
श्रीमठसिद्धगुहापदधारिन्!

सुरतियोगविज्ञानविहारिन्!
हरिभजनामृतपावनकर्तः!
सकलसमाजसुधारकमर्तः!!
कीर्तिकलाधर! भक्तिसुधाकर!!
तव चरणौ प्रणमामः। तव चरणौ......।।
मामुद्धारय मां प्रतिपालय,
शिशुमिव नित्यं मां निभालय।
जगद्गुरो! त्वामस्मि प्रपन्नः,
शिष्यत्वं मयि धेहि प्रसन्नः।।
भवभेषजतत्त्वज्ञ! विभो हे!!
तव चरणौ प्रणमामः। तव चरणौ प्रणमामः।।"

कश्चिद् वैदेशिको युवा देववाण्या संस्कृतेन विरचितेन स्वोपज्ञेन गीतेन, विशुद्धवर्णोच्चारणेन मधुरेण च कण्ठेन मामभिनन्दतीति दृष्ट्वा श्रीमद्रामानन्दः परमप्रीतोऽभूत्। स प्रपच्छ- "को भवान्? कुत आगतोऽस्ति। किमत्रागमनप्रयोजनम्?"

सोऽपि नामवर उत्तरयति- "अयं जनोऽसरारदेशवासी। 'नामवर' इति मां जनाः कथयन्ति। बाल्यकालादेवेयं दैवी वाक् मयि प्रसन्ना जाता। सरस्वत्या एव प्रसादतः किमपि कवयामि। ईश्वरे मम परमा प्रीतिः। भक्तिरसनिमग्नोऽहं भवतो यशो निशम्य दर्शनार्थमियद्दूरं समागतोऽस्मि। वस्तुतोऽस्मिन्नपि भवदनुकम्पैवेत्यहं मन्ये। मम कासाञ्चिज्जिज्ञासानां समाधानं कर्तुं प्रसीदतु भवान्। कृपयाऽऽदिशतु प्रष्टुम्।"

"यथासुखं पृच्छतु भवान्। स एव परमात्मा समेषां प्रश्नानां परमं समाधानम्।"

"परमात्मना सहैकात्मताप्राप्तये सरलतमो मार्गः कः?"

"निश्छलं परमं प्रेम। तत्तु सुरतिशब्दयोगो रामनामजपेनैव, यः खलु श्रीमठाश्रमेणैव प्रारब्धः।"

"क्व-क्व प्रवर्ततेऽयं मार्गः?"

"समग्रेऽपि भारते। विशेषतोऽत्रोत्तरे भारते।"

"अप्ययमकिञ्चनो भवतां कृपावर्षस्याधिकारी? कामये खलु तां दुर्लभैकात्मतां भवतां सन्निधौ।"

"कथं न? द्वारमस्य मठस्यानावृतं तिष्ठति निर्बाधं सर्वेभ्यो मुमुक्षुभ्यः। अत्रागत्य

न कश्चिन्नैराश्यं भजते।"

एतच्छ्रवणमात्रेण स धनाढ्यो (अमीर इति) नामवरः सत्वरं स्वामिवर्यस्य चरणयोः पपात प्रोवाच च- "भगवच्छरणमिदं शरीरम्।"

"सत्सङ्गक्रमं पालय। उपविशतु, शनैश्शनैः सर्वं साध्यम्। तदवाप्तये सर्वेऽधिकृताः। गुरुरपि स एव यो निजं ज्ञानं कृपणस्य धनमिव ग्रन्थिबद्धं कृत्वा न संरक्षति। ज्ञानं नाम महत्पूतम्। समाजः सततं तदनुकरोतु, तदाचरतु, तेन च स्वकं जीवनं धन्यतां नयत्वित्यनेन तस्य ज्ञानस्य सापेक्षता।"

इयमाध्यात्मिकी भारतभूमिर्नामवरायैतावती रोचते स्म यत्स आत्मज्ञानं लब्ध्वाऽपि स्वकीयम् 'असरार' इति देशं नैव प्रतिनिवृत्तः। स काश्यामेव गृहबुद्धिं बबन्ध। स सदैव कथयति स्म- "न भारतात्सुन्दरतरः कश्चिद्देशः। यत्रेश्वरः साधकेन सह साधकश्चेश्वरेण सह निवसति।"

तद्दिने सायंप्रवचने स्वामिवर्यः सम्बोधयामास- "अधुना चिन्तनपरम्परा कुण्ठितेव दृश्यते। कारणं तु स्पष्टमेव - देशे या भयावहा दुर्भरा विकटा च स्थितिः प्रसृता तस्या खलु पूर्वतो यत्सञ्चितं ज्ञानं तदपि क्लिष्टाक्रान्तम्। दुष्करं खलु तस्य संरक्षणम्। नूतनचिन्तनाय नावकाशो दृश्यते। तथापि विकटायामस्यां स्थितावपि मा भवेदुद्वेगः। सम्प्रति श्रीमठ एव वक्ष्यति दायित्वं समाजेन सह धर्मस्य, संस्कृतेरध्यात्मज्ञानस्य च सम्बन्धमभिरक्षितुम्। श्रीमठो निवर्तयति धर्मान्तरितान् बान्धवान् पुनः स्वगृहम्। श्रीमठो विधर्मिणामाततायिनां तर्जनं नियन्त्रणं तु कुर्वन्नास्ते तथा च तेषामत्याचारैर्हिन्दूसमाजस्य न केवलमभिरक्षणं करोत्यपितु तेषां निग्रहणं करोति। स्त्रीणां ससम्मानं स्वातन्त्र्यं तासाञ्च जीविकोपार्जनमपि साधयति। हिन्दूसमाजस्यैक्याय दार्ढ्याय च दलित - वञ्चितशोषित - निराश्रितोपेक्षितान् जनान् मुख्यधारया सह संयोज्य तान् सर्वान् समत्वपीठे प्रतिष्ठापयति। समन्वय-सद्भाव-समत्व-शङ्खनादेन समाजे नवजागरणं करोति। तेषां विलुप्तमात्मविश्वासं पुनरपि प्रतिग्राह्यति।

श्रीमठो नाचरति प्रतिकूलमनुकूलमेवाचरति। सर्वथा सर्वेषां हितमेव साधयति न वाञ्छत्यहितम्। यत्पदं धत्ते तत्तु स्वीकार्यमेव न त्वस्वीकार्यम्। विरोधितां निषिध्य, प्रेम-सौहार्दमात्मीयत्वं बन्धुत्वञ्चाङ्गीकृत्य सर्वेषां सम्मेलनमेव करोति। अस्य प्रत्यक्षमुदाहरणमत्रभवतां सम्मुखमेव विराजते। रामो यो सर्वेषु रमते, स एवास्माकमाराध्यः पूज्यश्च। स एवास्माकं सर्वेषां हृदयेषु विराजते- 'ईश्वरः सर्वभूतानां हृद्देशे तिष्ठती'ति। योऽपि श्रीमठं शरणमायाति, दर्शनं तस्य रामस्य करोत्येव। श्रीमठः प्रपन्नानां सर्वेषां प्रसुप्ता अनन्तचेतनाः समुद्बोध्य, तान् पूर्णपुरुषस्य श्रीरामस्यान्तिकं

स्थापयति। आस्थायाः प्रखरत्वमेव साफल्यस्य दृढाधारभूमिः। विश्वासः सोपानमार्गः। विवेको निर्बाधगतिः। प्राप्तो ज्ञानविवेकः, आस्थाविश्वासाभ्यां सहास्याङ्गीकरणञ्च, बाधाभिः सह सङ्घर्षस्य, तासु विजयप्राप्तेः तथा च लक्ष्यप्राप्तेरपि दृढनिखात आलेखोऽस्ति। नैक एतादृशाः शिलालेखाः श्रीमठेन दृढं प्रतिष्ठापिताः। भवन्तः श्रीमठस्यास्मिन् समुत्कृष्टे सुसंस्कृते मार्गे ससंयमं सत्वरमग्रेसरन्तु। ममाशीर्वादाः नित्यं भवतां सहयात्रिणो भवितारः। साफल्यं भवच्चरणचुम्बनाय सम्मुखं समुत्सुकं प्रतीक्षते इति शम्।।"

(७)

देशे ये पृथक्-पृथक् सम्प्रदायाः, तान् सर्वानेकसूत्रपिनद्धान् कृत्वा सांस्कृतिकराष्ट्रवादस्य सुदृढघटिते ह्येकस्मिन् मञ्चे सहावस्थातुमित्यासीन्महती विषमतरा समस्या स्वामिश्रीमद्रामानन्दस्य समक्षम्। एतत्कृते स्वामिवर्यस्य धर्मयात्रा प्रस्ताविता किन्तु ये वरिष्ठाः सम्प्रदायाचार्या महात्मनस्तेषां मन्तव्यमासीद्यत्प्रथमं समन्वयदृष्टिपरः कश्चिदेको ग्रन्थो विरचितः स्याद् येन सर्वेषु सम्प्रदायेष्वध्यात्ममूलमैक्यं सद्भावश्च सम्पद्येत। यो ग्रन्थो मतवैभिन्नतयोत्पन्नानामनपेक्षितविवादानां परिहारं कर्तुमर्हति। लोकसंग्रहपरा महात्मनोऽपि ज्ञानात्मकं मार्गदर्शनमाप्नुयुः। समुचिते सन्दर्भे मूलभारतीयवैदिकदर्शनस्य तत्त्वं सर्वसमक्षं प्रस्तुवन्तु। अस्मिन् विषये सम्भावितान् सर्वान् पक्षान् विकल्प्य गभीरं मन्थनं सुगहनो विमर्शश्चाभवत् स्वामिवर्येण सह। इदमन्ततो विनिश्चितं यत्प्रस्थानत्रयीमधिकृत्य विशदभाष्यरूपं स्वोपज्ञचिन्तनपरमेकं पुस्तकं वेदान्तप्रतिनिधिभूतं लेखनीयं यस्मिन् सर्वसम्प्रदायसिद्धान्ततत्त्वं निष्कृष्टं विलसतु। साम्प्रतं स्वामिवर्यं विहाय न कश्चिदेतत्कर्तुं प्रभवतीति तथ्यमवितथं जानन्तः सर्वे स्वामिवर्यमेव प्रार्थितवन्तः। अल्पीयसैव कालेन योगविधिना स्वामिश्रीरामानन्दः तादृशं सर्वाभीष्टग्रन्थं विनिर्माय तस्य नाम- 'आनन्दभाष्यम्' इति प्रथितवन्तः। सर्वप्रथमं तं ग्रन्थमादितोऽन्तपर्यन्तं स्वपरमशिष्याय श्रीअनन्तानन्दायोपदिष्टवान्। तर्कवितर्कपुष्टस्य तस्य ग्रन्थस्य सरहस्यं तत्त्वं सोऽनन्तानन्दः सम्यग् गृहीतवान्। ब्रह्मसूत्रभाष्यप्रसङ्गे स्वामिवर्यो नैकेषां संशयानां निराकरणमेवमुक्त्वाऽकरोद्यत्सूत्रविवेचने मया महर्षेर्वेदव्यासस्य सर्वसमन्वयिनी रचनापद्धतिः प्रामुख्येन समाश्रिता।

यावदेवानन्दभाष्यं प्रकाशितं तावदेव न केवलं वैष्णवसम्प्रदायेषु, अपितु शैवेषु शाक्तेषु च महान् विकम्पः प्रादुरासीत्। प्रारब्धाः खलु तर्क-वितर्काः। ग्रहणस्य पुण्यकाले गङ्गास्नानार्थं समागतानां सर्वसम्प्रदायाचार्याणां महती धर्मसभा समायोजिता।

'आनन्दभाष्यस्य' सिद्धान्तपक्षमधिकृत्य सर्वे स्वं-स्वं पक्षं प्रस्तुवन्ति स्म। आनन्दभाष्यमतवादिनो विशिष्टाद्वैतिनस्तेषां संशयान्, भ्रमानाऽऽक्षेपांश्चाऽनुद्विग्नतया निराकुर्वन्ति स्म। उत्तरेष्वपि वैदुष्यं स्पष्टमेवासीत्। किन्तु 'स्वार्थसिद्धौ हि ये मग्नास्तेषां साम्मत्यं कुतः?' इति दिशा कोऽङ्गीकरोतु, कः शृणोतु? उपेक्षणीयोऽपि विषयो वितण्डां जनयति स्म। समाजे कथं समरसता स्यात्? मतानां कथं समन्वयो भवेत्? सङ्घटिता शक्तिः कथं मिलित्वा समुत्थातुम्? इत्येतेषु प्रश्नेषु न कस्यचिद्विचारावकाशः। 'ममैव मतमुत्कृष्टं ममैवोत्कृष्टमि'ति सर्वे स्वैरं रागमालापयन्ति स्म। मतवैभिन्नोत्थां दुर्बलतां देशस्यापि च बाह्यसैन्यराजनीतिकधार्मिकाक्रमणैरुत्पन्नां भयावहां स्थितिं वेत्तुमपि न कश्चित्प्रस्तुत आसीत्, शान्तचित्तेन चिन्तनस्य तु कथैव का? को जानाति स्म यद्विधर्मिणां धर्मान्धतासमक्षं भारतस्य धर्मस्वातन्त्र्यस्य लोकतान्त्रिकं मूल्यं दुर्बलं पराभूतं च, सिद्धाः स्वयं समस्यारूपा भविष्यन्ति। भारतं न केवलं स्वीयं स्वातन्त्र्यं विलोपयिष्यत्यपि तु स्वकं समाप्तप्रायमपि करिष्यति। इदं तथ्यं स्वीकर्तुं न कोऽप्युद्यत आसीद्यत् सर्वैरवतारैः, सिद्धैश्चिन्तकैश्चोपदिष्टं तत्त्वज्ञानमेकमेव, नानात्वं तत्र नास्ति। सभायां नैकशोऽशोभनीयानि दृश्यान्यप्यवलोकितानि। रक्तपातोप्यासन्न आसीत्। केचन विवेकशीलाः साधवः निर्दिष्टवन्तो- "ग्रन्थप्रणेता तत्त्वज्ञो महात्मा काश्यामेव विराजते। कथं न तमुपसृत्य विवादास्पदानां प्रश्नानां समाधानं क्रियते?" अथ सर्वे सहमता अभवन्। तेऽपि समे सम्प्रदायाचार्याः स्वामिवर्यस्य प्रत्यक्षं दर्शनं कर्तुं सोत्कण्ठा आसन्। अतः सर्वे श्रीमठं प्रति प्रस्थिताः।

'एवमेव भवितव्यमि'ति स्वामिवर्योऽन्तर्यामिपुरुषः प्रागेव जानाति स्म। यदा सम्प्रदायाचार्याणां श्रीमठगमनवार्ता तत्र प्राप्ता, स्वामिवर्यः तेषामुचितातिथ्याय समादिष्टवान्। गुहाद्वार एव सर्वं समायोजितम्। यावद् धर्माचार्यास्तत्र सम्प्राप्ताः गुहाद्वारस्था तिरस्करिणी अपावृता। सम्पन्ने सत्यातिथ्ये शिष्टाचारे च, स्वामिवर्यः तदानन्दभाष्यमधिकृत्य समेषां तत्रभवतामाचार्याणां सम्प्रदायप्रमुखानामापत्तिं विरोधतर्कांश्च मनोयोगेन सधैर्यं निशम्य प्रस्तुतानां मतानां पृथक्-पृथक् व्याख्यां विधाय तेषाञ्चान्तरं स्पष्टं निर्दिश्य, वैमत्यं प्रदर्श्य, स्फीतवाण्या पूरयन्निवाऽऽशामण्डलं सधीरमुवाच- "अभिनन्दामि प्रज्ञाप्रद्योतितं सम्प्रदायाचार्यमण्डलम्। आनन्दभाष्ये मया न किमपि स्वोपज्ञमभीप्सितं कृतं, सर्वं खलु यथाशास्त्रमेव प्रतिपादितम्। तत्र मया स एव सर्वमान्यः सिद्धान्तः प्रस्तुतो यं पूर्वमेव महर्षिर्वेदव्यासः प्रतिपादितवान्।" स्वामिवर्यस्येदं कथनमाक्षिप्यैको महापण्डितः तरस्वी तरक्षुत्वरया तर्जयन् तर्कयति स्म- "आनन्दभाष्यगतं भवत्प्रतिपादितं मतं महर्षिव्यासस्यैव मतमिति कथमिदं मन्येत

प्रमाणाभावात्?" अथ स प्रसन्नात्मा तपोधनो रामस्यैवापरोऽवतारः श्रीमद्रामानन्दो ध्यायं ध्यायं तं बादरायणं कृष्णद्वैपायनं महर्षिं व्यासं स्मृतवान्। तत्क्षणमेव सर्वेषां प्रज्ञां पुलकयन्निव, हृदयानि प्रविशन्निव, जीवात्मानं स्पृशन्निव, नेत्रेषु चमत्कृतिमानयन्निव, कर्णान् सुधारसैस्तर्पयन्निव, परमं विश्वासं जनयन्निव, शिरांसि श्रद्धयाऽऽनमयन्निव, दिङ्मण्डलं स्निग्धरवेण पूरयन्निव, दिव्यानुभावं द्योतयन्निव, सरस्वत्याः वल्लकीं निनादयन्निव, प्रसुप्तान् संस्कारान् प्रबोधयन्निव, धर्मतत्त्वं परामृशन्निव महर्षेर्व्याससस्य स्वभावगम्भीरो मधुरः स्वरः कर्णगोचरतां गतः- "सत्यमवितथं वदति रामानन्दः। अनेन यदाऽऽनन्दभाष्यं निर्मितं तस्मिन् ममाभिमतसिद्धान्तस्यैव प्रतिपादनं कृतम्। तत्र न क्वचित्कस्यापि मतस्य खण्डनम्। भाष्यकरणे तस्य समन्वयपरा दृष्टिः प्रशंसनीया। युगानुरूपं कालाऽपेक्षितं खलु तद्भाष्यम्। समस्तान् विवादानपहाय, सम्प्रदायभेदान् विस्मृत्य, वर्तमानपरिस्थितिसन्दर्भे यदा भवद्भिर्निष्पक्षतयाऽऽनन्द-भाष्यमालोचितं स्यात् तदाऽस्य याथार्थ्ये सन्देहलेशोऽपि न भविष्यति।" अतःपरं सा वाणी मौनमभजत्। तां दिव्यां वाणीमुपश्रुत्य सर्वे सम्प्रदायाचार्या विबुधा धर्माध्यक्षाः समाश्वस्ताः, आनन्दभाष्यं महर्षिव्यासप्रमाणितमिति मन्वानाः स्वामिवर्यस्य जयघोषं चक्रुः।

स्वामिवर्याणां चरणावुपस्पृश्य ते ततः प्रतिनिवृत्ताः। अनया घटनया सर्वाधिकं श्रीमठस्य नवोदिताः शिष्याः प्रभाविता अभवन्। ते आचार्यस्यानन्तानन्दस्य सान्निध्ये महता मनोयोगेन विशदया च प्रज्ञया तदानन्दभाष्यमध्येतुमारेभिरे। आचार्योऽनन्तानन्दोऽपि गूढस्थलानि विविच्य तान् बोधयामास।

आनन्दभाष्यप्रतिपादितमतवादस्य विरोधः काश्यां तूपशमितः किन्तु देशस्याखिलस्य विभिन्नभागेषु कृतावस्थानेषु पाशुपत-लिङ्गायत-वीरशैवेषु स विरोध आक्रामकरूपं गृह्णाति स्म। एषु कामरूपवर्तिनः कुलाचारिणः चामुण्डा-कपाली-भैरवी-वामाचारिणोऽभिचारिणः तामसाराधकाश्च प्रमुखा आसन्। रोषावेशविवशास्ते समूहबद्धा भूत्वा काश्यामेत्य समवेताः। मदिरामत्तभैरवीभिः ते उग्रतया श्रीमठमाजग्मुः। तेषां कर्कशरवोपबृंहितैः कोलाहलैः श्रीमठ आक्रान्तः। अनेनोद्विग्नः स्वामिवर्यः गुहाद्वारस्थां तिरस्करिणीमपसार्य यावद्बहिरायाति तावदेव सर्वा भैरव्यः प्रस्तरमय्यो निश्चेष्टाः सञ्जाताः। मठस्थाः सर्वे साधकाः साधवः, शिष्या ब्रह्मचारिणः सेवकाः प्रतिवेशिनश्च धावमानाः समागताः। सर्वान् वामचारिणः सतर्जनं तिरस्कृत्याऽर्धचन्द्रं दत्त्वा मठाद् बहिष्कृतवन्तः। शिष्यास्तु तान् पाषाणमयान् भैरवीजनान् तेषामेव वामाचारिणां कपालेषु प्रक्षिप्तवन्तः। व्यग्रा भीताकुलितास्ते सर्वे तत उत्प्लुत्य विनष्टाः। पलायितेषु तेषु,

स्वामिवर्यस्य निदेशतः स आचार्योऽनन्तानन्दोऽशेषमपि मठस्थलं पावनगङ्गाजलेन प्रक्षाल्य पवित्रं कारयामास। ततः सर्वे शान्तमनास्तस्थुः। स्वामिश्रीरामानन्दस्तु समन्वयवृत्तिपर आसीत्। न तेन कश्चिद् यौगिकप्रतीकारः कृतः। आनन्दभाष्यं नास्ति किमपि विरोधस्य कारणम्। कियत्क्षणं पश्चात् स स्वस्थस्थितान् साधकान् शिष्यांश्च सम्बोधयामास "दक्षिणापथेऽतीतकालदेव शैववैष्णवयोः संघर्षः प्रचलति। शैवाः सन्ति समस्तेऽपि भारते व्याप्ताः। शैवानां संख्या वर्ततेऽतिभूयसी। त्रस्ता वैष्णवाः पलायिता उत्तरभारतं संश्रिताः। ते मौनाः वैष्णवीं साधनां कुर्वन्ति। उत्तरभारतेऽपि वामाचारः कुचेष्टातो न विरमति। अद्यापि वामाचारिणो मदमत्ताः सन्ति। नास्त्येवैषु देवस्य धर्मस्य वा काचिच्चिन्ता। यत्र सामरस्यमपेक्ष्यते तत्रैते द्वेषबीजवपनं कुर्वन्ति। यत्रैक्यमपेक्ष्यते तत्र विभाजनस्य नाटकं रूपयन्ति। निवेदयिष्ये कालभैरवं स एवैतान् साधयिष्यति।"

'आनन्दभाष्ये' विरोधहेतुभूतं किमप्यसामान्यं नास्ति। स्वामिनो रामानन्दस्य वर्धमानलोकप्रियतोत्थाया ईर्ष्याया एव परिणामो यद्दक्षिणभारतीया वैष्णवसम्प्रदाया अपि विरुद्धमुदग्रा बभूवुः। आनन्दभाष्यस्य काश्चित् स्थापनाः दृष्ट्वैको वेदान्ताचारी एतावानुग्रः सञ्जातो यत्सोऽमर्षरक्तः श्रीमठमाजगाम। दिवसत्रयपर्यन्तं स्वामिवर्यः कामतो ज्ञातायाऽपि तस्मै दर्शनं नैव ददौ। स्वामिवर्यस्य मनसि खेद आसीद् यद् यो जनः स्वोपज्ञया प्रखरमेधया उपनिषदो मथितवान् स आनन्दभाष्यस्य विरोधकारणादत्रागतः। चतुर्थेऽहनि यदा स वेदान्ताचारी सामवेदस्य सस्वरं मधुरं गानं कुर्वन्नासीत्तच्छ्रुत्वा तं प्रति स्वामिनोऽन्तःकरणे दयाऽऽविवेश। सर्वविदिता खलु क्षमाशीलता स्वामिवर्यस्य। स तिरस्करिणीमपवार्य गुहातो बहिरागतः। सादरं तं वेदान्ताचारिणमाहूय स्वसमीपे एकस्मिन्नासने प्रीतिपूर्वकं निवेशयामास पप्रच्छ च तस्यागमनकारणम्। स वेदान्ताचारी स्वामिवर्यस्य दिव्यमनुभावमनुभूय प्रसन्नमनाः तस्यालौकिकविग्रहाकृतिं दर्शं-दर्शं मन्त्रमुग्ध इव दृश्यमुग्धो भूत्वा कृतार्थतां गतः। मन्त्रप्रभावाद्विनीतव्याल इव विगतरोषः स वराकः पीयूषपानाभिलाषी सातिशयं विनयं शिष्टाचारं च प्रदर्शयन् प्रियमधुरस्वरेण स्वामिवर्यमभिनन्द्याऽपृच्छत्- "महात्मन्! 'तत्सृष्ट्वा तदेवानुप्राविशत्। सच्च त्यच्चाभवदि' ति श्रुतिवचनं विचारयतो मे बुद्धिः कुण्ठिता भवति, न च किंचिदवबुध्यते। तद्रहस्योन्मीलनेनाऽनुगृह्णन्तु। एवमेव, तत्र शरीरस्याऽशरीरिणश्च यल्लक्षणं कृतं विद्यते तदपि मम बुद्धेरविषयः। भवान् तत्त्वज्ञोऽथ च ऋषिकल्पः, अस्य समाधानं कर्तुं भवानेव समर्थः। इममेवाभिप्रायं मनसि कृत्वा भवत्सेवायामुपस्थितोऽस्मि। प्रसीदतु भवानुपकर्तुमि"ति।

तस्याभ्यर्थितं निशम्य स्वामिवर्यः प्रोवाच- "तया बुद्ध्येदं नावगम्यते या विपक्षासद्दूषणैर्दूषिता। प्रथमं तु सा दूषिता बुद्धिरपाक्रियते। भवान् स्वमतिमोहं विसृज्य राम-रामेति जपन्मयि रमताम्। दूषितांशपृथक्करणादेवाऽवशिष्टं रक्षितुं शक्यते।" एवं निगदता स्वामिवर्येण निजः शङ्खो ध्मातः। शङ्खध्वनिश्रवणमात्रेण वेदान्ताचारी बुद्धिदूषणं क्षालयद्भिरिवानन्दाश्रुजलैश्चक्षुनिर्गतैः क्लिन्नवदनकपोलो बभूव। स आनन्दरसनिमग्न आत्मानमपि विस्मार्य धरायां लुठति स्म। मुखादजस्रं 'राम-रामे'ति शब्दसरणिः स्फुरति स्म। स वेदान्ताचारी अस्यामेवात्ममुग्धदशायां समाधिं गतः। पर्याप्तकालपर्यन्तं स्वामिवर्यस्तं तथैव विनियोजयामास समाधिना। ततश्च पवित्रजलसीकरैस्तन्मुखं क्लेदयामास। शुद्धबुद्धो वेदान्ताचारी चक्षुरुन्मील्य समुत्थाय तस्थौ। स्वामिवर्यं सकरुणं दृष्ट्वोवाच- "श्रुतेः क्रियात्मकं तत्त्वार्थो भवताऽकथितमेव शब्दार्थसंयोगं विनैव बोधितः।" एवं विनिवेदयन् स स्वामिवर्यस्य चरणौ जग्राह। स्वामिवर्यः तस्य करौ स्वकरयोरादाय तं पुनरपि बोधयामास- "त्रिगुणात्मकप्रकृतिनिरपेक्षं तद्ब्रह्म सर्वथा निर्गुणम्। सगुणत्वं तु भक्तैर्विनिर्मितम्। तस्येदं सगुणत्वमेव स्वनिर्गुणत्वं तत्परञ्चात्मनोऽचिन्त्य-स्वरूपरहस्यमाख्याति वेदयति वा भक्तान्। एते जीवात्मा, प्रज्ञात्मा, परमात्मा चेति त्रयः, तस्यैव निर्गुणस्य ब्रह्मणस्त्रीणि रूपानि सन्ति। चिदाभासो जीवात्मा, चिन्मयः प्रज्ञात्मा चिदानन्दश्च परमात्मा। अभिन्नौ खलु प्रज्ञात्मपरमात्मानौ। प्रतिदिनं सुषुप्तौ भिन्नमनयोर्द्वयोः। एतद्रहस्यं न कोऽपि विजानाति। यस्यां शक्तौ सद्भावः प्रकाशते सा 'क्रियासन्धिनी' त्युच्यते। यया स सद्भावः प्रकाशते, सा 'ज्ञानशक्तिसंविदि'त्युच्यते। अथ च, यस्यामानन्दभावः प्रकाशते सा इच्छाशक्ति'राह्लादिनी'त्युच्यते। विशुद्धमनसा परमार्थसाधनेच्छयैव वेदान्ताध्ययनं कुर्यात्। न्यायस्यांशं विहाय, वेदान्तस्य तत्त्वचिन्तनमननाभ्यां ज्ञानोपलब्धिरिति।" इदं विशदं तत्त्वविश्लेषणं निशम्य स वेदान्ताचारी आप्तकाम इव भावगद्गदोऽभवत्। श्रीमद्रामानन्दाचार्यस्य चरणावुपस्पृश्य निवेदयामास- "स्वामिन्! यत्र ब्रह्म विश्वानुगविश्वातिगयोः परं पारं भासते, तां स्थितिमनुभवामीति साधय माम्।" वेदान्ताचारिणो मुखादिदमुपश्रुत्य यावदुदारमनाः स्वामिवर्यस्तं जलेनाभिषिच्य शङ्खं वादयति तावदेव पुनरपि सद्य एव स आसने उपविष्ट एव समाधिदशां प्राप्तवान्। तत्र देवैर्मुनिभिश्च स संविदाकारस्य परमात्मनो दर्शनं लब्धम्। तद्दिव्यं दृश्यं लोचनगोचरीकृत्वा तस्य संशयात्मकं भौतिकं मनः स्वरूपावस्थितं भूत्वा प्रलुप्तम्। उपरते सति समाधौ स वेदान्ताचारी आनन्दमग्नः सन्नश्रुजलैः स्वामिवर्यस्य चरणौ प्रक्षालति स्म।

'आनन्दभाष्यं' विनिर्माय स्वामिश्रीमद्रामानन्द 'ईशतत्त्वविश्लेषणविशेषज्ञ'

इति प्रथितः। नानाधर्मसम्प्रदायालम्बिनो विद्वांसो जटिलप्रश्नानां समाधानाय स्वामिवर्यं सेवन्ते स्म। परमहंस एकोऽद्वैतवादी अपरश्चैको जैनमुनिः एतौ द्वावपि परमतत्त्वस्वरूपविश्लेषणे नवमासपर्यन्तं क्लिष्टव्यापृतौ आस्ताम्। द्वावपि कमप्यैकान्तनिर्णयं न गतौ। स्वामिनो रामानन्दस्य ज्ञानविज्ञानविभूतिवैभववैजयन्तीमालक्ष्य तौ द्वावपि प्रश्नगतविषयविशयं निराकर्तुं समाधानञ्चावाप्तुं तस्य दर्शनलाभाय गतवन्तौ। न किमप्यविज्ञातं नाम स्वामिवर्याय। स तु त्रिकालज्ञोऽन्तर्यामी। प्रविष्टे सति श्रीमठे, आचार्योऽनन्तानन्दो यावद्‌द्वावपि गुहासमक्षे काष्ठासन उपवेशयामास तावदेव स वेदान्ती अणुत्वतो विभुत्वं जैनमुनिश्च जीवत्वतो जिनत्वं समनुभूतवान्। तयोरन्तःकरणेषु स्फुरमाणाऽशान्तिरुद्वेजकाश्च संशयमयाः प्रश्नाः स्वत एव प्रशान्ताः। गुहाद्वारेऽनावृते सति, द्वावपि काष्ठासनं विमुच्य गुहादेहल्यां शिरःसन्धानमकुरुताम्। स्वामिवर्योऽवोचत्- "जीवन्मुक्तानां विदेहानाञ्च तिरोधाने तेषामुपाधिरहितं जीवं 'ब्रह्म' इति मन्यन्ते वेदान्तिनः। अथ च, मानवलीलोपरतः सिद्धपुरुष एव 'ईश्वरः' इति मन्यन्ते जिनाचार्याः। अनयोः कुत्र भेदः? तर्कस्तु गौतमीविद्योत्थितः। विवादैरलम्। तत्तु तितिक्षूणां कल्याणाय न प्रभवति। सिद्धावस्थायां जैनमुनयः साक्षात्कुर्वन्ति जीवाऽजीवादिनवतत्त्वानि, परमहंसा वेदान्तिनो सर्वत्र तदेवैकतत्त्वं पश्यन्ति। जैनाः कर्मपुद्‌गलेभ्यः परमहंसाश्च मायिकभ्रमजालेभ्यो मुक्ताः भवन्ति। पारिभाषिकशब्दभेदानाश्रित्य विदुषां विवादाः न शोभन्ते। आकाशो जीवः कर्म परमाणुश्च अचिदिति जैनसिद्धान्तेन सह वेदान्तपराऽऽध्यात्मिकी सङ्गतिः स्वत एव सम्मिलिति। इदं तथ्यं सम्यगवबुद्ध्यैव जैनमुनिभिः परमहंसैश्च प्रवर्तितव्यम्। अहिंसा हि नारायणस्य विशुद्धं स्वरूपम्।"

इदमेकात्मकं समाधानं स्वामिवर्यस्य मुखाद् विस्पष्टमुपश्रुत्य तौ द्वावपि परमं सन्तुष्टिं जग्मतुः। प्रशान्तमनसा स्वामिवर्यं सादरं सश्रद्धमभिवाद्य परमप्रीतौ ततो निर्जग्मतुः। स्वामिवर्यकृतैरेभिः समन्वयपरैः समाधानैः समाजिकैक्यस्याधारो न केवलं सुदृढतरो बभूवाऽपितु तत्र पारदर्शित्वमपि समानीतम्। धर्मयात्रायै प्रस्थानात्पूर्वं, समाजस्य धर्मस्य च संरक्षणाय तेनोपस्थापितैरेतादृशैर्दृष्टान्तैः लोकश्रद्धा भृशं समाहूता।

कदाचिदैकदा निम्बार्कसम्प्रादायस्यैको भजनानन्दी महात्मा तीर्थयात्राक्रमे काशीमुपागतः। रात्रौ तस्मिन् शयिते सति, स्वप्ने तस्य गुरुः दर्शनं दत्त्वोवाच- "त्वमिदानीं काश्यां पदं करोषि। तत्र भगवतो रामस्यापररूपः श्रीमद्रामानन्दो नाम प्रवरो महात्मा श्रीमठे निवसति। यदि तस्य दर्शनं त्वया न कृतं तर्हि लोचनाभ्यां वञ्चितोऽसि, अकृतपुण्योऽसि अपि च काशीयात्रा निष्फलेति नास्मिन् सन्देहलेशः। स दिव्यपुरुषस्त्वया निवेदितः त्वां ब्रह्मणः साक्षाद्दर्शनं कारयिष्यति। तव साधुजीवनं

सार्थकं भविष्यति।" गुरोरादेशं प्राप्य स महात्मा दुर्लभनिद्रः सञ्जातः। अवशिष्टायाः रात्रेः क्षणमपि तस्मै युगमिव प्रतिभाति स्म। पार्श्वविवर्तनैस्तस्य रात्रिर्व्यरंसीत्। विभातायां रजन्यां स प्रातःकालिकं नित्यकर्म निर्वाह्य स्वामिदर्शनोत्कण्ठः श्रीमठं त्वरितपदो ययौ। तस्य गुरुस्तु प्रागेवेमं सन्देशं स्वामिवर्यस्य सेवायामान्तरसंवेदनरीत्या प्राहिणोति स्म। यदाऽयं महात्मा श्रीमठे प्रविष्टः तत्क्षणमेव गुहाद्वारमपावृतम्। स्वामिवर्यो बहिरागत्याऽस्मै दर्शनं ददौ। स्वामिवर्यस्य दिव्यदर्शनमात्रेणैव स निम्बार्कसाधुः स्वरूपावस्थितिं गतः। तत्र ब्रह्मपीठे स्वामिनं श्रीरामानन्दमासीनं दृष्ट्वाऽसीमानन्दमनुभूतवान्। गुरुणा प्रेरितः स महात्मा स्वकीयं शिरः स्वामिवर्यस्य साक्षाद्ब्रह्मविग्रहस्य चरणयोः न्यस्तवान्। तदनन्तरमेवात्मविस्मृतः स स्वामिवर्यं वृन्दावनवीथीसु गोपिभिः सह रासरसविह्वलमपश्यत्। वरवेणुमधुरस्वराः लताकुञ्जमप्याह्लादयन्तः कर्णेषु मधुधारां वमन्ति स्म। अलौकिकमिदं दृश्यं दर्शं-दर्शं निम्बार्कसाधुः हर्षनिर्भरः पुलकितशरीर आनन्दसुधासागरे निमग्नः। तदानीमेव स्वामिवर्यस्तस्य हस्तं विधृत्य महारासे एनमपि मेलयामास। तत्र स्वामिवर्यं कृष्णरूपं निभाल्य 'अभेदो खलु रामकृष्णावि'त्यनुभूतवान्। महारासरसनिमग्नो निम्बार्कसाधुस्तत्राध्यात्मरसस्यामृतपानपरो बभूव।

एतस्मिन्नेवान्तरे गुहाद्वारावरणं यथापूर्वमभूत्। ततश्च निम्बार्कसाधुः स्वकीयां पूर्वस्थितिं प्राप्तवान्। गुहान्तराद् प्रश्नोऽश्रूयत्- "महात्मन्! यद्भवद्गुरुभिरुक्तं तद्भवता प्राप्तं न वा? अपि किञ्चिदन्यदीप्सितं तदावेदय।"

निम्बार्कमहात्मनो नेत्राभ्यां प्रेमाश्रुप्रवाह आरब्धः। "साक्षाद् ब्रह्मैव भवान्। भवतो दिव्यदर्शनालोकतो ममाशेषं महामोहतमो विगलितम्। सार्थकं ममेदं जीवनं धन्यतां गतम्।" एतन्निगदन् स स्वकीयं मस्तकं गुहादेहल्यां स्थापितवान् प्रोवाच च-

"गुरुगोविन्दयोर्न कश्चिद्भेद इत्यद्य मेऽवितथा प्रतीतिः। भवता यस्माध्यात्मामृत-धारायां निमज्जितोऽस्मि तस्यां कियत्कालपर्यन्तं निमज्जितुमत्रावस्थातुमीहे। स्वीकृत्या मामनुगृहणन्तु।"

"नास्त्यत्र काचिद् बाधा। श्रीमठस्य तु प्रायोजनमेवेदम्। भगवद्भक्तानां कृते नित्यमुन्मुक्तानि द्वाराणि। यथेच्छकालपर्यन्तं निवसत्वत्र भवान्। सेव्यतां सत्सङ्गसभाम्।" स महात्मा त्वात्मविस्मृत इव, स्वामिवर्यवचनविमुग्ध इव, श्रीमठवियोगभीत इव, दिव्यदर्शनालोकप्रीत इव, कथं-कथमपि गुहाद्वारदेशात् स्वमस्तकमपाकृत्वा समुत्तस्थौ। श्रीमद्गुरोः स्वामिवर्यस्य सङ्केतमवबुद्ध्याऽऽचार्य-अनन्तानन्दो निम्बार्कमहात्मनो

वासाय समुचितेष्टव्यवस्थां कृतवान्।

भारतं सुदृढामादर्शाध्यात्मिकशक्तिं विधातुं स्वामिवर्यः श्रीमद्रामानन्दः कृतसङ्कल्प आसीत्। अद्वैतवेदान्तिनः परस्परं विवदमानाः स्वशक्तिं विलोपयन्तु, देशञ्च दुर्बलतां नयन्त्विति स्वामिवर्यो नेच्छति स्म। सत्यं सर्वथाऽद्वितीयं किन्तु तद्विषयीकृत्वा परस्परं द्वेषो जायेत, पक्षप्रतिपक्षस्य नैके वर्गाः समुद्भवन्तु, तेषु विभागकलहो भवेदिति नैव स्वीकार्यमासीत् स्वामिवर्येण। 'ब्रह्म सत्यं, जगन्मिथ्या' इति भगवत्पादानामादिशङ्कराचार्याणामद्वैतप्रातिपादकघोष-वाक्यमभिलक्ष्य पञ्चसु वैष्णवसम्प्रदायेषु सुघोरं द्वन्द्वं प्रादुरासीत्। कस्यचिदपि मनःशान्तिर्नासीत्। शैवमतावलम्बिभिः सहैतेषां संघर्षस्तु पुराकालादेव प्रचलति स्म। दक्षिणापथे सबलाः खलु शैवाः। अतोऽद्वैतवेदान्तमतावलम्बिनः पलायमानाः उत्तरां दिशमाश्रयन्ते स्म। उत्तरापथेऽपि शैवा यद्यपि दृढमूला आसन् किन्तु ते न अनुदाराः।

स्वामिनः श्रीमद्रामानन्दस्य या समन्वयवादिनी सम्प्रदायप्रवृत्तिः चन्दनलतेव गिरिशिखरमारोहति स्म, तस्याः कीर्तिसुगन्धिः मलयजपवनाधिरूढा समग्रं भारतं सुगन्धिभरं कृत्वा दाक्षिणापथमपि व्याप्नोति स्म। इयमेव दिव्या सुगन्धिः दाक्षिणदेशवर्तिनां पञ्चानामपि वैष्णवसम्प्रदायानां धुरन्धराणां मानसे गहनं प्राविशत्। ते तर्कवितर्कमये भीषणे झञ्झावाते परिभ्रष्टाः सन्तः सत्यताश्रेष्ठतौदात्याऽहङ्कारगता जीवन्ति स्म। न कोऽप्यवनमितुं प्रस्तुत आसीत्। दक्षिणभारते सुविख्यातवैदिकविद्वान् वेदान्तप्रचारकश्चासीत्तदानीं श्रीभाऊजीशास्त्री, स स्वामिनः श्रीरामानन्दस्य दिव्यज्ञानयशोऽभिभूतस्तान् पञ्चवैष्णवसम्प्रदायाधिकारिण आहूय बोधयामास- "एतत् सर्वविदितमेव यत्काश्यां निवसति साम्प्रतं सर्वमान्यो विद्वान्, धर्मज्ञस्तत्त्ववेत्ता चालौकिको महापुरुषः स्वामिश्रीमद्रामनन्दाचार्यः। कथं न वयं तत्रैव गत्वा, तं विनिवेद्य विवादितप्रश्नानां समाधानं भ्रान्तीनाञ्च निराकरणं प्राप्नुयामः।" 'वेदान्तसिद्धान्तस्य लोकव्याप्तौ महापण्डितानामेष मिथ्याविवाद एव महती बाधे'ति मन्यते स्म श्रीभाऊशास्त्री। अनेन तस्य मनसि महती चिन्ताऽऽसीत्। सर्वे सम्प्रदायाचार्या तस्य प्रस्तावे ऐकमत्यं दर्शितवन्तः। स अद्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-द्वैताद्वैत-द्वैतसिद्धान्तवादिनामेकैकं मान्यमाचार्यमात्मसंस्थं कृत्वा द्विगुणषट्चरणैः काशीं प्रति प्रस्थितवान्। तेषु ते पञ्चाचार्याः परस्परं प्रतिद्वन्द्विनः। 'समीचीनो मम सिद्धान्तो नापरस्ये'ति तेषामाग्रहः। किन्तु श्रीमठमुपगम्य ते विवादस्य स्थायिनं समाधानं कामयन्ते स्म।

श्रीभाऊशास्त्रिणा सह यदैते पञ्चसम्प्रदायधौरेया श्रीमठं गतवन्तस्तदा स्वामिवर्यो गुहायां सान्ध्यकालिके नित्योपासनाध्यानेऽभिरत आसीत्। अतस्ते सर्वे गुहासमक्षं

स्थापितेषु काष्ठासनेषूपविश्य प्रतीक्षमाणास्तस्थुः। आचार्योऽनन्तानन्दस्तेषामभ्यागतानां महानुभावानां समुचितमातिथ्यं चकार। उपरते सति ध्यानक्रियायोगे, अपाकृते गुहाद्वारावरणे, गुहातस्तादृशः प्रकाशपुञ्जो विनिर्ययौ येन चक्षुस्तेजो निमीलितं प्रपीडितञ्च। अथागतायां सामान्यस्थितौ, श्रीभाऊशास्त्री आगमनप्रयोजनं निवेदयामास। अथ च, तेषां पञ्चानामात्मनश्चाभिख्यया सह तद्विवादवृत्तं विज्ञापयामास- "महात्मन्! सम्प्रति दक्षिणभारते सर्वेषु वैष्णवसम्प्रदायेषु परस्परमैक्यस्य महती आवश्यकता। वेदान्तस्य सहजबोधोऽभिप्रायः समाजे प्रचरतु प्रसरतु इति कालस्याह्वानम्। किन्त्वेते कालानुरोधमुपेक्ष्य परस्परं विवदन्ते। शास्त्रे व्यवहारे च ये मतभेदाः विवादास्तेषां निराकरणं नितान्तमावश्यकम्। विवादाः सौहार्देन शमं यान्तु। एतस्मिन् विषये भवतो वचनं ग्रहीतुं वयमागताः। निर्देशेनाऽनुगृह्णातु सर्वानस्मान्" इति। स्वामिश्रीरामानन्दः सधीरमुवाच- "नायं सैद्धान्तिकः पारमार्थिको वा विवादः। केवलं पारिभाषिकशब्दाश्रितो विवादः। विवादमूले खलु त एकादशभाष्यकाराः, ये स्वां स्वां दृष्टिमवलम्ब्यैकस्य ब्रह्मसूत्रस्य व्याख्यानं कृतवन्तः। अनेन तेषां पाण्डित्यं तु प्रकाशितं किन्त्वनेन धर्मस्य, राष्ट्रस्य, समाजस्य च कियती हानिरजायतेति ते नावगच्छन्ति। अद्वैतवेदान्तो नाम भारतीयतत्त्वविदां मनीषिणां प्रज्ञापितं तद्दुर्लभं ज्ञानं यद्विषये 'नेति नेति' प्रवदन्ति परवर्तिनो मनीषिणः। तद्ज्ञानं स्वीकुर्वन्तोऽपि वयमन्यथाऽस्वीकुर्म एव। भवन्तः सर्वे संस्कृतविशारदाः धर्मधुरीणाश्च। न केवलं ब्रह्मसूत्रेणाऽपितूपनिषद्भिः श्रीमद्भगवद्गीतया चोपदिष्टं तत्त्वज्ञानं भवद्भिर्नाऽविज्ञातम्। भवद्भिरेते खल्वात्मसात्कृताः। एते त्रयोऽपि अद्वैतवेदान्तस्याधारभूताः। पुस्तकं समक्षं, ज्ञानमप्यपरोक्षम्। अस्माकं विवादस्तु केवलमर्थात्मक एव। यद्यस्मि वच्मि, भवन्तो नैव स्वीकरिष्यन्ति। यतोऽहमपि भवतामेकः। अतस्तानैकादशभाष्यकारान् सादरमामन्त्र्य भवतां समक्षमुपस्थापयामि। प्रामाण्यं विधातुं ब्रह्मसूत्रप्रणेतारं भगवन्तं महर्षिं बादरायणमपि सप्रश्रयमाह्वयामि। अनेन नीर-क्षीर-विवेकस्तु निश्चप्रचम्" इति।

स्वामिवर्यस्य श्रीमद्रामानदस्य ध्यानस्थचित्तेन स्मरणमात्रेण स महर्षिः बादरायणः तैरेकादशभाष्यकारैः सह तत्क्षणमेवावतीर्णः समदृश्यत। यथोचितेष्वासनेषु समासीनानां तेषां दिव्यात्मनां परिचयः क्रमशः स्वामिनः श्रीमुखादेवमासीत्- "ब्रह्मसूत्रस्य प्रणेता महर्षिः बादरायणोऽयं मध्ये विराजते। तस्य दक्षिणवर्ती भवति शारीरिकभाष्यकर्ताऽऽचार्यशङ्करः। न्यासस्याग्रे तिष्ठति तस्यात्मजः शुकदेवो वेदान्तसारमीमांसाभाष्यकारः। विशिष्टाद्वैतमूलकस्य ब्रह्मसूत्रभाष्यस्य कर्ता विज्ञानभिक्षुस्तस्य वामभागे शोभते। द्वितीयपङ्क्तौ प्रथमस्तिष्ठति विशिष्टाद्वैतपरो

ब्रह्ममीमांसाभाष्यकारः शिवभक्त आचार्यः श्रीकण्ठः। ततः परमयं श्रीलक्ष्मणाचार्यो येन विष्णुपरकविशिष्टाद्वैतप्रतिपादकं श्रीभाष्यं व्यधायि। श्रीशुकदेवमुपतिष्ठति द्वैतपरब्रह्मसूत्रभाष्यकर्ता श्रीभास्कराचार्यः। समीपं तस्य दृश्यते शिवपरकद्वैतसिद्धान्तदर्शकस्य श्रीकरभाष्यस्य प्रणेताऽऽचार्यः श्रीपतिः। विष्णुपरस्य द्वैतभाष्यस्य रचनाकारः श्रीमध्वाचार्यस्तस्य दक्षिणभागे विराजते। तत्रैव स शुद्धाद्वैतभाष्यकर्ता श्रीमद्विष्णुस्वामी। अपरः स निम्बार्काचार्यो द्वैताद्वैतसिद्धान्तोपेतवेदान्तपारिजातसौरभभाष्यमकरोत्। अग्निकुण्डस्यान्तिके तिष्ठति श्रीसायणः सूत्रभाष्यनिर्माता। अयं बौधायनर्षेः शिष्यः। अनेन कृतमिदं सूत्राभाष्यमद्वैत-विशिष्टाद्वैतयोर्मध्यवर्ति मन्यते। एते सर्वे भाष्यकृतो महानुभावाः परमसिद्धा दिव्यपुरुषा भवतां समक्षं विराजन्ते। सर्वेषां भाष्याणां मूलवस्तुनो ब्रह्मसूत्रस्य कर्ता भगवान् बादरायणोऽपि कृपयाऽत्र समुपस्थितः। एतान् विहाय भवतां विवादस्य स्वीकार्यं समाधानं प्रस्तोतुमन्यः कोऽर्हति? अहं महर्षिं वेदव्यासमेवानुरुणध्मि यत्स तन्महत्सत्यं संक्षेपतोऽत्र विशदयन्तु येन सा भेदपरा धारणा समाधानं यातु। अपि चाऽद्वैतवेदान्तस्य निष्कृष्टं दर्शनं स्पष्टतां प्राप्नोतु। भवतोऽनुग्रहादेवैषा समस्या निराकृतिं लप्स्यते। साम्प्रतिके परिप्रेक्ष्ये धार्मिकमैक्यं नितरामपेक्ष्यते। स्वकीयेन वचनामृतेनाऽऽप्यायतु सर्वान्" इति।

विरमिते स्वामिवर्ये, भगवान् बादरायणो विलोक्य सकरुणं सर्वान् नेत्रज्योतीरश्मिभिः तेषां पञ्चाऽऽचार्याणां चेतनाकपाटमुद्घाटयन्निव, श्वेतकेशकान्तिभिस्तेषामन्तःकरणानि विशदयन्निव, धवलदन्तद्युतिदुग्धधाराभिः सर्वान् स्नपयन्निव, कराङ्गुलिनखप्रभाज्योत्स्नांशुजालैः सर्वेषां मनःकालुष्यं प्रक्षालयन्निव, साक्षात्सरस्वतीवीणानिनादनिभेन मधुरस्वरेण सर्वेषां हृत्तन्त्रीं झणत्कुर्वन्निव प्रबोधयामास- "यावद्ध्येयसान्निध्यं नाऽवाप्यते तावदेव तर्कमीमांसे भ्रान्ते। अधिगते सति ध्येये सर्वमेव शब्दार्थजालं विस्पष्टं भवति। साधनाऽऽराधनयोः गुप्तप्रक्रियासु ध्येयनिश्चयनमेव सूक्ष्मतमम्। यथा, कस्मिंश्चित्पर्वणि समवेतो जनसमुदायो यावद्दूरं तिष्ठति, तावद् दृश्यं स्पष्टं न परिज्ञायते किन्तु यदा नैकट्यं भजते तावदस्पष्टता स्वत एव दूरी भवति। अतो भवन्तो व्यर्थमेव मा विवदन्ताम्। निरन्तरं गुरोर्निदेशानुसारेण ध्येयं प्रत्यग्रेसरन्तु। गुरुरेव ध्येयं प्रापयति। पूर्णनिष्ठया गुरूपदेशमनुवर्तन्ताम्। तत एव ध्येयं समवाप्य जीवनस्य यथार्थं सुखं लब्ध्वा परां शान्तिमधिगमिष्यन्ति। तत्परमानन्दोऽप्येवमेव लभ्यते" इति।

महर्षेर्बादरायणस्यानेन तत्त्वोपदेशेन तेषां पञ्चाचार्याणामानने महती सन्तुष्टिः

प्रकाशिता। तत एव ते द्वादशोऽपि महानुभावा अन्तर्दधुः। अतः परं परमप्रीतास्ते वैष्णवमहात्मानः स्वामिवर्यं श्रीमद्रामानन्दमभिनन्दन्ति स्म–

धर्माय सद्धर्मविवेचकाय
रामवताराय जगद्धिताय।
आनन्दभाष्यस्य कृते नमोऽस्तु
नमो नमस्ते तु यतीश्वराय।।१।।
प्रसन्नवदनो यः सिद्धिदाता
ह्याचार्यप्रवरो विद्याकुलस्य।
सत्योपदेशाय च रक्षणाय
यः श्रीमठे शान्तगुहाप्रविष्टः।।२।।
काशीपुरीं प्राप्य स काशते यो
गङ्गातटे पञ्चगङ्गेति घट्टे।
सर्वे प्रपत्तेरधिकारिणः स्यु-
रभेदसिद्धान्तमिमं वितेने।।३।।
शास्त्रप्रतिष्ठा सत्यस्य रक्षा
वेदान्तनिष्ठाऽपि समन्वयी सा।
दिव्यात्मनो यस्य सदैव लक्ष्यं
जगद्गुरुं तं महितं नमामः।।४।।
ज्ञानप्रकाशं सुयशोऽपि यस्य
व्याप्तं त्रिलोकममृतं पुनाति।
तेजोमयः सूर्यनिभः समन्ता-
द्दीप्तोच्छ्रितो यस्तं वै नमामः।।५।।

अथाचार्योऽनन्तानन्द एतान् वैष्णवाचार्यान् सादरं प्रस्थापयामास। ये तदानीं समुपस्थिताः साधवः शिष्याश्च दृश्यमिदमपश्यन् तेऽपि स्वामिवर्यस्य धार्मिक्यप्रयत्नान् सादरं हार्दिकञ्च प्रशशंसुः। 'वस्तुतः स्वामिवर्यो महान् समन्वयवादी राष्ट्रमहापुरुष' इति सर्वेऽनुभूतवन्तः।

मुनिपुङ्गवः श्रीपाचरः स्वामिनः श्रीरामानन्दस्य सत्सङ्गसभाया एको निष्ठावान् श्रोताऽऽसीत्। तेन वेदान्तस्तु बहुधाऽधीतः किन्तु तद्रहस्यं न विजानाति स्म। हृदये

निरन्तरं निर्वाणप्राप्तेः कामना जागर्ति। तद्विषये भूरिशः कृतप्रयत्नोऽपि स साफल्यं नाधिगतवान्। स स्वीयामिमां वेदनां स्वामिवर्यं निवेदितुं नैकधा इयेष किन्तु जनसम्मर्दवशादथ च गुहामुखे आवरणबाधातो न कदापि स्वामिवर्यमेकान्ते निवेदितुं शशाक। अन्तर्यामी स स्वामी सर्वेषां मनश्चिन्तितं जानाति। श्रीपाचरस्याऽऽननदशां निरीक्ष्य स तस्य मनोभावं सूक्ष्मं पठति स्म यदस्य मनसि कश्चित् संशयः सङ्कोचो वा विद्यते यमपाकर्तुं स पृथग्वार्तां वाञ्छति। तस्मिन् दिने सत्सङ्गप्रसङ्गे स्वामिवर्यः श्रीपाचरस्य समस्यामभिलक्ष्य विषयं प्रवर्तयामास- शिवस्वरूपोऽयमन्तरात्मा। यतो ह्ययमात्मा प्रियैः शिवाक्षरैः सततं गुञ्जितो भवति। एतानि षण्महावाक्यानि तस्यैव षड्ध्वनेर्विकासो यो मन्दिरस्य देवलः। अत्यन्तमात्मीयानि तानि षण्महावाक्यानि मोहावरणं विपाटयन्ति। इमान् ध्वनीन् स एव शृणोति यो योगयुक्तात्मा। सन्त्येतानि षण्मितानि महावाक्यानि- 'तत्त्वमसि', 'तत्तवास्ति', 'तत्त्वादृशम्', 'तत्त्वमेवासि' 'त्वं तादृश एव' इति। अयं षड्वाक्यनिकायो, मानुषस्य महिमानं, तस्य चौदात्यमथ च तस्यासीमसामर्थ्यं व्यनक्ति। नरनारायणयोर्भेदमपि नाविष्करोति। एतानि महावाक्यानि ब्रह्माकारवृत्युत्पादकानि, मायातः त्राणपराणि, अशेषतत्त्वज्ञानाऽवबोधकानि च सन्ति। वाक्यध्वनिश्रवणमात्रेणैव जीवोद्धारः। एतेषां षण्णां महावाक्यानां प्रत्येकं वाक्यं पृथक्तया विशिष्टाः योगक्रियाः बिभर्ति। प्रत्येकं वाक्यं परमार्थमारोहणार्थं सोपानमेव। अगम्यलक्ष्यार्थं राजमार्ग एव। एतेषु तत्त्वतो नास्ति भेदः। अर्थस्त्वेक एव। केवलं दिगन्तरं विद्यते। अत एव षट्सम्प्रदायाः सम्भूताः। संक्षेपतः एष एव षडक्षरमंत्रो 'राम' इति। यदा कश्चिद् रामनाम जपति, अस्मादेकस्मादेव नामतः षट्प्रकारकाः ध्वनयः गुञ्जन्ति। एतान् श्रुत्वा, सुरतिशब्दसाधकोऽनायासमेव देहस्य षड्विकारानपाकृत्य सहजमेव षट्सम्पत्तीरधिकरोति। एवं षडैश्वर्यप्राप्तिसमनन्तरमेव साधकस्य हृदयाकारो चिन्मयज्योतिर्विद्योतते। तस्यां स्फाटिकज्योतिराभायां निःशेषं दैहिकतमो विलीयते चित्तञ्च तस्यां चिन्मयसत्तायां विलीनं भवतीत्येष एव वेदान्तः। अयमेव वेदान्तो नरनारायणयोरेकत्वं प्रतिपादयति। नरस्य प्रत्यायनां करोति स एव नारायणो न भिन्नः परस्परम्। नरस्तु नारायण एव, स एव नारायणत्वमाप्नोति। तस्मिन् तत्सर्वमेव सामर्थ्यं निहितं यन्नारायणे विद्यते।

श्रीपाचरः स्वामिवर्यकृतेऽस्मिन् प्रवचने, सर्वासामेव शङ्कानां जिज्ञासानाञ्च समाधानं प्रत्यक्षमेव पश्यति स्म। वेदान्ताध्ययनकाले मनस्युत्थितानां संशयानां निर्विशयमुत्तरमपि प्राप्तम्। अवसिते सति सत्सङ्गे, नितरामाह्लादितः श्रीपाचरः स्वामिवर्यस्य चरणाब्जयोः प्रणामाञ्जलिं समर्पयन् प्रोवाच- "अयि महात्मन्! भवतः

प्रवचनप्रचण्डभास्करेण मम मनसि निगूढः तमः सर्वथा विनष्टम्। कृतकृत्योऽस्मि। सत्सङ्गसेवनं मे सार्थकं जातम्। महानात्मा भवान् गूढतत्त्वानां निष्णातो वेत्ताऽस्ति। भौतिकप्रपञ्चजातासंसक्तानां भवानेवोद्धारकः। तेषां परत्रेह च शर्मकर्मणे प्रभवति भवान्। भवत्समो न कोऽपि महात्मा। धन्योऽस्ति। 'जयतु जयतु स्वामिवर्य' इति सश्रद्धं सोत्साहं समुद्घोषयन् श्रीपाचरो विनिर्ययौ।

आनन्दभाष्यस्य रचना तदुपरि महर्षेर्वेदव्यासस्य प्रशस्तिः– एताभ्यां द्वाभ्यामेव स्वामिश्रीमद्रामानन्दो भारतस्य वेदविदां मध्ये 'निष्णातो वेदज्ञ' इति सुमहत्प्रतिष्ठितो बभूव। शङ्कानां समाधानाय जिज्ञासवो जना दूरदूरादपि तमुपयान्ति स्म। काश्यामायोजितायां कस्यामपि धर्मसभायां समागताः प्रतिभागिनो विद्वांसः श्रीमठं गत्वा स्वामिवर्यस्य दर्शनं तेन च सह तत्त्वचर्चामवश्यमेव कुर्वन्ति स्म।

एकदा चन्द्रहग्रहणपर्वावसरे, काश्यां सुमहद्धर्मसमारम्भ आसीत्। तस्मिन् प्रायेणाखिलभारतवर्षाद् धर्माचार्या ब्राह्मणा विद्वांसः सिद्धयोगिनो महात्मानश्च समवेता आसन्। अनुष्ठिते सति धर्मसमारम्भे, श्रीमठं स्वामिचरणानां दर्शनपुण्यलाभमाप्नुयाम इति सर्वेषां मनःकांक्षितमासीत्। यदैते श्रीमठं गतवन्तः, स्वामिवर्यः समाधौ रमते स्म। दर्शनलाभवञ्चितास्ते आगामि दिवसे दर्शनार्थं समुचितां बेलां पृष्ट्वा आचार्याऽनन्तानन्दमापृच्छ्य परावर्तिताः। तेषु निष्ठावन्तः श्रद्धावन्तो जनाः नियतकाले श्रीमठं जग्मुः। तेष्वेकः वेदविन्महापण्डितः क्षीरेश्वरभट्ट आसीत्। तस्य मनसि केषाञ्चित् श्रुतिमन्त्राणां तात्पर्यविषयिणी जिज्ञासा आसीत्। तदानीं सत्सङ्गसभायां आचार्यपीठे विराजमानः स्वामिश्रीरामानन्दो दिव्यप्रभामण्डितः पण्डितान् तान् समाचकर्ष। स्वामिवर्यस्यालौकिकमनुभावं दर्शं दर्शं चमत्कृता आत्मविस्मृताः पण्डिताः किमपि प्रष्टुं न शक्नुवन्तः। तत्रोपस्थितान् महापण्डितान् दृष्ट्वा स्वामिवर्य एकैकं कृत्वा सर्वेषां मनोगतान् भावान् क्षणमात्रेणैव पठितवान्। अन्ततः क्षीरेश्वरभट्टस्यैव जिज्ञासा प्रबलगूढतमेति समनुभूय तामालक्ष्यैव स प्रवचनमारभत्–

"प्रकारान्तरेण कारणमेव कार्यम्। 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति श्रुतेः। अत्र यदि अविद्या मृत्योः कारणं तत्तरणाय यानमप्यवबुध्येत्। द्वन्द्वमयी खल्वविद्या। तस्याः नर्तनमविरामं चक्रवत् प्रवर्तते। जन्ममरणयोः ध्रुवतामुपगम्य सा त्वेकतानबद्धा सुख–दुःख, हर्ष–शोक, पुण्य–पापप्रभृतीः विविधाः कलाः प्रकटयति। अविद्यायाः सैव द्वन्द्वात्मकता तत्राद्वितीयं समतालमपि प्रस्तौति। द्वन्द्वे तस्याः स्वरूपबोध एव समदृष्टिः। सा स्वकलाप्रकटनेन, अङ्गभङ्ग्या, कटाक्षेण मूर्च्छनाभिश्च तत्त्वमुपदिशति। यः प्रेक्षकः तमुपदेशं श्रुत्वाऽपि न शृणोति, स मृत्युमुपयाति। यश्च

तमुपश्रुत्य सतर्कः सावधानः सचेष्टश्च भवति स एव मृत्युधारामुत्तरति। 'ईशावास्यमिदं सर्वमि'ति साऽविद्या सुन्दरी नर्तनकाले आलापयति। सर्वं जगत्तेनावासितम्। तद्दूरे तद्वन्तिके। इदं रहस्यमयं जगत् तस्यैव विकासो विलासश्च। इत्येव श्रुतिरहस्यम्।"

पण्डितक्षीरेश्वरभट्टः स्वामिवर्यस्य प्रवचनमनन्यमनसा शृणोतिस्म। तस्य प्रतिशब्दस्य गूढार्थमप्यधिगच्छति स्म। स्वामिवर्यस्तस्य मनश्चिन्तितं कथं विजानीतवानिति स विस्मित आसीत्। प्रवचनान्ते, स्वामिवर्यमुपगम्य सादरं न्यवेदयत्–

"इममेव संशयं मनसि कृत्वाऽहमत्रागतः। अकृतेऽपि सति मयि प्रश्ने, उत्तरं तु भवता प्रदत्तम्। सर्वे संशयाः निर्णये पर्यवसिताः।" इत्येवमुक्त्वा क्षीरेश्वरभट्टः स्वामिवर्यस्य पादयोर्न्यपतत्। यावत् श्रीरामानन्दः सव्यं करं तस्य शिरसि विन्यसति तावदेवाऽखिलवेदविज्ञानं तस्य महति प्रविष्टम्। स्वामिवर्यः समादिष्टवान् "अपरेद्युरवश्यमेवागन्तव्यम्" इति।

पण्डितक्षीरेश्वरभट्ट आगामिनि दिवसे यथासमयं पुनरपि श्रीमठमगच्छत्। विगतदिवसस्य सत्सङ्गे जगद्गुरुर्यत्र प्रवचनाद् विरतोऽभूत्, अद्य तस्मिन् प्रक्रमे तमेव विषयमग्रेसारयन्तमब्रवीत्–

"विद्यैवाऽमृतत्वं भुङ्क्ते। विद्यां विना दुर्लभं तदमृतपदम्। विश्वद्रव्यानामुपयोग एव पार्थिवजीवनस्य लक्ष्यम्। विद्ययैवाऽमृतमश्नुते। त्यागस्तु विद्याया अपरं रूपम्। विनयान्वितानां नराणां हृदये विद्यैव त्यागमङ्कुरयति। जीवे नामरूपपरा या संस्कारवासना तदुच्छेद एव त्यागस्य महिमा। फलेहात्याग एव वस्तुतः त्यागोपयोगो भूत्वा विद्योत्कर्षादिच्छाविरहितो भवति, स द्वन्द्वातीतो भवति। इममेव सिद्धान्तं व्यवहरन्तो विषमे भवेऽपि सर्वे साधकाः ब्रह्मभूता अभवन्। शारीरिकीं शुचितां विदधानास्तदद्वितीयं प्रविश्य तदाकाराः तन्मयाश्च सञ्जाताः। पुरा अभूवन् पश्चादपि भवितारः। त्यागी विरक्तः पुरुषः तां गुणातीतामवस्थामवाप्नोति। गुणानां मायां तरति दुस्तराऽपि सा गुणमयी माया तं नाभिभवति। भगवन्मयः स परानन्दतां प्रयाति। तस्य परमात्मनः ज्योतिरेव सर्वत्र भासते– 'तस्य भासा सर्वमिदं विभाती'ति। यः तज्ज्योतिः समीक्षन् कर्मणि प्रवृत्तो भवति, तस्मिन् भेदबुद्धिर्न जायते। भेदातीतोऽपि सृष्टिकर्मनिरतः स सार्थकतया निजमस्तित्वं परिचिनोति।......।। पण्डितक्षीरेश्वरभट्टः प्रवचनं श्रुतिगोचरं कुर्वन्नेव तस्यामेवाभेदावस्थायां निलीनः। प्रवचनावसान एव तस्य तुरीयावस्थाऽपगता।"

स्वामी रामानन्दस्तेषु महायोगिष्वेकतम आसीद् यः शास्त्रज्ञानं हस्तामलकवद् धारयति, अपि च परमात्मदर्शनस्य ध्यानयोगेऽपि सिद्धः। आत्मसाक्षात्कारस्य सर्वसुलभतमो मार्गः शब्दसुरतियोगोऽथ वा रामभक्तिस्तेनैव दर्शिता। नायं मार्गो

हठयोगपद्धतिपरो नापि विषमसिधारासु पदसञ्चारः। नैतत्कृते गृहत्यागः समीहते, न कान्तारसेवनं नापि पर्वतगुहानिषेवणम्। इयमात्मसाक्षात्कारपद्धतिस्तु प्रेमवीथी, मिलनोत्कण्ठासरणिः, नामजपमार्गः। चेतनां जिह्वाग्रादवतार्य सुषुम्णापथाऽऽत्मसंयोगः। योऽपि स्वामिवर्यमुपगतः तस्याभीष्टं नियताप्तम्। न कश्चिन्निराशो हताशो वा न्यवर्तते। देवा अपि स्वामिवर्यस्येमामलौकिकीमप्रतिमां च शक्तिं जानन्ति, तस्यै स्पृहयन्ति। अपि च, निजान् भक्तान् मुक्त्यर्थं श्रीस्वामिशरणं गन्तुं प्रेरयन्ति। एतादृश एव दृष्टान्तोऽस्ति सिन्धप्रान्तवासिनः मुनेर्विनयस्य। सोऽप्यखिले विश्वे इतस्ततोऽटति स्म- 'कश्चित्कारयतु मां परमात्मदर्शनमि'ति। परन्तु लक्ष्यं नाधिगतम्। स यत्र कुत्रापि याति, सर्वत्र तस्य कर्णकुहरे एकमेव वाक्यं पतति- "एक एव महापुरुषो रामानन्दः काश्यां श्रीमठे यो मुक्तहस्तेन मुक्तिं वितरति।" इति।

ब्रह्मजिज्ञासोत्कण्ठः स मुनिर्विनयः काशीं समागतः। अत्र तारकमन्त्रप्रदातुर्भगवतो विश्वनाथस्य पुर्यामागत्य स स्वाभीष्टसिद्धये नैकान् विदुषो, मुनीनाचार्यान् धर्मधुरन्धरांश्चापश्यत्। सर्वानेव स न्यवेदयत्- "नाहं पुस्तकीयं प्रमाणं काङ्क्षे नाप्युपायान्। अहं केवलं ब्रह्मदर्शनं काङ्क्षे।" न कश्चित्तथाकर्तुं शशाक। सर्व एव तं नुदति- "गच्छ, पश्य स्वामिनं रामानन्दम्। स एव तवैतादृशीं ब्रह्मजिज्ञासां पूरयितुं समर्थः।" एभिर्वचोभिः मुनिविजयस्यान्तःकरणे स्वामिवर्यविषयिणी श्रद्धा प्रादुरासीत्। ततः स मुनिविजयो भ्रान्तपर्यटनं निरस्य, सङ्कोचं विमुच्य, अन्यत्सर्वं परित्यज्य एकदा श्रीमठं जगाम। आचार्यमनन्तानन्दमात्मपरिचयं विज्ञाप्य स्वामिवर्यस्य दर्शनार्थं निवेदयामास। आचार्यस्तं गुहाद्वारं प्रापयत्। गुहाद्वारे आवरणमासीत्। तत्रस्थ एव मुनिविजय आत्मनिवेदनमकरोत्। उवाच च "आत्मसाक्षात्कारस्येच्छया, आत्मस्वरूपावस्थानाय भवत्सेवायामागतोऽयं जनः। कृपाकटाक्षेण मां द्रष्टुं प्रसीदत्वि"ति।

अन्तर्यामी स्वामिवर्यस्तु जानाति स्म यच्छास्त्राणि युक्तयो वाऽस्य बोधाय न। अस्मै ब्रह्मजिज्ञासा तेन विधिना वेदितव्या यतोऽस्मिन् श्रीमठस्य शक्तिं प्रति विश्वासो जागर्तु। गुहास्थ एव स्वामिवर्य आदिष्टवान्- "गच्छ तावद् विश्वनाथमन्दिरम्। ज्योतिर्लिङ्गादानयैकं बिल्वपत्रम्। करिष्यामि तव ब्रह्मजिज्ञासायाः समाधानम्।"

"महात्मन्! तव वचनं करिष्ये किन्तु नाहं गतः किमपि मन्दिरम्। नैव चाराधितः कश्चिद्देवः। न कोऽपि पूजितः प्रर्थितो वा मयेत्यु" क्त्वा स निर्ययौ।

बिल्वपत्रं ज्योतिर्लिङ्गादाहृत्य यदा मुनिविजयो विश्वनाथमन्दिरात् श्रीमठं प्रति समागच्छति स्म तदा बिल्वपत्राद्- "येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमि"ति समुत्थितं वेदमन्त्रध्वनिं श्रुतिगोचरं कृत्वा भृशं विस्मयाविष्टोऽभवत्। चकितचकितस्य

मार्गलङ्घने त्वरा प्रविष्टा। कियच्छीघ्रं श्रीमठं प्राप्य स्वामिवर्यमिदं वृत्तं निवेदयामी'ति व्यग्रमानसः स धावं धावं श्रीमठं प्रविश्य गुहाद्वारं गतः। आवरणमपसार्य, स्मामिवर्यस्तं दर्शनेनात्मनोऽनुगृहीतवान्। दिव्यदर्शनेनोपकृतः स मुनिविजय आत्मविस्मृतिं ययौ। स्वामिनः प्रभाबिम्बे स दिव्यदर्शनं लब्धवान्। स्वामिवर्योऽपृच्छत्–

"अप्यानीतं बिल्बपत्रम्?"

मुनिविजयः– "आनीतम्। एतत्पत्रं वेदमन्त्रमुच्चारयति।"

"अपि ते सन्तोषः सञ्जातः?"

"अवैमीदम्। तदेव सर्वम् सर्वत्र।"

"पुनः किमपेक्ष्यते?"

"पूर्णानुभवः, साक्षाद्दर्शनञ्च।"

अथ स्वामिवर्यः स्वकीयजलपात्राद्हस्ते जलमादाय मुनिविजयस्यानने पृषत्पातमकरोत्। तेन पृषत्पातेन स समाधिं गतः। समाधौ स साक्षाद् विभुं दृष्टवान्। किञ्चित्कालपर्यन्तं स्वामिवर्यस्तं मुनिविजयमानन्दसुधासागरे निमग्नं समादधौ। उपरते समाधौ, स मुनिविजयो दिव्यानन्दसहोदर इव, प्राप्तामितभास्वद्रत्ननिचय इव, सर्वोन्नतमेरुशिखरमधिरूढ इव, दृष्टसकलाश्चर्यजनकदृश्य इव, आस्वादितसकला-मृतफलाकर इव, अपरिमितसौख्यसागरस्य परंपारं गत इव, अधिगतपुरुषोत्तमाङ्कवरासन इव, लब्धनेत्रनिर्वाण इव, प्रविष्टदिव्यज्योतिर्हृदयाकाश इव, वेद्यान्तरसम्पर्कशून्य इव, पुनर्दिव्यदर्शनोत्सुकरोमोद्गमपुलकितदेहः स्वामिवर्यस्य चरणयोर्लुठति स्म। विदेहदशापन्नो मुनिविजयः कियत्कालपर्यन्तमात्मविस्मृत एवं चकार। तत उत्थितो वारं-वारं प्रणम्य, स्वामिवर्यस्य जय-जयकारैः श्रीमठं गुञ्जायमानः प्रशस्तिवचनं ब्रूते– "महात्मन्! धन्योऽसि। सत्यमेवाऽवतारपुरुषस्त्वम्। दिव्यविभूतीनामीश्वरस्त्वम्। ऋद्धि-सिद्धि-निधीनां नियन्ताऽसि। त्वत्सदृशो नास्ति कोऽपि भुवनमण्डले। ज्ञान-विज्ञान-भक्ति-योगागारस्त्वम्। यथाश्रुतं तथा दृष्टम्। हे करुणासिन्धो! मयि कृपादृष्टिं निधेहि मां कृपाभाजनं विधेहि। कृतार्थोऽस्मि। स्मरणमात्रेणात्मदर्शनेन मामुपकुर्वन्तु। प्रणतोऽस्मि, विनतोऽस्मीत्येवं बहुविधमुक्त्वा कातरचक्षुषा श्रीमठं निभालयन् स ततः प्रतस्थे।

प्राचीनकालादेव काशीपुर्यां विराजन्ते वैदिकाः पौराणिकाः कर्मकाण्डिनो विद्वांसः पुरोहिताश्च। ते सर्वे स्वामिश्रीरामानन्दप्रवर्तितेन सहजसुरतिशब्दयोगमार्गेण रामनामजपसाधनया वा मुक्तेरवाप्तिरिति श्रुत्वा विस्मयोत्कर्णाः बभूवुः। यतो हि

तेऽपि कर्मकाण्डपरैर्विविधानुष्ठानैः स्वर्गमपवर्गञ्च साधयन्ति। तेष्वनुरक्ता जना तानेवानुधावन्तिं। कर्मकाण्डं खलु तेषामाजीवः। अतः श्रीरामानन्दस्य सम्प्रदायविधिरहस्यं विज्ञातुं तदानीन्तनो वैदिककर्मकाण्डपुरोधा विद्वान् श्रीविश्वनाथः कदाचित् श्रीमठं ययौ। सोऽस्मिन् विषये स्वामिवर्यं श्रोतुमिच्छति स्म। तत्र सत्सङ्गस्य वेला समायाता। स्वामिवर्यो गुहातो निष्क्रम्य सत्सङ्गमण्डपे समायातः। आचार्यश्रीविश्वनाथः क्षणं लब्ध्वा स्वामिवर्यमुपसृत्य प्रणतिनिवेदनपूर्वकं पप्रच्छ- स्वामिन्! अस्य रामनाम्नोऽन्तरङ्गरहस्यं किम्? इदं नाम भगवते आशुतोषायाऽपि रोचते स्म। भवानपि रामनामजपार्थमादिशति। अतो नामशक्तिप्रतीत्यर्थं भवानाऽऽख्यातु रामनाममहिमानम्।"

कर्मकाण्डपुरोधसः तद्वचनमुपश्रुत्य श्रीमद्रामानन्दः तद्दिवससत्सङ्गप्रसङ्गे एवमेव विषयमधिकृत्य सस्मितं प्रोवाच- "समीचीना खलु भवज्जिज्ञासा किन्तु तत्त्वज्ञानमेतद् योगिनामेव गम्यं नेतराणाम्। इदं सर्वकल्याणमयं परमं पवित्रं रकारमकारमयममूल्यमद्वितीयं भास्वन्नामरत्नं तेनैव शिष्येण लभ्यते यस्मै सद्गुरुः प्रीतिपूर्वकं प्रसन्नमनसा प्रददाति। अस्य तत्त्वज्ञतमः स्वयमीश्वर एव, यः सुषुप्तावपि विभुत्वेन प्रकाशते। शिवं जीवं प्रकृतिं पुरुषं च या सर्वत्र घटयति सा सत्ता राम-नामैव। यश्च केनचिदपि साधनेनाऽन्तर्दृष्टिं लभते, स रकारमकारयोः रमणक्रीडां पश्यति। स एव शब्दब्रह्मणो जगद्ब्रह्मणोश्चाभेदमवबोधते। एतन्नाम एव ऊँकारस्याऽऽदिरूपम्। 'सोऽहमि'त्यस्येदमादिप्रतिष्ठा। नामेदं गुणातीतदशायां घटमानस्याऽनाहतध्वनेः सारः। हृद्देशे ईश्वरस्याधिवासः। स एव प्रगुणो भक्तः। स एव गुणातीतो विरक्तः। स एव मन्त्रराजस्य द्रष्टा, स चैव सर्वज्ञः। सप्तभङ्गयः, चतुर्विज्ञानानि, त्रिविधानि कर्माणि, एकादश भक्तयः, त्रयोदशाश्च त्यागास्तस्य स्वत एव करतलगता भवन्ति। एतज्ज्योतिः सर्वत्र भुवनमण्डले व्याप्तं, य एतत् पश्यति, अभिजानीते वा, तस्य भेदबुद्धिः प्रविलीयते। स भगवन्मयो भूत्वा द्वन्द्वातीतः त्यागवैराग्यपरः सकलकामनारहितश्च सम्पत्स्यते। फलत्याग एव यथेच्छमुपभोगाधिकारं ददाति। एष त्यागो विद्यायाः स्वरूपमधिकरोति। महान् खलु त्यागस्य महिमा। एवं त्यागवृत्या विद्यासम्पन्नो नरोऽमृतत्वं समाप्नोति। विद्यां विना तत्पूर्णप्राप्तेर्नावकाशः।"

एतद्विवेचनं निशम्य विमृश्य चाचार्यविश्वनाथस्य नेत्रोन्मीलनं बभूव। स स्वामिवर्यं प्रार्थयामास प्रदातुं तस्मै अप्येदममूल्यं रामनामरत्नं ललामम्। स्वामिवर्यस्तमाश्वासयामास- "अस्तु। सेवस्व सत्सङ्गम्।" एकदा सुदिनं विलोक्य स्वामिवर्यः तस्मै तन्नामरत्नं प्रददौ। स विश्वनाथोऽपि जगद्गुरोर्दीक्षितः शिष्यो बभूव।

एतत्तु नैव भवति स्म यत्काशीमागत्य कश्चित्सम्प्रादय-मतवादी विद्वान् स्वामिश्रीरामानन्दस्य दर्शनं न करोतु, अथवा शास्त्रजिज्ञासाशमनार्थं श्रीमठं न गच्छतु। स्वामिवर्यः शब्दसुरतियोगस्यैकं नवीनमाध्यात्मिकमनुष्ठानं प्रावर्तयत्। अयं सगुण-निर्गुणयोः समन्वितो मध्यममार्ग आसीत्। अनेन मार्गेण सञ्चरन् कोऽपि साधकः समाधौ सहजतया ब्रह्मसहोदरां स्थितिं समवाप्याऽशेषदिव्यशक्तिविभूषितो भवति। मोक्षप्रदेनानेन सरलमार्गेण समाकृष्टाः ज्ञानकर्मभक्तियोगयुता जनाः श्रीमठमायान्ति स्म। अतः स्वामिवर्यस्य चमत्कारमयी कीर्तिर्भुवनत्रयं व्याप्नोति स्म। अस्य समक्षं भूत–प्रेता अपि स्वोद्धारकामनया हस्तौ प्रसार्य विनता आसन्। शक्तिसम्मुखं तन्त्रमन्त्रोऽपि विच्छाय आसीत्। परमात्मना सह यस्य शुचिसम्बन्धः, दिव्यशक्तयो यस्य समक्षं नताः आसन्, स शब्दनिगूढां शक्तिं समुद्घाट्य 'शब्दब्रह्मे'ति कथनं सार्थकं कृतवान्।

एकदा काश्यां यज्ञस्य सुमहदायोजनमासीत्। तस्मिन् यज्ञे ब्रह्मा आसीन्महाराष्ट्रप्रान्तस्य सुविख्यातो मीमांसकः श्रीचिपलूणकरशास्त्री, येन कुमारिलभट्टमनुवर्तिकाले मीमांसाशास्त्रे महती प्रतिष्ठा समर्जिता। काश्याः कर्मकाण्डिभिर्विद्वद्भिः, नागरिकैश्च तस्य शुभागमनमालक्ष्यैकस्मिन् महति समारोहे तस्याभिनन्दनं कृतम्। सम्पन्ने सति महायज्ञे स महापण्डितः श्रीचिपलूणकर-शास्त्रिमहाभागः स्वामिवर्यस्य दर्शनार्थं श्रीमठं जगाम। मीमांसाशास्त्रस्य प्रवर्तक आसीन्महर्षिजैमिनिः। 'वेदज्ञानं निरर्थकमि'त्युक्तं जैमिनिमहर्षिणा। श्रीशास्त्रिमहाभागोऽस्य रहस्यं विज्ञातुमिच्छति स्म। स्वामिवर्यः शास्त्रिमहाभागाय दर्शनं न ददौ। आवरणान्तर्गत एव संवदते स्म।

श्रीचिपलूणकरशास्त्रिमहाभागः स्वामिवर्यमपृच्छत्- "स्वामिप्रवर! महर्षिजैमिनिः, 'आम्नायस्य क्रियार्थत्वात् आनर्थ्यक्यम् अतदर्थानाम्' इति विलिख्य किमर्थं वेदज्ञानस्य निरर्थकत्वं प्रोक्तवान्?"

स्वामिवर्यस्तु व्याख्यातवान्- "वेदेन सहेश्वरस्य सम्बन्धस्वीकारपरिहाराय, जन्ममरणचक्रस्य स्थैर्यनियन्त्रणाय, मन्त्रमूर्तेर्देवगणस्य च नरलोकेन सह सम्बन्धस्थापनायेवमुद्दिश्य जैमिनिमहर्षिणा लिखितम्। स्वामिवर्यस्येदमुत्तरं शास्त्रिमहोदयः कियत्कालं मौनं मननं कृतवान्। ततोऽब्रवीत् "भगवन्! अनेन तु मे संशयोऽतोऽपि कृच्छ्रे पतितः। न मया किञ्चिदवबुद्धम्। कृपया पुनरपि स्पष्टमाख्यायताम्।"

स्वामिवर्येणानुमितं यदयं शास्त्रिमहोदयः शब्दविधिनाऽस्य मर्म बोद्धुं न शक्नोति। अन्येन केनाऽप्युपायेन बोधोऽपेक्ष्यते। अतोऽनन्तानन्दमाध्यमेन एकमष्टदलपुष्पं प्रेष्य, "पश्यैतदि"ति निर्दिष्टवान्। शास्त्री महोदयो यावत्तत्पश्यति तावद् दलद्वये

कामिनीपीनपयोधरौ, दलद्वयौ उद्भित्प्ररोहौ, तुलाफलके दलद्वये च सूर्याचन्द्रमसौ दृष्टौ। मध्ये च तस्य पुष्पस्य परमात्मनो बालरूपं समृदश्यत। चकिताकुलः स शास्त्री यावत्किमपि प्रष्टुमियेष तावत्स्वामिवर्यः स्वकीयं दक्षिणावर्तशङ्खं दध्मौ। तेन दिव्यशङ्खध्वनिना श्रीचिपलूणकरशास्त्रिणो मनसि समुत्थिताः सर्वे आध्यात्मिकभ्रमसंशयाः निराकृताः। हृदयं प्रसन्नं विशदं याभूत्।

श्रीचिपलूणकरशास्त्री तु अध्यात्मबोधस्यानेन विधिना भृशं प्रीतो भूत्वा स्वामिवर्यभिनन्दति स्म- "भगवन्! बहुश्रुतमासीद्भवद्विषये। तदनुरूपमेव भवच्छक्तिवैभवं प्रत्यक्षीकृत्वाऽभिभूतोऽस्मि। ममानुमानादप्यतिरिच्यते भवतः सिद्धिशिखरः।"

स्वामिवर्यः प्रोवाच- "यदा कर्मकाण्डिनो मीमांसकाः कालप्रभावं- 'ब्रह्मेन्द्रसहस्त्राणि देवानां च युगे युगे। कालेन समतीतानि कालो हि दुरतिक्रमः।।' - इत्यवबोधन्ते, तदाऽपवर्गं प्रति श्रद्दधन्ति।" स्वामिवर्यस्य श्रीमुखादेतदुपश्रुत्य शास्त्रिमहोदयस्यानने सन्तुष्टिभावः समजनि।

श्रीचिपलूणकरशास्त्री श्रीमठं गत्वा कमपि नवीनं बोधं समर्जितवान्। अहो स्वामिर्वस्यानुभावप्रभावः! कमपि जटिलमपि विषयं सरलतमेन विधिना यदि कश्चिज्ज्ञातुमभिलषति, स निषेवतु स्वामिचरणौ। तस्य ज्ञानं, तस्य विद्या, तस्य व्याख्यानं, तस्य शङ्खध्वनिः, सर्वमेवाद्भुतमलौकिकञ्च। शब्दैरबोध्योऽपि विषयः स मौन एवान्यद्विधिना वेदयति। सत्यमेवोक्तम्- "गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः" इति। श्रीचिपलूणकरशास्त्री स्वामिवर्यं भूयो-भूयः प्रणम्य विनीतमुद्रया ततो निर्ययौ।

(८)

'ग्रन्था गुरवो मनुष्याणाम्' 'पुस्तकी भवति पण्डितः' 'ज्ञानं वसति पुस्तके' इत्येताः सूक्तयो बहुधा श्रूयन्ते विद्वत्समाजे। अस्त्येवम्, किन्तु ग्रन्थाः केवलं ज्ञानस्य प्रक्रियां निर्दिशन्ति। परस्परवार्तालापैः, गोष्ठीभिः सत्सङ्गैश्चापि बौद्धिकं ज्ञानं विवर्धते। परन्तु यदि पठितं, श्रुतं, दृष्टञ्च ज्ञानं व्यवहारे न प्रयुक्तं तत्तु नोपादेयम्। तत्कृतः श्रमः व्यर्थ एव।

'काहड़ा' इत्यस्य निवासी, नदीष्णो बहुज्ञः गुप्तरहस्यानां वेत्ता श्रीझीटाजी नैकधा स्वामिश्रीरामानन्दं शरणं गतवान् 'अन्तर्दृष्टेरुन्मीलनाय' इति किन्तु

भाग्यस्यप्रातिकूल्यं तं प्रतिवारं वञ्चयते। प्रथमगमने दर्शनमेव नाभूत्। द्वितीये प्रयत्नेऽपि दिनत्रयं परिभ्रम्य साफल्यं न लब्धवान्। केनाप्युपायेन झीटाजी स्वामिवर्यस्य दर्शनाशीषैरात्मनः कृतार्थतामीहते स्म। अतः श्रीमठगमनं तेन नैव त्यक्तम्। अन्ततः स्वामिवर्यस्य दर्शनेनाऽत्मनः सौभाग्यं पुपोष। दिव्यदर्शनं लब्ध्वा झीटाजी समाधिंगतः। तत्र समाधौ लोकाल्लोकान्तरं परिभ्रमति स्म। पर्याप्तं कालं व्यतीत्य समाधिभङ्गो जातः। यावन्नेत्रे उन्मीलिते तावत्समक्षं स्थितं स्वामिवर्यं पश्यति। सप्रश्रयं झीटाजी निवेदयति स्म– "प्रभो! मनोविकारा नापयान्ति। अनुगृह्णातु मां, मनसः कामभूतमपनयतु, भवमुक्तिं प्रददातु। पातु मां रसातलगमनादि"ति।

स्वामिवर्यस्तु अन्तर्यामी। घट–घट–घटमानं रहस्यं स विजनाति स्म। सस्मितमुवाच– "झीटाजी, यदि भवता भार्यावचनं स्वीकृतं स्यात्, नाऽऽपततीयं स्थितिः। अपि तया नोक्तम्– 'गृहवनयोर्मध्यस्थिता सोपत्यका भयावहा खलु। ततो निष्क्रमणं नास्ति सुकरम्।" पतिपत्न्योरियमेकान्तवार्ताऽपि स्वामिवर्यस्याऽविषया नास्तीति विमृश्य झीटाजी जिह्रेति स्म। शनैरवादीत्– "अन्तर्यामिन्! सत्यं खलु वृत्तमेतत्। तदानीं वनविषयिणी भावना दृढतरा जायते स्म। सा त्वद्यापि तथैव किन्तु गृहं तामतिशेते। तृष्णातपतो मां त्रायताम्। वनयात्रायै साहसं पाथेयं च ददातु। यद्यपि भवतो गुणानां पारं नास्ति तथाप्याजीवनं गुणगानं करिष्यामि।" अथ स्वामिवर्यो निजगाद– "झीटा जी, प्रथमं वारं दर्शनं विना यदा भवान् रिक्तहस्तो न्यवर्तत् तदापि श्रीमठस्याशयो नावबुद्धः। अतस्तां धर्मपत्नीं सहचारिणीं विधाय तया सहैवेहागच्छतु। तदानीमेव समस्यायाः समाधानम्, नान्यथा।"

एतच्छ्रुत्वा झीटाजी त्वरितपदः पुनः कहाड़ाऽऽवासमगच्छत्। इदानीं धर्मपत्नी 'चुपन्ना' नामधेया तेन सहागता। यावत्स श्रीमठं प्राप्तः, सत्सङ्गस्तु विश्रान्तः। दिवसोऽप्यवसितः। कृतपदा सान्ध्यवेला राजते स्म। स्वामिवर्योऽपि सन्ध्यावन्दने व्यापृतः। अवसिते ध्यानक्रियाविधौ, गुहाद्वारत आवरणमपसृतम्। दिव्यदर्शनं लब्ध्वा दम्पती कृतार्थतां गतौ। स्वामिवर्यस्य चरणौ प्रक्षाल्य श्रद्धया पादोदकं पीतवन्तौ, नीराजनञ्च कृतवन्तौ। सद्गृहस्थधर्मानुरूपं पण्डितपत्नी जगद्गुरवे किमप्युपायनं समर्पितवती। एष एव शिष्टाचारो मनीषीभिर्निर्दिष्टः।

किमर्थं तामानेतुमादिष्टवानिति झीटाजीमहोदयं प्रति समाख्यानात्पूर्वमेव स्वामिवर्यः श्रीमतीं चुपन्नां द्वौ प्रश्नौ पृष्टवान्। प्रथमः प्रश्न आसीत्–

'गृहाङ्गणे वनाङ्गणे च को भेदः?' द्वितीय प्रश्न आसीत्–

'को नाम स लोको यत्र रविरपि न प्रकाशते?'

प्रथमप्रश्नोत्तरे श्रीमती चुपन्ना मौनमेव चक्षुकज्जलं मृष्टवती।

द्वितीयप्रश्नोत्तरे सा मुष्टिं प्रसार्य करतलं दर्शितवती। झीटाजी किमपि नावगच्छत् परन्तु स्वामिवर्यतो न किमप्यविज्ञातम्। श्रीमतीचुपन्नाकृतक्रियाभिप्रायः स साधु विवेद। अथातः स चुपन्नायाः प्रेम्णः परीक्षणार्थं शङ्खध्वनिमकरोत्। प्रवृत्ते सति शङ्खध्वनौ सा सत्वरमुत्थिता सती साञ्जलिं प्रार्थयामास- "प्रभो! रक्षतु मर्यादाम्। मदीयं भेदं मोद्घाटयतु।"

स्वामिवर्यः सगभीरमुद्रमुवाच- "त्वैयकस्मिन्नेव वारे त्रिरूपतां प्रदर्श्य या विलासिता विस्तारिता, भवेन्नाम कश्चिदेव तयाऽस्पृष्टोऽवशिष्टः। त्वमसि मूर्तरूपाऽविद्या। भविष्य एतादृशं कर्तुं नार्हसि। झीटाजी महोदयो मां शरणमागतः। पश्य, कथं करबद्धः सन् रक्षितुं प्रार्थयति। अस्य वन-पथो मया रक्षितव्यः।"

स्वामिवर्येणैवं कथिते सति, सा चुपन्ना ततः सत्वरमपसृता। स्वामिवर्यस्यानुग्रहात् स झीटा जी मोहतमो विपाट्य स्वरूपावस्थितो बभूव।

शरणागतानां सर्वविधरक्षणं कल्याणञ्च स्वामिवर्यस्य स्वभाव आसीत्। यः स्वामिवर्यं शरणमुपैति तस्य योगक्षेमं स कथं निर्वहतीत्यस्यैकमुदाहरणं दृश्यते शिष्यस्य पद्मतेश्वरस्य जीवनदाने। आसीत्पद्मतेश्वरः काशिकेयैव। स स्वामिवर्यस्य प्रियः शिष्य आसीत्। प्रतिदिनं सत्सङ्गं सेवते। स्वगृहे नामजपविधिनाऽवस्थाय क्वचिदेकान्ते साधनानिरतो भवति स्म। एकदा रात्रौ ध्यानसाधनायां यदा चेतना ऊर्ध्वगामिनी जाता, श्वासश्चतुर्थे प्रस्तरे (प्रकोष्ठे वा) निरुद्धः। अथ चेतनाया ऊर्ध्वगतिः स्थगिता।

शिष्यस्येयं सङ्कटापन्नाः दशा स्वामिवर्यस्य ध्याने परिलक्षिता। स तत्क्षणमेवाऽऽचार्यानन्तानन्देन सह पद्मतेश्वरस्य गृहमगमत्। अपश्यच्च खेचरीमुद्रायां निरुद्धान् प्राणान् तस्य। अविलम्बमेव करुणाकरो जगद्गुरुस्तं खेचरीमुद्रातः समुद्धृतवान्। नेत्रे समुन्मील्य स स्वस्थः समृदश्यत्। ततः सद्गुरुस्तं गगनगुहामनैषीत्, यत्र गन्तुं स प्राणपणेन प्रयत्नवानासीत्। गगनगुहां प्रविश्य तत्रावस्थितः स पद्मतेश्वरो रामनामशक्तेर्महदद्भुतं चमत्कारं ददर्श। कठिनसाधनयाऽपि योगो यः सुदुर्लभः, तं स्वामिवर्योऽनायासमेव तस्मै सुलभं कृतवान्। स सद्गुरोश्चरणयोर्निपपात। 'अप्रमादं ध्यानयोगं कर्तव्यमि' त्युपदिश्य स्वामिवर्य आचार्याऽनन्तानन्देन सह ततो न्यवर्तत्।

"वरीयोऽयं गुरुजनः। गुरुस्त्वेवमेव भाव्यः। शिष्यस्य कल्याणार्थं रात्रिमविगणय्य त्वरितपदः समागतः। धन्योऽसावि"ति प्रशंसन्ति पद्मतेश्वरस्य कुटुम्बिनः।

अन्यदप्युदाहरणमुपलभ्यते। दिव्यसिद्धियुतानाप्तकामान् द्वादशादित्यान् (प्रमुखशिष्यान्) अतिरिच्याऽपि जगद्गुरोः स्वामिश्रीरामानन्दस्याऽन्येऽपि दीक्षिताः प्रिया शिष्या आसन्। नियमितरूपेण सत्सङ्गसेविनां श्रद्धालुजनानां गणनया किम्? ते तु संख्यातीताः। स्वामिवर्यः समभावेन सर्वेषु कृपादृष्टिं वर्षति स्म। सर्वेषां कष्टानि निवारयति। काश्यामेव 'घबरहरा' इति स्थाने जगद्गुरो शिष्यः दूधनाथो नाम ब्राह्मणः प्रतिवसति स्म। श्रवणकुमार इव सोऽपि पित्रोरपूर्वसेवायै काश्यां ख्यातिमगात्। एकस्मिन् दिवसे स कृष्णसर्पेण दंष्टः। विषप्रभावतः स निष्प्राणो बभूव। पुत्रस्याकालमृत्युना तस्य वृद्धौ पितरौ सकरुणं विलपन्तौ स्म। संवादोऽयं श्रुतौ यावत्प्रविशति तावदेव चरणोदकं दत्वा स्वामिवर्य एकं विश्वस्तं शिष्यं तत्र प्रेषयामास। मुखविवरे गतमात्रेण चरणोदकेन स दूधनाथः पुनर्जीवितः सन् नेत्रे उन्मीलितवान्। अनेन वृत्तेन स्वामिवर्यं प्रति जनानां श्रद्धा कीर्तिशिखरं चुम्बति स्म। अविश्वसनीयं सर्वथाऽसम्भवमपि कृतं दृष्टं काशीवासिभिः।

एकोऽपरोऽपि वृत्तान्तः सर्पदंशस्य। केदारेश्वरवसतौ निवसति स्म स्वामिचरणानां निष्ठावान् शिष्यः श्रीनागरः। सोऽप्येकदा सर्पेण दंष्टः। तस्य पत्नी शिरस्ताडनं करुणं बाष्पगद्गदं विलपति स्म। संवादमिमं श्रुत्वा स्वामिवर्यः तत्कालं तत्र गत्वा शङ्खध्वनिं चकार। शङ्खध्वनिना समाकृष्टः स भुजङ्गः नागरमुपसर्प्य नृत्यति स्म। स्वामिवर्यस्तं तर्जयामास– "कथं त्वयाऽस्याः पतिव्रतायाः तपस्विन्या पतिः दंष्टः? अचिरमेव तस्माद् विषं निःसारय।" स्वामिनिदेशतः स नर्तनं विहाय, यत्र दंष्टवान् तत एव विषं चुषति स्म। अल्पीयसैव कालेन श्रीनागरः चैतन्यो भूत्वा समुत्तिष्ठत्। सर्पस्तु स्वामिचरणयोरागत्य क्षमायै प्रार्थितवान्। स्वामिवर्यतः क्षमासङ्केतमवाप्य तूष्णीक एवाऽपसृतः। नागरदम्पती गलदश्रुभिः स्वामिपादौ क्लेदयतः स्म। "अस्माभिः क्लिष्टो भवानि" त्युक्त्वा कुटुम्बिनोऽन्ये च प्रतिवेशिनो वारं–वारं चरणयोर्निपत्य क्षमाप्रार्थनां कुर्वन्ति स्म। स्वामिवर्यस्य विराटौदार्यमसीमदिव्यशक्तयश्च गृहे–गृहे चर्चिता आसन्।

अनन्ताः खल्वद्भुतोपकारकथाः स्वामिवर्यस्य। तस्य प्राकट्यमेव जनकल्याणार्थम्। त्रिकालज्ञः स सर्वसमर्थो विभुः। कः कस्मिन् जन्मनि कस्यां योनौ कुत्रासीदित्येतत्सर्वं तस्याविदितं नासीत्। इन्द्रमणेरपि कथा एतादृशी एव। सा पूर्वजन्मनि अजाऽऽसीत्। कथमजाननाऽभूदित्यस्यापि वृत्तान्तः। कदाचिद् वर्षर्तौ सा क्वचिद् गङ्गतीरे हरितशाद्वले शष्पाङ्कुराण्यास्वादयन्ती विचरति। स्म। कवलान्यास्वाद्य जलं पातुं यावद् गङ्गायां प्रविशति तावन्महत्ता वेगेन सहसाऽऽगतेन जलौघेन प्रवाहिता मज्जनोन्मज्जनैः सा विलुलिता दूरंगता तीरोद्भवे कण्टकगुल्मे मुखाग्रतः संसक्ता

प्राणान् तत्याज। गङ्गायां प्राणोत्सर्गादस्मिन् जन्मनि मनुष्ययोनिमलभत। कण्टगुल्मसंसक्तमुख-संस्कारावशेषात्तस्याः मुखमजावदाकारं गृहीतवान्। इयमिन्द्रमणिकथा मनोविज्ञानेन सह शरीरविज्ञानस्यापि प्रश्नानामुत्तरं प्रस्तौति। अपि चेयं कथा गङ्गाजलस्य पवित्रशक्तिं प्रकाशयति तथ्यं चेदमुद्घाटयति यत् स्त्रीलिङ्गशरीरभागामिनि जन्मन्यपि स्त्रीलिङ्गतामेव परिणमति। अतः साऽजा कन्या जाताऽथ चास्या अभिख्या 'इन्द्रमणि' इति बभूव। अजावन्मुखाकृतेर्वशात् कुरूपेति न कश्चित्कुमारस्तां विवहते। वयःप्राप्ताऽविवाहिता कन्या गृहे तिष्ठतीति समे कुटुम्बिनो बान्धवाश्च चिन्ताकुला भृशं दुःखिता आसन्। अस्मिन् विषये किंकर्तव्यविमूढता आसीत्। अथ कश्चित्स्वजनः श्रीमठदर्शनार्थं सन्दिष्टवान्। तत्र श्रीमठाधीश्वरो महात्मा साक्षान्नारायण एव करुणावतारः। दीनान्स्निह्यति। दीनाश्रुबिन्दुभिः तस्य हृदयं हैयङ्गवीनमिव द्रवति। सर्वसमर्थः स स्वामिवर्योऽस्याननं शरीरानुरूपं मनोज्ञं चारुतरं विधास्यतीति निश्चप्रचम्। पितरौ कन्यकामिन्द्रमणिं यज्ञाग्न्यरणिमिवादाय श्रीमठं जग्मतुः।

मध्याह्नवेलायां स्वामिवर्यो गुहायामवस्थित आसीत्। कियत्कालं ते प्रतीक्षमाणास्तत्र तस्थुः। आचार्योऽनन्तानन्दोऽब्रवीत्- "अपराह्नकाल एव दर्शनं सम्भाव्यते।" चिन्तातुराणां शोकार्तानां क्षणमपि कालः युगमिव प्रतीयते। ते कालक्षेपं कथं सहन्ते। इन्द्रमणेः पितरौ करुणं चक्रन्दतुः। पिता तु गुहाद्वारे मस्तकमवष्टम्भ्य विललाप। लज्जावशादवगुण्ठनवती सा कन्या इन्द्रमणिः- 'मदर्थमेव सर्वमिदमनर्थमि'ति सञ्चिन्त्य ससङ्कोचमवनताङ्गी कातरीभूता मृगीव वेपते स्म। अपि नाम स महात्मा रोषावेशविवशो गुहातो निष्क्रम्य अस्मान् तिरस्करोति श्रीमठाच्च बहिष्करष्यति! इत्येवं सा नानावितर्कैः भीता ततोऽप्यधिकं वेपमाना भूविवरमन्वेष्टुमिवेस्ततो दृष्टिं ददाना समक्षं प्रवहमानां भागीरथीं ददर्श। 'अतः समुत्पत्य गङ्गाक्रोडे भवामीति' मनसि सोद्वेगं विचारः समुत्पन्नः। एष एव पितुः क्लेशनोदनोपायः मनसा एवं विचिन्तयन्ती अपि अङ्गैरविचेष्टमाना सा तत्रैव कीलितपुत्तालिकेव जडीभूता तस्थौ। असह्यं करुणरुदितं श्रावं-श्रावं दयाऽऽकर आर्तिहरः सेवापरः कल्याणकरः स्नेहभरो यतिवरो दिव्यनरो रामावतारो दक्षिणावर्तधरो ब्रह्मानुचरो महत्सद्भावनिकरः साधकवरः शान्तस्वरोऽपगतभवविकरः सदा विजरः सर्वदाविचरः सख्यसौख्यवितरःसदाशययतिवरः प्रदीप्ततेजःप्रखरः सर्वगुणप्रकरः स स्वामिप्रवरः सत्वरं गुहाद्वारावरणमपसार्य दर्शनं ददौ। दत्तदेहलीशिरोभागा सा कन्या इन्द्रमणिः प्रणम्य तस्थौ। चिच्छक्तिमाकृष्यसुषुप्तिनिक्षेपशक्तः शङ्खध्वनिर्गुहायां गुञ्जितः। इन्द्रमणेर्जनकः तत्क्षणमेव सुषुप्तिभावापन्नो बभूव। तस्यां भावभूमौ तत्सर्वं चलचित्रमिव बभौ यत्र तदजाशिरः कण्टगुल्मे निरुद्धमिदानीमपि संसक्तं तथैव स्थितम्।

दृश्यमिदं पश्यन्नेव स सामान्यावस्थामुपैति स्म। उवाच च- "प्रभो! नाहमस्याः भूतदर्शने समुत्सुको, दर्शयतु कृपयाऽस्याः शोभनं सुखदं भविष्यम्। वर्षत मयि दीनहीने विप्रे भवत्कृपादृष्टिः। येन केनाऽपि विधिना भवत्वस्याः पाणिपीडनमि"ति।

'सर्वः सर्वं समं पश्यत्वि'ति जीवमात्रस्य कृते सिद्धान्तपक्षपातिनः स्वामिवर्यस्य समदृष्टौ ब्राह्मणेऽब्राह्मणे नास्ति किमप्यन्तरम्। 'या प्रकृतिः सैव प्रवृत्तिरि'ति दिशा स तं ब्राह्मणं निष्प्रपञ्चमुपचारं दिदेश। ब्राह्मणस्तेन सङ्केतितः- "गच्छ तत्रैव गङ्गतीरस्थलं यत्राद्यापि तच्छुष्कमजामुखमस्थिमात्रावशिष्टं कण्टगुल्मे निरुद्धं तथैव वर्तते। तत्ततो निःसार्य कृतसंस्कारं तत्रैव भूमिं खनित्वा निधापय।" "यथाज्ञापयति भवानित्युक्त्वा" सुषुप्तिदर्शनबलेन तत्स्थानमन्विष्य तच्छिरः तत उद्धृत्य यथानिर्दिष्टं चकार। यावत् श्रीमठं प्रतिनिवृत्य पश्यति तावदिन्द्रमणेराननं चन्द्रमिव शोभते। इन्द्रमणेस्तु नूतनं जन्म। दम्पत्त्योरानन्दोल्लासस्येयत्तैव नासीत्। स्वामिवर्यमभिनन्द्य, चरणावभिवन्द्य श्रीमठे सर्वत्रोपहारप्रसादं वितरन्तौ हर्षोत्फुल्लौ तद्दिनं सौभाग्योत्सवमिवानुष्ठितवन्तौ। स्वामिवर्यस्यैवानुग्रहेण कन्याकाया इन्द्रमणेर्विवाहोऽपि सोत्सवं समपद्यत। ब्राह्मणदम्पत्ती कृतार्थौ कृतज्ञौ स्वामिवर्यस्याशीषामृतं पाय-पायं हर्षनिर्भरौ स्वगृहं गतवन्तौ।

अन्याऽप्येतादृशी घटना स्वामिनः श्रीमद्रामानन्दस्य दिव्यतां पुनरप्यधिकां यशोभाविनीमकरोत्। कदाचिदेकं वैश्यकुटुम्बकं कामरूपवनमार्गेण क्वचिद्गच्छति स्म। तत्रैकस्मिन् स्थाने सुमनोज्ञैका सारिका दृष्टा। सा तु 'रामानन्द-रामानन्द' इत्यजस्रं मधुरं रटति स्म। 'रामानन्द' इति मधुरमुच्चारणं श्रुत्वा, मनोहरां सारिकाञ्च दृष्ट्वा मुग्धा समाकृष्टा च वैश्यपुत्री सत्वरं तामुपसर्प्य करेऽकरोत्। सौम्या सा सारिका नोत्पतिता नापि धावमाना दूरं पलायिताऽपितु तया दारिकयाऽनायासमेव गृहीता। परमस्नेहेन सा वैश्यकन्या तस्यै बहूनि रुचिकराणि फलानि खाद्यान्नानि चादात् किन्तु सा न किमपि भुक्तवती। किन्तु यदा पायसं तत्समक्षं प्रस्तुतं, सा रुचिपूर्वकं तदभक्षयत्। अनेनाऽन्येऽपि जनाः सकुतूहलं तां प्रति समाकृष्टाः।

अथ वैश्यकुटुम्बकं तत्रोपलब्धजनान् सारिकाविषयेऽपृच्छत्। इयं विस्मयकारिणी सारिका यस्य रामानन्दस्य नाम रटति, अपि स कश्चिदत्र निवसति येनेयं पालिता स्याद्? इदमपि सम्भाव्यते, इयं सारिका पूर्वजन्मनि काचिन्मानुषी, यस्याः तेन सह कामनाऽपूर्णाऽवर्तत। तदानीमेव जनेष्वेकोऽब्रवीत्- "श्रूयते कश्चिन्महायोगीश्वरो रामानन्दः काश्यां श्रीमठाधीश्वरः। भवेन्नामेयं तस्यैव शिष्या पूर्वजन्मनि।" बलवतीयं सम्भावनेति विमृश्य कौतुकनिर्भरं तद्वैश्यकुटुम्बकं तां सारिकां पिञ्जरे निधाय काशीं प्रत्युन्मुखं वभूव। काशीं गत्वा, सम्पृच्छ्य सम्पृच्छ्य श्रीमठं जगाम। आचार्यमनन्तानन्दं सर्वं

वृत्तमाख्यातवान्। श्रुत्वाऽऽचार्योऽपि विस्मितो बभूव। सा सारिका निरन्तरं रामानन्दस्य नामजपं कुर्वती आसीत्। आचार्योऽनन्तानन्दो गुहाद्वारं गत्वेदं वृत्तं स्वामिवर्यं न्यवेदयत्। स निर्दिष्टवान्- "उद्घाटय पिञ्जरं, समुत्पततु सा मुक्ताऽऽकाशे" इति। तथाकृते सति सारिका समुत्पत्य गुहाद्वारेऽतिष्ठत्। स्वामिवर्यः स्वकं दाक्षिणावर्तं शङ्खं दध्मौ। निमेषमात्रेण सारिका रूपयौवनसम्पन्नाऽनिन्द्यसुन्दरी मानुषी समपत्स्यत्। सा कमलकुड्मलनिभेन कराञ्जलिना स्वामिवर्यं प्रणम्य प्रार्थयामास- "जयतु जयतु जगद्गुरुः स्वामिश्रीरामानन्दः। हे देव! हे पुरुषोत्तम! हे योगिराट्! हे पातकापहारिन्! पुण्यदर्शन!! भवानेव मामत्राऽनैषीत्। अहं तु तत्र कामरूपपालिकैः क्षेत्रबद्धा निरुद्धा। स्वकं प्रियतमं गौतममन्विष्यमाणा भ्रान्तपथिका तत्र सम्प्राप्ता। मन्त्रसिद्धिबलेन बलात्ते मां खगयोनौ निपात्य स्थापितवन्तः। अधुना भवानेव मह्यं किन्नरीकायां दत्वा गौतमेन सह योजने प्रभवन्ति।" तस्या इयं प्रार्थनां श्रुत्वा स्वामिवर्यो बहिरागतः। तस्य दिव्यदर्शनेनैव सा पुनः किन्नरी बभूव। वस्तुतः पूर्वं सा सारिका उषा किन्नरी आसीत्। स्वामिवर्यः सानुक्रोशमादिष्टवान्-गच्छ तत्रैव स्वकं किन्नरलोकम्। तव प्रियतमः तत्र त्वां प्रतीक्षते।" एतच्छ्रुत्वा सा स्वामिचरणावुपस्पृश्य, वैश्यकुटुम्बकमभिवाद्य सत्वरमेवान्तर्दधौ।

सा वैश्यपुत्री, यया सारिका गृहीताऽऽसीत्, 'किमिदमतर्कितं संवृत्तमि'ति विस्मिता सती स्मिताननाऽऽसीत्। अनेन चमत्कारेणाभिभूतः सोऽपि वैश्यः सकुटुम्बकं स्वामिवर्यस्य शिष्यत्वं गृहीतवान्।

अस्त्युत्तरस्यां दिशि देवतात्मा हिमलायो नाम नगाधिराजः। तस्यैव हिमालयस्य कन्दरासु नैके महात्मानः शताधिकैर्वर्षैः साधनारताः तस्याः परमात्मशक्तेः दर्शनकामनां पोषयन्ति। कनकावदातकान्तं शरीरं चर्मवलिषु परिवर्त्यते, वर्धमाना मूर्धजाः शरीरावरणवस्त्राणि भवन्ति, अशेषयोगमुद्राणामभ्यासः स्वत एव श्रान्तो भवति किन्तु नाप्नुवन्ति स्वकीयं लक्ष्यं, हिमशिलासु तिष्ठति केवलं गलितं शरीरम्। स्वामिनः श्रीरामानन्दस्य समकालिको वृद्धतमश्चैको योगी गोहिणनाथो हिमालये तपश्चरति स्म। देवभूमौ हिमालयेऽपि स शाश्वतानन्दप्राप्तेर्वञ्चित आसीत्। स्वामिनः श्रीरामानन्दस्याद्भुतशब्दसुरतियोगस्य प्रशंसा तस्यापि श्रुतिगोचरतां गता यज्जटिलकठिनसाधनां विनाऽपि प्रेमाभक्तियोगेनैवाऽऽत्मक्षात्कारसुखमश्नुते। स स्वामिवर्यस्य दर्शनार्थं हिमवतः श्रीमठमाजगाम। यदा स श्रीमठे प्रविष्टस्तदानींस्वामिवर्यस्तु ध्यानस्थ आसीत्। 'विलम्बः खलु दर्शने' इति मत्वा स कन्दराद्वार एवाऽऽसनं साधयित्वा सप्राणायामं सूर्यमयीमुज्जायीं शीतलीभस्मिकां भ्रामरीं

केवलीश्च मुद्राः योगशास्त्रदिशा वारं-वारं धारयति स्म। अथ शङ्खध्वनिर्गुञ्जितः। तस्य शङ्खध्वनेः श्रवणमात्रेण योगिनो गोहिणनाथस्याऽन्तर्गुहायां सूक्ष्मः प्रकाश उदेति स्म, येन मोहतमो विगलितः। स्वामिवर्याय किमपि गोपनीयं नासीत्। स गुहाऽऽवरणमपसार्य गोहिणनाथस्याऽन्तिकं गत्वाऽब्रवीत्- "एतावत्प्रदर्शनं न युज्यते। पञ्चधारणे शाम्भवीमुद्रासु च सिद्धो जालन्धरमुद्रां नापेक्षते।" जगद्गुरोर्वचनं निशम्य गोहिणनाथो विहस्याऽवादीत्- "नमो नमः श्रीसद्गुरवे। अयं बालको श्रीगुरोः समक्षमद्यावधिपर्यन्तं पठितं पाठं प्रस्तौति स्म यतो हि तान्निरीक्ष्य गुरुः तस्मै अग्रिमपाठदानाय प्रसीदतु।" योगिनो गोहिणनाथस्य चातुर्यमयं विनीतमुत्तरं श्रुत्वा स्वामिवर्यः परं प्रीतोऽभवत्। योगिनो निराभिमानित्वं स्वामिवर्याय भृशं रोचते स्म। सोऽब्रवीत्- "कृत्रिमैस्साधनैरधिगतमभीष्टं वस्तु तदधीनमेव। प्रेमद्वारेणागतं वस्तु, न केवलं निरपेक्षमपितु शाश्वतं भवति।" योगी सप्रश्रयमुवाच- "तामेव प्रेमाभक्तिमवाप्तुं हिमवतः प्रस्थाय भवत्सेवायामागतोऽस्मि। अनुगृह्णातु माम्। अङ्गीकरोतु माम्।" जगद्गुरुः सस्मितं प्रोवाच- "प्रेम तु नेत्रद्वारेण हृदयं प्रविशति। नेत्रावरणभूतामेतां पक्ष्मरोमावलीं लम्बमानामपनयतु तावत्।" यावत्स गोहिणनाथ उभयतो हस्ताभ्यां पक्ष्मलोमावलीं विधृत्योन्मुक्तनेत्राभ्यां स्वामिवर्यमपश्यत्, सद्य एव तत्रैव समाधिस्थो बभूव। आत्मस्थभूताय तस्मै स्वामिवर्यः तमशेषानन्दामृतकलशं समर्पितवान् यं योगिराजो हिमालयतपोभिर्नाप्नुवत्।

उन्मुद्रिते समाधौ, गोहिणनाथः परमं कार्तज्ञं प्रदर्शयन् स्वामिवर्यमुवाच- "महात्मनां महत्तमो भवान्। भवन्तं नित्यं सेवते परमा सिद्धिः। मया खलु व्यतीतमधिकांशं जीवनं हिमवत्कन्दरासु तपस्यन्। तमेव मां भवान् प्रेमयोगिनं निर्माय भगवता श्रीरामेण सह नित्यमयोजयत। आत्मानन्दस्यैषा स्थितिः सदैवाऽक्षुण्णा स्यादिति सोत्कण्ठितं मे मनः।"

"इयमेव विरहकारता खलु जीवितमस्ति प्रेमाभक्तेः। निरन्तरं तल्लीनः सन् तन्नामजपनिष्ठो भव। ध्यानसमाधिपारावरे निमग्नो भव। सोऽपि त्वां नैव त्यक्ष्यति। अचिन्त्या शक्तिरस्ति नाम्नः। श्रीरामस्तु बुभुक्षितोऽस्ति, आकाङ्क्षति तत्प्रेम।"

योगी गोहिणनाथः कियद्दिनं यावदुपास्य श्रीमठं, शब्दसुरतियोगमयीं रामभक्तिं हृदयस्थां कृत्वा जगद्गुरुणा दीक्षितः श्रीमठकीर्तिप्रसारणाय निर्ययौ।

जीवो यावत्प्रकृतेस्त्रिगुणमयीमायावशीभूत आत्मनः स्वरूपं विस्मृत्याऽहङ्कारदृप्तो विचरति, तावत्स परमार्थमार्गं न पश्यति। कस्यचिद्गुरोः शुभाशिषा, सत्सङ्गस्य वा प्रभावेण, परमात्मनः वा कृपयाऽथवा प्रारब्धवशान्मनो यदा भौतिकाकृष्टि-

कौशेयरज्जुबन्धनं विकर्त्य, पञ्चज्ञानेन्द्रियाणां प्रभविष्णुताया विमुक्तोऽन्तर्जगति विचरति तदा वैराग्योत्कर्षेण बुद्धिरात्मस्था भवति। एतादृशो मनुष्यो जीवितावधावेव परमात्मतत्त्वं लभते। अतोऽविदितज्ञानविज्ञानयोगानां पाश्चात्त्यानामग्निपूजकानां (पारसीकानां) तेषामार्याणां गुरुः 'करोविया' नाम, तस्य शिष्यो मंगीपुरोहितः स्वामिवर्यस्य जगद्गुरोः श्रीरामानन्दाचार्यस्य कीर्तिवल्लभां सिद्धिप्रखरप्रज्ञां श्रुत्वा, गुरुणाऽनुमतः श्रीमंठमाजगाम। यदा स श्रीमठे प्रविष्टस्तदातत्र सत्सङ्गस्योपक्रम आसीत्। स स्वामिवर्यस्य पादयोः प्रणतिं निवेद्याऽत्मपरिचयपुरस्सरं प्रोवाच- "निष्पापोऽस्मि मनसा कायेन च। परमार्थमभिज्ञातुं श्रीमतश्चरणसेवायामुपस्थितोऽस्मि।" स्वामिवर्यस्तं प्रबोधितवान्- "परमार्थस्तु निरभिमाननं जनमन्विष्यति। अतोऽहङ्कारमुक्तो भव। 'निष्पापोऽस्मी'ति यो दुरभिमानस्ते मनसि शेते, तं बलादपसारय।" मंगीपुरोहितेनोक्तम्- "अहंकारस्तु प्रकृतिरेव। स मम बुद्धेर्विकारोऽपि। तं दूरीकर्तुं भवानेवार्हति। तथाकर्तुमसमर्थोऽस्मि।" "भवतु नाम। पश्य तं निर्द्वन्द्वं निबद्धकिङ्किणीचरणं प्रसादसदनं निर्विकारवदनं स्मित्युल्लसितरदनं परमार्थभक्तिसुधासागरेनिमग्नमलौकिकमेकान्तसेविनं जनं; गच्छ, गत्वा च चुम्ब तस्य चरणम्। सर्व एव खलु तेऽभिमानो विगलिष्यति।" निष्ठावान् भक्त इव सद्गुरुणा निर्दिष्टमतर्कितं शिरःसंधार्य यावन्मंगीपुरोहितस्तमुपसृत्य चरणं चुम्बितुं चेष्टितवान् तावत्स साधुः सहसोत्थाय मंगीपुरोहितं कण्ठेनाश्लिष्य तस्थौ। द्वयोरेव निष्पापमानसयोरिदमासीन्निश्छलस्नेहमिलनम्। 'निष्पापोऽस्मी'ति योऽहङ्कारो मंगीपुरोहितस्य मनसि समाविष्ट आसीत्स कर्पूर इव स्फुरीभूत्वा तिरोहितो विनष्टः। मंगीपुरोहितो बहुधा चेष्टितवान् तस्य चरणं चुम्बितं किन्तु स स्वोरसा दृढं संश्लिष्य तं धृतवान्। नेत्राभ्यां निरन्तरं निर्झरद्भिर्भक्त्यस्रजलसीकरैस्तं स्नापयति स्म। अपूर्वं तन्मिलमासीद्येन द्वयोरपि हृदि निविष्टमज्ञानतमस आवरणं निराकृतम्। द्वावपि जनौ स्वहृदये शुद्ध-बुद्धात्मनो दर्शनं कृत्वा धन्यतां गतौ। द्वावपि परमार्थलाभस्याधिकारिणौ सञ्जातौ।

सत्सङ्गान्निवृत्य स्वामिवर्यो गुहायां प्रविष्टः। तमनुसृत्यैतौ द्वावपि गुहाद्वारं यावज्जग्मतुः। ततः परं द्वावपि स्वामिवर्यस्य शिष्यौ बभूवतुः।

सद्गुरो रामानन्दस्याऽऽध्यात्मिकीं शक्तिमप्रतिमां दृष्ट्वा द्वावपि भृशं विस्मितावास्ताम्। एकस्य शिष्यस्य चेतनाऽपरस्य शिष्यस्य देहे कथं स्थापयित्वा द्वयोरपि समः प्रवाहः साधितोऽपि च दूरस्थेष्वपि शिष्येषु कथमध्यात्मशक्तिसन्निवेशः कुरुते! स्वामिवर्यो मंगीपुरोहितं, 'स्वदेशं गत्वा तत्रैवाध्यात्मसाधनाऽभ्यासः कार्यं' इति सन्दिष्टवान् किन्तु स तथाकर्तुं नेच्छत्। अतः सद्गुरोरनुज्ञां समवाप्य स भारतदेश

एवातिष्ठत्। स्वकीयं गुरुं करोवियामहोदयं प्रत्यपि स्वनिश्चयं प्राहिणोत्। एवं विदेशेष्वपि जगद्गुरो रामानन्दस्य दिव्यता गृहे-गृहे व्याप्य प्रासरत्।

चन्द्रगुप्तमौर्यस्य शासनकाले यूनानदेशस्य सम्बन्धो भारतदेशेन सह प्रगाढो बभूव। यूनानदेशीयोऽन्तोलियो एशीमतावलम्बी साधुरासीत्। स बालरूपं भगवन्तमाराधति स्म। स पाटलिपुत्रनगराद् दूरं क्वचित्कान्तारस्यैकान्तस्थाने निवसति स्म। एकदा स रुग्णो जातः। तस्य दशा शोचनीया संवृत्ता। उपचारस्य न कोऽपि प्रभावः। स जीवनमृत्योर्मध्ये संघर्षमाणोऽन्ततो प्राणान् तत्याज। स अकाल एव मृत्युं गतः। 'यदि कस्यचिदकारणमृत्युर्भवति, तस्य वासना अपूर्णास्तिष्ठन्ति' इत्यनुश्रुतिः। अपूर्णवासनोपेतानां मृतानां जीवानां न मुक्तिर्न च पुनर्भवः। विदेहोऽपि सोऽपूर्णवासनाकारणात् प्रेतयोनौ भ्रमति। अन्तोलियोसाधोः प्रेतात्मा यदा हिमालयाद्रौ भ्रमति स्म तदा स्वामी रूक्मानन्दो मिलितः। स सर्वमात्मवृत्तं स्वामिश्रीरूक्मानन्दं न्यवेदयत्। रूक्मानन्दस्तस्य प्रेतावस्थायां दुर्दशां विलोक्य द्रवितः सन्नुवाच- "यदि त्वं प्रेतयोनेर्मुक्तिं वाञ्छसि, एवमेव गच्छ काश्यां श्रीमठाधीश्वरस्य योगिवर्यस्य श्रीमद्रामानन्दस्य सन्निधौ। स कृपालुः सर्वकल्याणकरः सकलजनपीडाहरः सुविमलभक्तिधर इति श्रूयते। योऽपि तं शरणं गच्छति, तस्योद्धारो निश्चप्रचम्। तवाऽप्युद्धारस्तस्यैव करादिति। रूक्मानन्दस्य परामर्शतः स प्रेतात्मभूतोऽन्तोलियो काशीं गत्वा श्रीमठस्योपरि चक्रवद्व्यावर्तते स्म। किन्तु पर्याप्तकालं यावत्परिभ्रम्याऽपि स स्वामिवर्यस्य दर्शनं नालभत। तं सततं व्यावर्तमानं दृष्ट्वा स्वामिवर्यस्तमाहूतवान्। तत्कालमेव गत्वा स स्वामिवर्यमभिनन्दति स्म- "हे भवसागरोत्तारकर्णधार! हे दीनवत्सल महाप्रभो! हे अशरणशरण! तवैव चरणयोः प्रपन्नोऽस्मि। शरणागतं दीनमिमं मामभिरक्ष। प्रेतयोनितो मामुद्धृत्य मयि कृपां विधेहि। मह्यं सद्गतिं देहि।" स्वामिवर्यस्य जीवनप्रयोजनेष्वेको लोकसङ्ग्रहोऽपि। तमाश्वासयन् सोऽब्रवीत् "अलमत्युद्वेगेन। दर्शनं दत्वा रूक्मानन्दस्त्वामत्र सम्प्रेष्य खलु महतीं कृपा कृतवान्। वस्तुतस्ते भाग्योदय एषः। महात्मदर्शनं त्वीश्वरदर्शनमेव। तद्दर्शनमात्रेणैव व्याधयो विनिर्वतन्ते। विपत्तयोऽपयान्ति। अभीष्टप्राप्तिर्भवति। न काऽपि कामनाऽवशिष्यते। ततस्तन्मूलावस्थानमविलम्बसहम्।" इत्येवमुक्त्वा सोऽभिमन्त्रितेन जलेन तं न्यषिच्यत्। स प्रेतयोनित उन्मुक्तो भूमाप्रकाशराज्यं प्राविशत्। सिद्धलोकं प्राप्तवान्। अन्तोलियोप्रेतस्येयमुद्धारकथा युनानदेशपर्यन्तं व्याप्नोत्। स्वामिवर्यस्य श्रीमद्रामानन्दस्य सिद्धत्वस्य, दीव्यत्वस्य वैदुष्यस्य च ख्यातिर्दूराद्दूरतरं जगाम। यथार्थतया स जगद्गुरुरिति सर्वैःस्वीकृतम्।

न केवलं प्रेतपीडितानामेव मुक्तिरपितु स्वामिवर्यो भ्रष्टकामुकतान्त्रिकेभ्योऽपि समाजं ररक्ष। 'माझा' इति स्थानस्यैका 'वीनी' नाम्नी विप्रकन्या कापालिकानां मोहजाले निपतिता तन्त्रविद्यामधिगतवती। किन्तु तैः कापालिकैः सा नित्यमेव 'योगमाया' स्वच्छन्दं प्रयुक्ता। अतस्तस्यां कामुकत्वं सातिशयमीदृशं प्रवृद्धं यत् सा निशीथे प्रगाढतया सुप्तवान् मनोऽभिलाषितान् युवानः प्रगृह्याऽनीय चक्रनायकान् निष्पाद्य स्वकीयामतृप्तवासनां पूरयति स्म। सा 'वीनी'ति कन्याऽऽसीदनिन्द्या सुन्दरी। तस्याः कनकावदातकमनीयकलेवरे यौवनमदच्छलेन परिपीतमधु इव मधुसहायः कामिनीकान्तैकान्तसखः कामदेवो ललितललितं लुलितवलितं क्रीडति स्म। साऽनुदिनं रात्रौ स्वरूपवयोऽनुरूपं कमपि मृग्यं युवानं गवेषयन्तीतस्ततो, वीथीषु, भवनेषु, हर्म्येषूपवनेषु तन्त्रशक्त्या विचरति स्म। एकस्यां रात्रौ काशीपुर्यां विचरन्ती साऽपश्यदेकं सुबलिष्ठं देवोपमं सौन्दर्यशालिनं युवानं पर्यङ्के शयानम्। सा तस्यानुपमं पञ्चमहाभूतैर्निर्मितमपि किमप्यनिर्वचनीयशोभाविराजितं सकलसौन्दर्यद्रव्यैराराधितं कोटिकामदेवाऽपराजितं ब्रह्मणा स्वहस्तेनेव प्रसाधितविकचराजीवराजिराजितमुरः-श्वेतदुकूलवेष्टितशरीरं दर्शं दर्शं विमुग्धा पूर्णचन्द्रदर्शनेन सागरलहरिकेव लीलायमाना तन्त्रविद्याबलेन तं प्रसुप्तमेवाऽपहृत्य 'माझा'ऽवस्थितं स्वगृहं निभृतमानीतवती। सा तं चक्रनायकं निर्माय नित्यमेव तेन सह रमते स्म।

अत्र काश्यामपरेद्युर्विभातकाले तस्य शयनकक्षे रिक्तं पर्यङ्कं विलोक्य, गृहेऽपि तस्याऽभावमनुभूय कुटुम्बिजनाश्चिन्तिताः शोकाकुला इतस्ततस्तमन्वेष्टुं कृतभूरिप्रयत्नाः प्रतीक्षमाणास्तस्थुः। क्वापि गतो भवेत्स्वमेवागमिष्यतीत्याशाऽपि नैराश्यमालिङ्गितवती। अन्येषु नगरेषु, समीपवर्तिग्रामेषु, सम्बन्धिनां मित्राणाञ्चावस्थानेषु सर्वत्रान्विष्य श्रान्ता हताशास्ते रक्षिप्रधानमावेद्य प्रार्थितवन्तोऽन्वेषणाय। तान्त्रिक-मान्त्रिक-दैवज्ञानामुपाया अपि विफला एव। देवायतनेष्वपि पूजापणाः सङ्कल्पिताः किन्तु तस्यागमनं नाभूत्। 'म्रियमाणः किं न करोती'ति न्यायेन येनाऽपि यत्कथितं तत्सर्वमनुष्ठितम्। 'तस्य गृहस्य दीप्तशिखोज्ज्वलो दीपः कथं कुत्रान्धे तमसि विलुप्त' इति प्रश्नमुत्तरितुं कोऽपि न शशाक। एवं शोकसागरे निमग्नान् कुटुम्बिजनान् कश्चित् प्रतिवेशी सहानुभूतिखिन्नहृदयः सदयं जगाद- "अस्ति श्रीमठाधीश्वरो यतिवरो योगिराट् सिद्धो महात्मा श्रीमद्रामानन्दः। तं शरणं गच्छन्तु। सोऽवश्यं कल्याणं विधास्यती"ति। 'हारे को हरिनाम' इति भाषोक्तिं चरितार्थयन्तस्ते मुख्यकुटुम्बिजनाः श्रीमठं जग्मुः। आर्तस्वरैः क्रन्दन्तस्ते सर्वामपि व्यथाकथां स्वामिवर्यं कथितवन्तः। 'गृहस्यैकमात्रं दीपज्योतिस्तिरोहितमि' त्यप्रियां दुःखदां वार्तां श्रुतिगोचरं कृत्वा स्वामिवर्योऽपि भृशं

शुशोच। 'तं शरणमुपेत्य कश्चिदनिवारितदुःखः स्यादिति कथं सम्भाव्यते? अनेन श्रीमठस्य महिमा हीयत' इति विमृश्य स्वामिवर्यो नेत्रे निमील्य यावद् ध्यानयोगेन पश्यति तावत्स युवजनो 'माझा' वसतौ तान्त्रिकयुवतिपरवशः पर्यङ्के निषण्णो दृष्टः। "पुत्रस्ते हस्तगतः" इति महायोगिनः स्वामिवर्यस्य मुखात्सहसा निःसृतः। एतच्छ्रवणमात्रेणैव तुषारदग्धेषु राजीवदलेषु समागता श्रीरिव, शुष्कप्रायेषु ब्रीहिपुञ्जेषु सद्योजलवर्षेण समागता हरीतिमेव सघनश्यामघनपटलात्सद्यो निःसृतचन्द्रस्य प्रभेव तेषामाननेषु विश्वासविशदप्रसन्नता रराज। कराञ्जलिं मस्तके कृत्वा तस्य पिता पप्रच्छ– "कुत्रास्ते तनयः। कदा वयं द्रक्ष्यामः। भवताऽनेन वचनेन सुधातृप्ता इव वयं पुनर्जीविताः। सर्वज्ञो भवान् साक्षादीश्वर एव।"

स्वामिवर्यः सधीरमुवाच– "तव पुत्रो 'माझा' इति ग्रामे 'वीनी' इति कस्याश्चित्तान्त्रिकयुवत्या अभेद्यसुरक्षाकवचे गृहे निरुद्धो वर्तते। तत्र गत्वा मया निर्दिष्टविधिना तस्या गृहमभिज्ञाय कमप्यपृष्ट्वैव तद्गृहं प्रविश्य पश्य निजं हृत्खण्डमपहृतं तया युवत्या। तत्र स पुत्रः क्वचिदेकस्मिन् सुसज्जिते भोगविलासविलासिते कक्षेऽर्धचेतनदशायां पर्यङ्कशायी। गच्छ तत्र, तस्योपधानस्याधस्तात् पुष्पमादाय तमाघ्रापय। स विगततन्द्रः समुत्थितस्त्वया सहाऽऽगमिष्यति। यदा त्वं तत्र गन्ताऽसि, तदा सा तन्त्रसाधिका 'वीनी' गृहे न भविष्यति। अतस्त्वं पुत्रेण सहाऽतिशीघ्रमेव ततः प्रस्थितो भव। कालातिपातं विना स पितृपुरुषः स्वामिवर्यस्य निर्देशानुसारेण 'माझा' ग्रामं गत्वा वीनीगृहमभिज्ञाय तत्र गत्वा सत्वरं तत्सर्वमकरोद्यद्यत् स्वामिवर्यो निर्दिष्टवान्। आप्तसञ्ज्ञः स पुत्रः पितरं सम्मुखं वीक्ष्य ससम्भ्रमं सकरुणं रुरोद पिता तमाश्वास्य, करेण विधृत्य सत्वरं 'माझा' ग्रामाद्विनिर्ययौ।

गृहं निवर्त्य वीनी यदा तं युवानं पर्यङ्के नाऽपश्यत्तदा तस्याः क्रोधस्य सीमैव नासीत्। सा तु तदानीं तप्तायसे निक्षिप्तस्तिल इव स्फूर्जवती। रोषावेशविवशा सा तान्त्रिकीं क्रियां कर्तुमारभत्। अचिरमेव क्रियायोगेन साऽजानत् यत्काश्याः श्रीमठाधीश्वरेणैवैत्सर्वं कारिताम्। ततः सा ज्वालामुखीव रक्तनयना झम्पावेगेन काशीमतिक्रम्य श्रीमठं प्राविशत्। दूरत एव तादृशीं तां विज्ञायाऽऽचार्योऽनन्तानन्द निरोद्धुं यत्नपरोऽभवत्। स्वामिवर्योऽपि तां विपद्वात्यां निराकर्तुं गुहास्थ एव शङ्खध्वनिं चकार। शङ्खध्वनिश्रवणमात्रेणैव वीन्याः सर्वं तन्त्रं निष्फलं कुण्ठितञ्च बभूव। स्वामिवर्यो योगमायया तत्समक्षं कानिचिद् भीषणानि त्रासपराणि दृश्यानि प्रदर्शितवन्तः। वीनी तेभ्यो भृशं भीता वेपते स्म। सा सामान्यस्त्रीव स्वामिनो दर्शनार्थं प्रार्थयामा-साऽऽचार्यमनन्तानन्दम्। गुहाद्वारं यावद्गत्वा कातरस्वरेण सा स्वामिवर्यं निवेदयामास–

"क्षम्यतां क्षम्यतां प्रभो! मां पापकर्मकारिणीमुद्धारयतु। पथभ्रष्टाऽहं, सन्मार्गोल्लंघिनी अहम्। अतः परमस्मिन् पापकलुषपङ्के पदं न दास्यामि। शरणागताऽस्मि। रक्षतु रक्षतु महायोगिन्! विनताऽस्मि, प्रणताऽस्मि। घोरे तमसि निमज्जितां मां प्रकाशदानेन कृतार्थतां नयतु" इति।

स्वामिवर्यो दृढस्वरेण तिरस्कुर्वन् तामब्रवीत्- "महाकालस्य सा तन्त्रशक्तिस्त्वया कलङ्किता। तंत्रमिति नाम्नि त्वं गर्हिता कलङ्कस्वरूपाऽसि।" वीनी न्यवेदयत्- "क्षम्यतां प्रभो! दुष्टकापालिकाः मां 'योगमाये'ति रूपां प्रयुज्य मयि तादृशीं कामवासनां प्रदीप्तवन्तो यदहं पुरुषं विना स्थातुं नैवाऽशक्नुवम्। सापराधाऽस्मि। भवानेव मामुद्धर्तुं प्रभवति। कृपया करोतु कल्याणम्। नियोजयतु परमार्थवर्त्मनि अभिरक्षतु माम्। त्रातु मां, पातु माम्। स्वामिवर्य उवाच- "माझा-ग्रामे कापालिकास्त्वां शान्तां न त्यक्ष्यन्ति। ते सन्ति महादुष्टाः। आसीदियं तन्त्रविद्या लोकमङ्गलाय किन्त्वेते वामाचारिणस्तां दूषितवन्तः। शक्तिस्वरूपां नारीं भोग्यामिति मन्वानास्ते नरपिशाचास्तां वामाचारे यन्त्रपुत्तलिकामिवोपयुज्य स्त्रीमर्यादां विधूयाऽऽर्यसंस्कृतिं दूषयन्ति। अतस्त्वमत्रैव कियत्कालं यावत्स्थातुमर्हसि। अत्र स्थित्वा मन्त्रदीक्षां गृहीत्वा शब्दसुरतियोगस्य सात्त्विकाभ्यासं कुरु। त्वं शान्तिं लप्स्यसे। अतोऽभिशापतो मुक्ता सती निर्विघ्नं परमार्थपथेऽग्रेसरिष्यसि।"

वीनी स्वामिवर्यस्य पदाब्जयोः पपात। कार्तज्ञभारेणाऽवनतदृष्टिस्तस्थौ। सद्गुरुनिर्देशमनुपालयन्तीं तां स्वामिवर्यः क्वचिद्विन्ध्यक्षेत्रं प्रेषयामास। वीनी तत्र गत्वा सद्गुरोः स्मरणपूर्वकं परमशान्तिमनुभूयमाना साधनायां निरता बभूव। पूर्ववृत्तं तस्याः सर्पस्य निर्मोक इव स्वयमेवापसृतम्।

प्रेतयोनेः राक्षसयोनेश्च परस्परं पार्थक्यमस्ति। प्रेताः नोद्वेजयन्ति जनान् किन्तु राक्षसयोनिसमुत्पन्नाः नानाविधं त्रायसन्ति जनान्। श्रीमंठस्यान्तिके कश्चित् कविः दुष्कर्मवशान्निन्द्यैराचरणैः कर्मभोगाय प्रेतयोनौ निपतितः। स मठस्य बहिरेव भ्रममानो निजोद्धाराय स्वामिवर्यं निवेदयति स्म। नित्यमेव प्रार्थयति- "हे कृपासिन्धो! करुणानिधान!! अहं मठं प्रवेष्टुं न प्रभवामि। बहिर्गत एव भूयो भूयः प्रार्थयामि, मां प्रेतयोनेरुन्मोचयतु। महती खलु ते सिद्धिशक्तिरचिन्त्या। भवतः कृपाकटाक्षस्य प्रतीक्षा मां विकलयति। शरणं दत्त्वा मुक्तिं वितरतु, तरत्वयं जनोऽधमः शोकसागरमि"ति।

'कोऽपि कष्टापन्नः सीदती'ति महात्मानः खलु न सहन्ते। सहजा हि तेषां करुणावृत्तिर्दयाशीलता च। स्वामिवर्यः श्रीमद्रामानन्दस्तस्य करुणमभ्यर्थनं श्रावं श्रावं दयार्द्रो बभूव। स प्रेतयोनेरुन्मुच्य स्वर्गं सम्प्रेष्य तमनुगृहीतवान्। सोऽपि प्रेतो मुक्तिं

लब्ध्वा येन देवविमानेन स्वर्गं प्रति गमनोद्यत आसीत् तद्विमानमुपगम्यैको ब्रह्मराक्षसः तमब्रवीत्– 'मामपि सहगामिनं कुरु, नय स्वर्गम्।' स्वर्गगमनोद्यतः सोऽब्रवीत्– 'नाहमेतत्कर्तुं समर्थः। राक्षसयोनेर्मुक्तिं विना स्वर्गं न लप्स्यसे। मुञ्च मां गमनाय। श्रीमठे तमेव स्वामिवर्यं शरणं गच्छ। तमेव निवेदय। स करुणाकरोऽहेतुकः कृपालुः। तवाऽपि कल्याणं तेनैव सम्भाव्यते।' किन्तु स मूढो जडमतिर्ब्रह्मराक्षसो नानुमन्यत्। देवविमानं विधृत्य गमनं रुरोध। ततः संक्षुब्धै र्देवदूतैर्भृशं ताडयित्वा निपातितः। स गङ्गातटे बालुकाराशौ निपतितो यावदुत्थाय पश्यति तावदेकः श्रेष्ठिपुत्रो गङ्गास्नानं कृत्वा सोपानमार्गमुपसरति। स ब्रह्मराक्षसः तच्छिरसमारुह्य (प्रविश्य) तस्थौ। दुरतिक्रमः खलु स्वभावः। ब्रह्मराक्षसाविष्टः स श्रेष्ठिपुत्रो गृहं गत्वाऽस्वाभाविकानि कृत्यानि स्वचरितविपरीतान्यारभत्। अथ च श्रेष्ठिकुटुम्बकं तेन ब्रह्मराक्षसेन भृशं पीडितम्। कदाचिद् भाण्डानि वस्तूनि चान्यानि निष्कारणं पतन्ति स्म। पर्यङ्कं स्वत एवोच्छलति स्म। दुग्धपूर्णं पात्रमकस्माद्रिक्तं भवति। वस्त्राणि सहसा प्रोज्वलन्ति। गृहे कदाचिद् दुर्गन्धवायुर्वहति। गृहाङ्गणेऽस्थिखण्डानि वर्षन्ति। क्वचिद् भुजङ्गो दृश्यते क्वचिच्च वृश्चिकाः। न जाने कुत आगत्य द्वारदेशे कुक्कुरा उच्चैर्बुक्कन्ति, एवमन्येऽप्युपद्रवाः सततमहर्निशं श्रेष्ठिगृहे घटन्ते स्म। त्रस्तो भीतः श्रेष्ठी तच्छमनाय लोकसिद्धानुपायान् कारयामास किन्तु नाभवच्छान्तिः। एकदा निशीथे स श्रेष्ठिपुत्र उच्चैरट्टहासं कर्तुमारब्धवान्। निरन्तरमट्टहासैः स क्षीणशक्तिर्निःसंज्ञोऽजिरेऽपतत्। परमभीता व्याकुलिताः पुत्रप्राण–संशिताः सर्वे कुटुम्बिजनास्तत्र समवेताः। शनैश्शनैर्लब्धसंज्ञः स समुत्थितः। व्याकुलत्रस्तनेत्राभ्यामितस्ततो विलोक्य ब्रह्मराक्षसः श्रेष्ठिनस्तनयमुखेनोवाच– 'ब्रह्मराक्षसोऽहं मुक्तिं कामये। भवन्त एतं बालकं श्रीमठे स्वामिनः श्रीरामानन्दस्य सेवायां नयन्तु। तस्य कृपयाऽयं बालकः स्वास्थ्यमुपैष्यति ममापि च मुक्तिर्भविता।' ते बालकं श्रीमठं नीतवन्तः। बालकाश्रयेण स ब्रह्मराक्षसोऽपि श्रीमठं सिद्धपीठं प्राविशत्। श्रेष्ठी सर्वं वृत्तान्तमावेद्य स्वामिवर्यं प्रार्थयामास पुत्रं ब्रह्मराक्षसस्य पाशादुन्मोचितुम्। स्वामिनं किमपि द्वैविध्यमाश्रितमालक्ष्य बालकमुखादेव ब्रह्मराक्षसः करबद्धप्रार्थनया विनिवेदितवान्– "प्रभो! अनुगृह्णातु माम्। अस्माद्राक्षसयोनेः समुद्धरतु।"

"कथं ते दुःसाहसः श्रीमठे प्रवेष्टुम्? असम्भवा हि ते मुक्तिः।"

एतन्निशम्य स ब्रह्मराक्षसो जगद्गुरोः श्रीचरणयोः लुठति स्म। "त्रातु मां पातु माम्। आर्तः किं न करोति पापम्? अक्षम्यमप्यपराधं क्षमन्ते महात्मानः। अधमयोनेः समुद्धारस्वार्थपूर्तये श्रीचरणानां दर्शनाकाङ्क्षया मद्भाग्यमेव बलादत्र नीतवान्। प्रसीदतु

प्रसीदतु प्रभो!" इत्युक्त्वा स उच्चैः करुणं रुरोद।

'कर्मभोगाय तवैकमपरं जन्म खल्वपेक्षते। श्रेष्ठमनवद्यं पवित्रं च कर्म ते मुक्तेः प्रमाणं भविता। इमं श्रेष्ठितनयं परित्यज्याचिरमेव श्रीमठाद् बहिर्गच्छ'।

सत्यनिष्ठस्य जगद्गुरोराज्ञां कोऽपलपितुं समर्थः? मानुषादारभ्य देवपर्यन्तं सर्वयोनिसम्भवास्तस्य निदेशे वर्तन्ते। स ब्रह्मराक्षसोऽपि, 'ननु न च' इत्येतं विनां स्वामिवर्यस्य पालितः श्वान इव यथादिष्टं पालयन् श्रेष्ठिसुतं सर्वात्मना विमुच्य शीघ्रमेव श्रीमठाद् बहिर्निर्गितः। अचिरादेव पुनः मानवयोनौ जन्म लब्ध्वा, मानवोचिताचरणैः धर्मकर्मनिष्ठाभिश्च पूर्वकृतं दुष्कृतपापं प्रमृज्य मुक्तोऽभवत्।

सर्वे देवगणा अपि योगिराजस्य श्रीमद्रामानन्दस्याऽऽध्यात्मिकीं शक्तिं सदैव नमस्कुर्वन्ति स्म। यतो हि देवयोनौ मोक्षप्राप्तिर्न विहिता। मोक्षप्राप्त्यर्थं मनुष्यजन्म काङ्क्षन्ति देवाः। तदपि भारतभूमौ जन्म स्पृहयन्ति। अस्त्येको विचित्रो वृत्तान्तः। लुम्बवाहनश्चन्द्रप्रभश्च विद्याधरौ शापग्रस्तौ काश्यां नन्दीश्वरवसतौ जातौ। विद्याधराः प्रायेण ललितकलाविशारदाः शृङ्गारप्रियाः कामवासनोपेता भवन्ति। अनयोः लुम्बवाहनचन्द्रप्रभयोरपि कामलिप्साऽवशिष्टाऽऽसीत्। तयोर्लुम्बवाहन एकां ब्राह्मणकन्यां प्रति चन्द्रप्रभश्चैकां वैश्यकन्यां प्रति समासक्तावास्ताम्। द्वावपि विद्याधरयुवानौ ते कन्ये विविधैर्लोभनीयोपहारप्रलोभनैराकारयतः। सततं तौ ते अनुधावतः। रूपलावण्यसम्पन्ने वयःप्राप्ते त एते कन्यके स्व-स्ववर्गीयैर्युवभिः प्रार्थ्येते। विवाहप्रस्तावा अपि आगच्छन्ति। किन्तु एतौ विद्याधरयुवानौ तयोर्विवाहेऽपि विघ्नमुत्पादयतः। येनाऽपि वरेण विवाहचर्चा प्रारभते, सोऽचिरमेव क्वचिन्मृतो भवति। कारणं तु सर्वथाऽविज्ञातं तिष्ठति। अन्ततस्तयोः कन्यकयोः पितरौ कृतभूरिप्रयत्नावपि लक्ष्यसिद्धिविफलौ, अनिष्टशङ्काग्रस्तौ, कमप्यन्यमुपायं न दृष्ट्वा स्वामिवर्यं शरणं गतवन्तौ। ताभ्यां दर्शनं दत्वा स्वामिवर्यस्तयोर्व्यथाकथां श्रुतवान्। अथ च कारणं विज्ञातुं ध्यानस्थोऽभवत्। ध्याने तौ द्वावपि विघ्नकारकौ विद्याधरदारकौ दृष्टिपथे समायातौ। तौ तु कुलीनवंशधरौ विद्याधरौ देवयोनिचरौ। योगशक्त्या स्वामिवर्यस्तौ द्वावपि तत्रैवाहूतवान्। विवशाविव सद्यस्तौ तत्रादृश्यतया समुपस्थितौ। स्वामिवर्यस्य गुप्तसङ्केततस्तावदृश्यरूपं विहाय साक्षाद्विग्रहवन्तौ बभूवतुः। तयो रूपलावण्यमप्रतिमं विलोक्य, सामुद्रिकं च परीक्ष्य कन्यापितरौ, स्वामिवर्यकृतेन सद्भावेन भावितान्तःकरणौ, कन्यायै सर्वथोपयुक्तौ वराविति सङ्कल्पितौ। स्वामिवर्योऽपि स्निग्धे रसे माधुर्यं मिश्रयन् प्रोवाच- 'कन्या वरयते रूपं, माता वित्तं पिता कुलम्। एतद् दृष्ट्या प्रवरो वरो खल्वेतौ। दुर्लभोऽयं संयोगः। दुर्लभा एतादृशा वराः।' जगद्गुरोर्वचनप्रसादेनाऽभीष्टं

पुनरपि पुष्टमभवत्। स ब्राह्मणः सोऽपि वैश्यो गृहं गत्वा स्व-स्वकन्यकामानीतवन्तौ। 'महान् खलु स्वामिवर्यस्य कृपाप्रसाद' इति मनसा विमृश्य द्वावपि विद्याधरौ स्वामिनः श्रीचरणयोर्विनतौ तस्थतुः। श्रीमठाधीश्वरस्य जगद्गुरोराज्ञया आचार्योऽनन्तानन्दश्चत्वारि प्रसादमाल्यानि समानीतवान्। परस्परं माल्यार्पणं कृत्वा ब्राह्मणकन्या लुम्बवाहनं तथा च, वैश्यकन्या चन्द्रप्रभं वरयामास। गुरुजनानामाशीर्वचोभिर्महात्मनां च मङ्गलाशिषैः सानन्दं दाम्पत्त्यबन्धनमनुष्ठितम्।

स्वामिवर्यस्य परमकृपया सम्पन्नेनानेन विवाहद्वयेन स्वर्भूलोकयोः सम्मेलनं श्रीमठे सम्पद्यमानं दृष्ट्वा सर्वे प्रमुदिता आसन्। पुनश्च नन्दीश्वरवसतौ द्वयोरपि कुटुम्बे महताऽऽमोदेन समारोहौ समायोजितौ।

बहुकालपर्यन्तं दाम्पत्त्यसुखमुपभुज्य लुम्बवाहनश्चन्द्रप्रभश्च भार्याभ्यां सह नानाविधान्युपहारवस्तून्यादाय श्रीमठमाजग्मतुः। स्वामिवर्याय दिव्यगन्धपूरितं मधुरामृतसमं सुस्वादुपायसं, श्रीमठस्थेभ्योऽन्येभ्यः सज्जनेभ्यः स्वर्णरजतपात्रेषु मिष्टान्नान्यपूपाः फलानि चासन्। युगलद्वयं स्वामिवर्यस्य चरणयोः विनतः सन्नभिनन्दितवान्। वारं वारं नानाविधैर्जगद्गुरुं स्तौति स्म। नीराजनं निर्वर्त्य समानीतमुपायनं समर्पयामास।

अथ लुम्बवाहनः कार्तज्ञपूर्वकं योगीश्वरं निवेदयामास- 'प्रभो! भवतो पुण्यदर्शनं लब्ध्वाऽस्माकं रुचिर्भैतिकपदार्थेभ्यो विरता। 'निवृत्तिरेव परमं सुखमि'ति प्रतीयते।'

चन्द्रप्रभोऽपि न्यवादीत्- 'जगद्गुरो! देवलोकस्तु भोगपर एव प्रसिद्धः। 'भोगमयो हि स्वर्गः' इत्युच्यते। देवगणा भोगेभ्यः समुद्भूता भोगेष्वेव लीयन्ते। भवतः सकाशं देवदुर्लभं सुखं विराजते।'

'सन्त्येव ऋषयो देवलोकेऽपि। तत्रैव भवन्तौ तैरेव दीक्षितौ भवेताम्।'

'यः सिद्धः पुरुषोत्तमऽस्मत्कल्याणकामी, आवाभ्यां दाम्पत्त्यं प्रसादीकृतम्, योऽस्मन्मानसे निवृत्तिबीजं व्युप्तवान्, तं विहायाऽन्यान्वेषणं तु कामधेनुं विहाय अजामार्गणमिव प्रतिभाति।' एवं लुम्बवाहनेनार्धोक्ते चन्द्रप्रभस्तस्मिन्नेव वचसि स्वमतमनुस्यूतवान्- 'लोकत्रयेऽप्यप्रतिमप्रभावोऽवाभ्यां न दृष्टो भवत्सदृशः कोऽप्यन्यः सिद्धो महात्मा। देवानामपि देवो भवान्। न केवलं मानवानां कृतेऽपि तु देवानामप्युद्धाराय भवदवतरणम्। देवा अपि मुक्तिकामनया भवद्दर्शनार्थं भारतभूमौ जन्म गृह्णन्ति।' एवमन्यैरपि वचोभिः साधु सूक्तिभिर्द्वावपि विद्याधरौ बहुशः स्तुतवन्तौ। मधुसिक्तविरुदसम्भववचनेषु वैश्यचातुर्यं विलोक्य स्वामिवर्यः स्मिताननो बभूव।

क्षणं द्वयोरपि मुखभावं निरीक्ष्य परीक्ष्य च योगीश्वरः प्रसन्नवदनः प्रोवाच– 'स्वागतार्हा हि युवयोर्विरक्तिकामना। नैजं सुखं परित्यज्य मानवमात्रस्य किं वा जीवमात्रस्य सुखार्थं समर्पयतं निजायुशेषम्।'

द्वावपि दम्पत्यौ स्वामिचरणयोश्शिरोनिधानपुरस्सरं तस्योपदशमभिनन्दितवन्तौ यथाकालं युगलद्वयाय नैष्ठिकवैराग्यदीक्षां प्रदाय स्वामिवर्यस्तदात्मदर्शनसुखं निनाय यत्र कामस्य प्रवेशलेशोऽपि नास्ति। आदिष्टवान् च–

'चित्रकूटं गत्वा वनवासिनां सेवाविधानं कृत्वा पुण्यनिधानं चिनुताम्। चित्रकूटे चिच्छक्तेर्विशदः प्रकाशः सर्वमश्नुते। स सनातनो ब्रह्मपदवाच्योऽनिर्वचनीयोऽपि सर्वसुलभोऽभिरामो रामस्तत्र सर्वत्र सदा विहरति समुपासितश्च हरति भवभीतिमि'ति।

स्वामिवर्यं शिरसा प्रणम्य तौ द्वावपि दम्पत्यो चित्रकूटं प्रति प्रस्थितवन्तौ।

(९)

आसीद् बहुकालादेव जगद्गुरोः स्वामिश्रीरामानन्दस्य मनसि धर्मयात्रासङ्कल्पः। प्राक्कृताऽयोध्या-यात्रा तु तस्या एव लघुतमं संस्करणम्। विधर्मिणां प्रभावोन्मूलनाय सनातनधर्मस्य च प्रचारप्रसाराय, जन-जन-हृदयेषु भक्तिबीज-वपनाय, भारतीयसंस्कृतेर्ध्वजोत्तोलनाय, सन्मार्गप्रवर्तनाय सुमहत्प्रयत्नो विधेय इत्युद्दिश्य समग्रेऽपि भारतवर्षे धर्मयात्रामाध्यमेन दक्षिणावर्तशङ्खनादो भवेत्। अतः स्वामिवर्यः प्रवरं शिष्यमाचार्यमनन्तानन्दं निजं धर्मयात्राविषयकं सङ्कल्पं सूचितवान्। अनन्तानन्दस्तु तस्यान्तेवासित्वेन सद्गुरोर्हृद्गतं सर्वं पूर्वत एव जानाति स्म। स शिष्यैः सह श्रीमठस्य व्यवस्थां निर्वोढुं सन्नद्ध आसीत्। श्रद्धालवो भक्ता अपि श्रीमठसेवायै प्रस्तुता आसन्। अतः श्रीमठस्य भारमाचार्याऽनन्तानन्दस्य स्कन्धयोर्न्यस्य स्वामिवर्यो निश्चिन्तः सन् धर्मयात्रां संयोजितवान्।

आचार्योऽनन्तान्दो लोकसङ्ग्रहरतौ प्रधानशिष्यौ श्रीकबीररविदासावाहूय जगद्गुरोधर्मयात्राविषयं तयोस्सह सविस्तरं विमृष्टवान्। पूर्वप्राप्तेषु निमन्त्रणेष्वपि गहनो विमर्शः प्राचलत्। महात्मनो राजर्षेः पीपाजीमहाराजस्य निमन्त्रणं सर्वप्रथमं विचारकोटिं समारूढः। प्राथम्येन गागरोनगढं-गन्तुं स्वामिवर्यस्याप्यभिलषितमासीत्। अतो गागरोनगढगमनस्य मार्गो विनिश्चितः। क्व क्व गत्वा किं किं तीर्थमवगाह्य तत्र गन्तव्यमिति सर्वं निर्धारितम्। सुखासनं शिविकायानं स्वामिवर्याय वरमतस्तदेव

प्रयोज्यमिति व्यवस्थितम्। सहयात्रिणः के के कियन्तश्चेति विचारणायां शिष्याणां ब्रह्मचारिणां सेवकानाञ्च षष्टिमिता सङ्ख्या प्रस्ताविता। यद्यपि स्वामिवर्येण सह गन्तुं शताधिकाः श्रद्धालवो भक्ताश्चाभिलाषिण आसन् किन्तु षष्टिमिता संख्यैव पर्याप्तेति स्वामिवर्योऽप्यनुमोदितवान्। एकः शिष्यः प्राक्सूचनार्थं गागरोनगढं सम्प्रेषितः।

इत आचार्योऽनन्तानन्दो गुरुभ्रातृभिः सह धर्मयात्रा-व्यवस्थायां व्यापृत आसीदुतः श्रीरामस्य कलिविग्रहः श्रीरामानन्दस्त्रेतायां लङ्काविजयाय प्रस्थानात्पूर्वं देवाधिदेवस्य महादेवस्य स्थापन-पूजनं स्मृतिपटले ददर्श। श्वः शिवरात्रिर्भवितेति विचिन्त्य तस्य मनसि धर्मयात्रापूर्वं भगवतो विश्वनाथस्य दर्शनपूजनार्थं महती समुत्कण्ठा समुद्वेलिता। आशुतोषत आशीर्वादग्रहणार्थं स रात्रेरन्तिमे प्रहरे ब्राह्ममुहूर्तादपि प्राक् तत्र विश्वनाथमन्दिरं ययौ। तदानीं द्वारं तु पिहितमासीत्। कश्चिद् देवलकः कश्चिद्वा दर्शनार्थी तावन्न दृश्यते स्म। इतस्ततः सूक्ष्मं निभालयन् कियत्कालं व्यतीत्य, यदा कोऽपि न दृष्टस्तदा निवर्तितुमियेष। किन्तु सहसा मन्दिरस्य कपाटौ स्वत एवोद्घाटितौ। द्वारमध्ये स्वयं नन्दीश्वरस्तस्य स्वागतार्थं स्थित इति दृष्ट्वा चकित-चकितो जगद्गुरुः श्रीरामानन्दाचार्यः प्रसन्नविकसितनेत्रो हर्षनिर्भरो जातः। यावत्स मन्दिरे प्रविशति तावद्भगवान् काशीश्वरो विश्वनाथो भगवत्याऽम्बिकया सह तमालिङ्गितुं प्रस्तुतो दृष्टः। द्वारदेशादेव विनतः श्रीमद्रामानन्दः प्रणतिमुद्रया जगतः पितरौ वन्दितुं कुड्मलाकृतिमञ्जलिं प्रसारितवान् किन्तु चरणस्पर्शात्प्रागेव विश्वेश्वरस्तमालिङ्ग्य निजदक्षिणपार्श्वे समुपवेशयामास प्रसन्नवदनश्चोवाच- "यः सकृदपि रामनाम मुखादुच्चारयति मनसा स्मरति वा तमहं त्रिवारं प्रणमामि। भवान् तु सततं तुरीयावस्थायां श्रीरामनामानन्दसागरे निमग्नस्तिष्ठति, कथं त्वां सत्करोमीति विज्ञातुं न प्रभवामि।"

प्रेमरसक्लिन्नवाचा श्रीमद्रामानन्दोऽब्रवीत्- 'त्रेतायां यथा भगवान् श्रीरामचन्द्रो दाशरथिर्भवन्तं सम्पूज्य, लङ्कामाक्रम्य रावणं विजितवान् तथैवेदानीं कलौ युगेऽहमपि भगवन्तं भवानीपतिं साक्षात्प्रार्थये यन्मम शिरसि हस्तं विन्यस्य मह्यं धर्मयात्राक्रमे दिग्विजयस्याऽऽशीर्वचोदानं प्रदाय कृतार्थतां नयत्वि'ति। यतो हि विकटोऽयं कालः। देशस्तु पराधीनतायाः शृङ्खलया जटिलमाबद्धः। विधर्मिणामाक्रान्तानामत्याचाराः वर्धमाना एवानुदिनमनुभूयन्ते। सनातनधर्मिणोऽपि विद्वांस आचार्या धर्मधुरीणाः परस्परमीर्ष्याद्विषैः समग्रं परिवेशं विषाक्तं कुर्वाणाः दृश्यन्ते। भवांस्तु विषपायी नीलकण्ठः। अतो मदीया धर्मयात्रा साफल्येन सम्पन्ना भवेदिति भवदनुग्रहप्राप्तेराकाङ्क्षयाऽत्र दर्शनार्थं समागतोऽस्मि। मङ्गलाशिषाऽनुगृह्णातु।'

स्मिताननो विश्वेश्वरः स्वदक्षिणहस्तं वरमुद्रयोद्यम्याऽशीर्वचःस्निग्धसुधया

स्नापयन्निव गभीरमुवाच– "स्वस्ति तेऽस्तु। शिवास्ते पन्थानः। सफलाः सन्तु मनोरथाः। विजयिनी भवेद् भवतो धर्मयात्रा। समस्तविरोधविकारोपशमनयन्त्रमिवायं दक्षिणावर्तः शङ्खस्ते करे विराजते। अतोऽधिकं किमपक्ष्यते?"

"भगवत्या सह सततसान्निध्यं भवतः" इत्युक्त्वा स पुनरपि प्रोवाच– "कलिकालस्तु मया प्रथममेव निवेदितः पथि साहाय्यं विधातुं न तु बाधितुम्। तेनाहं समाश्वस्तः। भवांस्तु कालस्यापि कालो महाकालः। भवत्सान्निध्यं तु सर्वानतिशेते। ॐ नमो भगवते महाकालाय।" इत्युक्त्वा स साम्बं सदाशिवं भगवन्तं विश्वनाथं षोडशोपचारैः पूजयामास। साष्टाङ्गं दण्डवत्प्रणामं कर्तुं यावद्रामानन्दो नमति तावत्साक्षाच्छिवस्तं समालम्ब्य कण्ठेनाश्लिष्य प्रबोधयामास– "भवान् रामानन्दः। रामस्तु मम पूज्यः। भवानपि रामावतारो रामस्वरूप एव। आवयोर्मध्ये न कोऽपि भेदः। मम पूजनं तवैव, तव पूजनमपि ममैव। स धूर्तः कलिः भवता प्रसादित इति शुभलक्षणम्। पुरा महर्षिर्व्यासस्तेनाराधितः समुपदेष्टुं किन्तु स तं पाखण्डिनं निषिद्धवान्। भवतोपदिष्टः स कृतार्थतां गतः। सफला भवेदियं सङ्कल्पिता धर्मयात्रा। दिग्विजियं विधाय कुशली भवानायातु काशीमिति मदीया शुभाशंसा।"

पार्श्वे विराजिता भगवती भवानी जगदम्बिका द्वयोर्वार्तालापं सावधानमनसा शृणोति स्म। परमप्रीता सा रामानन्दाय दिव्यं प्रसादं ददौ। प्रसादं लब्ध्वा रामानन्दो भूरिशः कृतकृत्यो बभूव। स तामभिनन्द्य स्तौति स्म– 'महादेवस्य महनीया शक्तिर्भवती। भवदाशीर्वादं विना कुतो मे शक्तिः?' इदमुपश्रुत्य प्रसन्नवदना हास्यललितद्युति-मण्डितरदना सकलसिद्धिसदना कृताखिलसृष्टिरचना विविधविघ्नविद्रुतमथना स्निग्धवात्सल्यविलसितनयना सा देवी वरदाऽभयमुद्रोत्थापितेन दक्षिणकरेण स्वाशिषा तस्मै सर्वमभिलषितं सम्प्रददौ।

अथ स्वामिवर्ये समुत्थिते सति गन्तुमाज्ञाप्रार्थनाय, भगवान् विश्वनाथो जगाद– "अयि रामानन्द! नः शङ्खध्वनिं न श्रावयिष्यसि?" विहस्य विनतो रामानन्दः स्वकीयं दक्षिणावर्तं शङ्खं दध्मौ। तेन शङ्खध्वनिना सर्वत्र दिव्यचेतना प्रसृता। प्रातर्जागरणमभूत्। मन्दिरस्य सेवकाः देवलकाश्च सर्वे विगतनिद्राः यावत्पश्यन्ति तावत्स्वत एवानावृतं कपाटं मन्दिरं दृष्ट्वा विस्मितमानसा अभूवन्। मन्दिरे न कश्चिदासीत्। श्रीमद्रामानन्दस्त्वेतेषां नयनपटलोन्मीलनात्प्रागेव ततो निर्गत आसीत्। तथापि परस्परं विचारयन्तस्ते एतत्कारणं श्रीमठाधीश्वरमेव मन्यन्ते स्म। मन्दिरे सर्वाणि वस्तूनि यथास्थानं विराजन्ते। किन्तु भगवान् विश्वनाथः षोडशोपचारैः सद्यः पूजितो भासते। तस्मै स्रक्चन्दनादीनि त्वचिरमेव समर्पितानि स्पष्टं विभान्ति। 'कस्यचिद् दिव्यपुरुषस्यैव

चमत्कारोऽयमि' ति निश्चप्रचम्। 'शिवरात्रिमभिलक्ष्य श्रीमठपीठाधीश्वरो जगद्गुरुरामानन्दो ब्राह्मे मुहूर्तेऽलौकिकं शिवार्चनं कृतवानि'ति वार्ता कर्णपरम्परया काश्यां सर्वत्र व्याप्ता। 'भगवान् जगदीश्वरो विश्वनाथोऽनावृतं कपाटं मन्दिरद्वारं तस्मै ददाति स्म' इति वृत्तेनानेन स्वामिनः श्रीमद्रामानन्दस्य दिव्यत्वं समधिकतरं चकास।

अथारब्धा शुभमुहूर्ते जगद्गुरोः स्वामिरामानन्दस्य धर्मयात्रा। समस्तं देशमुत्साहोद्वेलितं कर्तुं, विखण्डितं समाजं समायोज्य समरसं विधातुं, वैदिकसनातनधर्ममभिरक्षतुं सख्यसौख्यभावेन रामभक्तिधारां प्रवाहयितुं तीव्रमनोभिलाषलालसया युगावतारः स्वामिप्रवरः भक्तैश्शिष्यैश्च सह गागरोनगढं प्रति प्रतस्थे। स शिबिकारूढः सर्वान् निर्दिशति स्म। अनन्तानन्दो नरहर्यानन्दश्च पार्श्व स्थितौ चामरव्यजनपरावास्ताम्। गागरोनगढप्राप्तौ कालातिपातो मा भूदिति विश्रामस्थलेषु न किमपि धर्मप्रवचनादिकमनुष्ठितम्। तथापि तत्र-तत्र मार्गग्रामनगरेभ्यः श्रद्धालवो जनाः मङ्गलयात्रायां सम्मिलिताः स्वामिवर्यस्य दिव्यदर्शनं लभन्ते स्म। धर्मयात्रामार्गे सर्वत्र श्रद्धाभक्तिसुधामयो जलौघ इव प्रतीयते स्म।

सद्गुरुः काशीतो गागरोनगढमागच्छतीति परमप्रियस्य शिष्यस्य श्रीपीपाजीमहाराजस्याऽसीमितो हर्षः शरीराद्बहिर्निष्क्रम्य नृत्यतीवाहर्निशम्। यावद् वार्ताहर आगत्य, 'धर्मयात्रा गागरोनगढसीमानं स्पृशती'ति सूचितवान् तावत् श्रीपीपाजीमहाराजो राज्ञा भोजराजेन सह स्वागतार्थं अग्रेसरति स्म। 'स्वागतं तु राजोचितं वैभवाढ्यं भवेदि'ति सर्वं सज्जितमासीत्। शासकोऽपि विरक्तो महात्मा पीपाजीमहाराजो दण्डवद्विधिना श्रद्धया प्रणतिं निवेद्य सद्गुरुदेवस्य भावाढ्यं हार्दिक स्वागतं कृतवान्। राजा भोजराजोऽपि विनतशिरसा प्रणम्याऽऽशीर्वादं लेभे। जगद्गुरुणा सह येऽपि धर्मयात्रिणो महात्मानस्तेषां समेषां यथोचितमभिवादनं विधाय पीपाजीमहाराजः स्वागतं कृत्वाऽऽत्मानं धन्यधन्यमन्यत्। नीराजनैः, पुष्पाक्षतलाजावर्षैः, तूर्यपटहादिमङ्गलवाद्यैः ससमारोहं सप्रश्रयं सश्रद्धं स्वामिवर्यं सहानुचरं गागरोनगढं प्रावेशयामास। तत्र स्वामिवर्यस्य निवासायैका रुचिररुचिरा सर्वसौविध्यसम्पन्ना पर्णशाला विनिर्मिताऽऽसीत्। यथोचितसज्जया बाह्याभ्यन्तरसुखदा साऽतीव मनोरमा भव्या विभाति। तामेव निकषाऽन्येषामपि महात्मनां सुखावासव्यवस्था विहिताऽऽसीत्।

गागरोनगढः कालीसिन्धु-आहू-नद्योः सङ्गमे तुङ्गपर्वतेऽवस्थितोऽस्ति। तस्य रक्षणाय गढं परितः सुदृढः समुच्छ्रितश्च प्राचीरवलयो विनिर्मितः। गढाभ्यन्तरप्रवेशाय द्वे बृहदाकारे द्वारे समुत्क्रमणीये स्तः। तदानीं गागरोनः सुमहद्राज्यमासीत्। तेषु तेषु राजकुलेषु हीदं राजकुलं सुप्रतिष्ठितमासीत्। यो वर्णलिङ्गी श्रीमठात्पूर्वसूचनां दातुमत्रागतः

स नित्यमेव श्रीमठस्यालौकिकं प्रभावं स्वामिवर्यस्य च दिव्यत्वं सदाख्याति स्म। तच्छ्रावं श्रावं जनाः स्वामिवर्यस्य शुभदर्शनार्थं भृशमुत्कण्ठिता आसन्। स्वामिवर्यस्य गागरोनगढे शुभागमनेन सर्वेषां दर्शनविषयिणी मनोऽभिलाषा सफला जाता। स्वामिवर्यस्तु स्वातीनक्षत्रस्य मेघ इव दर्शनतृषार्तानां श्रद्धालुचातकानां जलबिन्दुप्रदानेनेव दर्शनप्रदानेन पिपासामपनीतवान्। स्वामिवर्यस्य दिव्यं चाक्षुषप्रत्यक्षं कृत्वा सर्वे 'पूर्वसञ्चित-पुण्यवशादेवेदं सुलभमिति मन्यमाना 'अहो ! लब्धं नेत्र निर्वाणमि'ति सहसैकस्वरेण निजगुः। राजपरिवारस्य सर्वे सदस्याः जगद्गुरोस्तस्य सहयात्रिणाञ्च सेवायां तत्परा आसन्। न केवलं पुरुषवर्गोऽपित्वन्तःपुरमचिन्त्यश्रद्धया, 'सेवाधर्मः परमगहनो योगिनामप्यगम्यः' इति वारं वारमनुचिन्त्य, मनागपि त्रुटिर्न स्यादिति सावधानमनसा सविशेषं सेवासन्नद्धमासीत्। अन्येऽपि सामन्ताः नागरिकाश्च 'अपि काचिन्मदीया सेवा स्यादि'ति करबद्धाः सदैवोपस्थिता आसन्। स्वामिवर्यस्य गागरोनागमनं तस्य राज्यस्येतिहासेऽभूतपूर्वं घटितमासीत्। तदानीं तु तत्र स्वर्गमिवावतीर्णमिति प्रतीयते। सर्वत्र आनन्दोल्लास एव विलसति स्म।

दिनमेकं विश्रम्याऽपरदिनान्नियमितस्य सत्सङ्गस्य क्रमः प्रारभत्। सत्सङ्गे प्रतिदिनं नगरस्य निकटवर्तिनां च ग्रामाणां श्रद्धालवो जनाः समुद्रं प्रति सरित इव प्रीतिनिर्भराः कलगीतस्वैराकाशं गुञ्जायमानास्तथाऽऽगच्छन्ति स्म यथा महान् सम्मर्दो भवति स्म। राजपरिवारारस्याबालवृद्धा नरनार्यः मञ्चपार्श्वे विराजमाना भवन्ति। राजस्त्रियस्तु स्वामिवर्यस्य सान्निध्ये श्रीरामनामसङ्कीर्तनतत्परा आत्मनो धन्या इति मन्यन्ते स्म। स्वामिनः श्रीरामानन्दस्य प्रवचनात्पूर्वं शिष्यप्रवरौ कबीररविदासौ यथोपस्थितैर्भक्तिभावपूरितमानसैर्जनैः श्रीरामनाम्नः समवेतमसकृदुच्चारणं कारयतस्तदा तत्र सर्वोऽपि परिवेशो राममयो भवति स्म। प्रतिदिनं सत्सङ्गस्थले आगत्य सर्वेभ्यो निजदर्शनप्रदानेन पुण्यानि वितीर्य गभीरेण शङ्खघोषेणाऽऽध्यात्मिकीं शान्तिं प्रयच्छन् स्वामिवर्यः प्रवचनामृतं वितरति स्म। स्वामिवर्यस्य श्रीमुखात्तत्त्वज्ञानं सरलभाषया श्रुत्वा श्रद्धाभिभूता जना विमुग्धा इव शिष्यत्वं ग्रहीतुं नित्यमेव तमुपसर्पन्ति स्म। स तान् सर्वानुपदिशति- "तत्ते मनः शिवसङ्कल्पमस्तु। यस्तु सर्वाणि भूतान्यात्मन्ये-वानुपश्यति, सर्वभूतेषु चात्मानं ततो न विजुगुप्सते। आत्मानं विश्वात्मानं कुरुत। धन्योऽयं गागरोनदुर्गो यत्र पीपाजीसदृशो रामानुरागी महात्मा सिद्धयोगी च विराजते। धन्याः खल्वत्रस्था निवासिनो ये दिव्यप्रकाशात्मनः संरक्षणे जीवनं सुखमयं यापयन्ति। इदं हि तेषां पुण्यं सौभाग्यञ्च। धन्या चेयं परमपवित्रा भूमिर्यया एष महापुरुषः प्रसूतः निजे च क्रोडे स्निग्धं लालितः पालितः। एतमेवानुसरतु युष्माकं मार्गः। उक्तं हि

गीतायाम्– 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।' अतोऽस्मै श्रद्दधन्तु। युष्माकं भावो भवेत्– 'यो महात्मापीपाजी स एव रामानन्दः। पीपारामानन्दयोर्न कोऽपि भेदः। सत्यपि आकारभिन्नत्वे आत्मभिन्नत्वं नास्ति।' वस्तुतो यो मदीयोपदेशः पीपामहात्मनोऽपि स एव। यूयं सर्वे सम्भूय इमां पवित्रां धरित्रीं रामानामाक्षरैरक्षरगुञ्जारमयीं कुरुत येन च वृक्षेभ्यो नदीभ्यः पर्वतेभ्यो भवनेभ्याश्चान्येभ्यश्च एष एव मङ्गलध्वनिः 'रामो रामेति रामेति' निरन्तरं समुच्चारित इव श्रूयमाणो भवेत्। एष राम एव जगन्नियन्ता। रामाद् भिन्नो नहिं कश्चित्। नैव रामात्परः किञ्चित् रामस्याभिधानेऽपाराऽचिन्त्या शक्तिर्विराजते। स्व-स्व गृहे क्वचिदेकान्तेऽनन्यचेताः सर्वे तन्मयीभावेन रामनाम जपन्तु। अविदूरं स जगन्नियन्ता रामः। स तु सर्वेषां हृद्देशे एव वसति। युष्माकमपि स स्वयमेव दर्शनपथमेष्यति। एवं रामो युष्माकं परत्रेह च शर्मणे जीवनं सफलं विधास्यति।" इत्थं स्वामिवर्यस्य श्रीमुखारविन्दान्निःसृतां प्रवचनसुधां श्रोत्रपेयां पायं पायं जना निर्वाणसुखमिवानुभवन्तो हर्षनिर्भराः स्वामिवर्यस्य जयघोषं मुक्तकण्ठैः कुर्वन्ति स्म।

एकास्मिन् दिवसे प्रवचनावसाने एकः श्रद्धालुः स्वामिवर्यं सविनयमपृच्छत् "महात्मन्! भवतोपदिष्टं निरवद्यममूल्यं वचनं चरितार्थतां नेतुमस्माभिरतोऽप्यधिकं किं करणीयम्?" सस्मितं समादधौ स्वामिवर्यः– "श्रूयन्ताम्। अस्मिन् वर्षे मया चातुर्मास्यमनुष्ठितुमत्रैव सङ्कल्पितम्। एष आचार्योऽनन्तानन्दो युष्मान् तत्सर्वं निर्देक्ष्यति यत्करणीयं वर्तते। स रामनाम्नः शब्दसुरतियोगस्य विधिमुपदेक्ष्यति। अतीव सरलोऽयं विधिः। अस्मिन् योगविधौ न हि निर्गुणविषमसिधारापदक्रमणं न वा सगुणकर्मकाण्डप्रपञ्चपतनम्। अयं तु मध्यमो मार्गो यस्मिन् तीव्रमिलनोत्कण्ठा प्रबलदर्शनेच्छा च। नामजपेन सह ध्यानसाधनाया अभ्यासः सिद्ध्यति। सहजैवाभ्यास प्रक्रिया।" स्वामिवर्यस्यानेनोत्तरेण स श्रद्धालुः सन्तुष्टो जातः।

अतः परमाचार्यस्यानन्तानन्दस्य धर्मकक्षाक्रमो दुर्गे प्रारभत्। आचार्यस्य निर्देशतः लोकसङ्ग्रहाय नियुक्तौ कबीररविदासौ जनानां मध्ये स्थित्वा धर्मचर्चाप्रसङ्गे तान् रामनाममहिमानमुपदिशतः, ध्यानविधिं शिक्षयतः शब्दसुरतियोगस्याभ्यासं कारयतः स्म। अन्येऽपि साधकाः स्वामिवर्यस्य दिव्यचमत्कारकथाः श्रावयित्वा जनान् रामभक्त्यभिमुखान् कुर्वन्ति स्म। श्रद्धालवोऽस्मिन् साधनाविधावनुरक्ता निरन्तरं प्रेमभक्तियोगं प्रति समाकृष्टा अभूवन्। यदाऽपि स्वामिवर्यस्याऽतो गमनवार्ता श्रुतिगोचरा भवति, जनास्तस्य प्रस्थानस्थगनाय सविनयं प्रार्थयन्ति स्म। पीपाजी महाराजो जनान् प्रतिवेदयति स्म– "गायरोनवासिनामतः परं किमधिकं सौभाग्यं यत्स्वामिवर्योऽत्र

गागरोनगढे चतुरो मासान् व्यतीत्य जिगमिषति। स सर्ववित्साधको न क्वचिद् गच्छति। अस्मिन्नपि धर्मयात्राक्रमे स परमस्नेहेन प्रथमतो गागरोनगढमेवागतवान्। एतदपि बहु मन्तव्यम्। भवन्तोऽपि साधनामार्गे प्रचलन्तु। ततोऽप्यहमस्म्येव।"

स्वामिवर्यस्यानेन चातुर्मास्येन यदि कश्चित्सर्वाधिकं लाभान्वितः स तु पीपाजीमहाराज एव। तस्य गुरुनिष्ठसेवाभिः सर्वे प्रसन्नाः कृताः। गुरुवर्यं प्रसाद्य स देवदुर्लभं वैराग्यमाप्नुवान्। प्रसन्नो गुरुवर्यस्तं नैकसिद्धिभिरलङ्कृतवान्। सम्पन्ने सति चातुर्मास्ये, धर्मयात्राया द्वितीयः क्रमः प्रारब्धः। इयं यात्रा ततः प्रस्थाय जगन्नाथपुरीं प्रति निर्धारिता। पीपाजीमहाराजोऽपि गन्तुकाम आसीत्। स्वामिवर्यस्तस्मै स्वीकृतिं ददौ। अथ तस्य कनिष्ठा राजमहिषी सीताऽपि सहैव गमनोद्यता बभूव। मार्गक्लेशानाख्याय तन्निरोधस्य प्रयत्नोऽभूत् किन्तु तया स्वसङ्कल्पो न निरस्तः। अन्ततः स्वामिवर्यः तस्यै वैराग्यदीक्षां प्रदायाऽनुमतिं स्वीकृतवान्। सा राजमहिषी साधुवेषं परिदधौ। 'सोलंखडी पद्मावती'ति राज्ञी सीतेवाचरन्ती दृढतयेति स्वामिवर्येण सीतेति संज्ञिता। ततः पीपाजीमहाराजोऽपि तां सीतेति नाम्नैवाऽऽकारयति स्म। अस्मिन् यात्राक्रमे स्वामिवर्यो नैकानि तीर्थस्थलानि पुनाति स्म। सहयात्रिणोऽपि तत्र तत्र दर्शनलाभेनाऽऽत्मानं कृतार्थतामुपनयन्ति स्म।

यदा धर्मयात्रा जगन्नाथपुरीं निकषा सम्प्राप्ता, भगवान् जगन्नाथः स्वयमागत्य बटुवेषवपुर्भूत्वा स्वामिनः श्रीरामानन्दस्य स्वागतं चकार। शिबिकामुपगम्य मानपत्रं समर्पितवान्। स्वामिनमतिरिच्यैतद्रहस्यं न कश्चिदजानत्। मन्दिरपक्षतः स्वामिवर्यस्य सहयात्रिणाञ्च भोजनाऽऽवासयोः सुचारु व्यवस्था विहिता।

पुरीनिवासिभिः स्वामिवर्यस्य समक्षं यदा-कदा समुद्रेण क्रियमाणस्य सीमोल्लङ्घनस्य वेदनार्दितं वृत्तं प्रस्तुतम्। स समाधानायोपचरितुं कबीरं शिष्यप्रवरं सङ्केतितवान्। स सागरमुपगम्य निखातवेलासंदंशकस्तं निर्दिष्टवानेतं नातिक्रमितुम्। एवमेव तत्रस्थैर्जनैश्चन्दनपुष्करस्यापि वृत्तं कथितम्। तस्य जीर्णोद्धारे कृतेऽपि तस्मिन्न किञ्चिज्जलस्रोतः समुद्भिन्नम्। करुणाकरः स्वामिवर्यो योगानन्दमादिष्टवान् तत्र गत्वा जनानां जलविषयकमेतत्कष्टमपाकर्तुमिति। सुशिष्यो योगानन्दः सरस्तीरं गत्वा समाधिं समादधौ। स्वामिवर्यस्यानुग्रहेण तत्सरः सुस्वादुजलेन परिपूरितं बभौ। एवमचिन्तितं कृतं दृष्ट्वा जनता हर्षनिर्भरा जाता। आनन्दातिरेकेणोल्लसिता जनाः स्वामिवर्यस्य सेवार्थं वात्याप्रेरितो जलौघ इवाहमहमिकया समापतन्ति स्म।

जगन्नाथपुर्यां कानिचिद्दिनान्युषित्वा स्वामिवर्यो रामेश्वरं प्रति गन्तुं मनश्चकार। प्रस्थानवेलातः पूर्वमेव बटुरूपधरो भगवान् जगन्नाथः स्वयमेव करे पायसं कृत्वा

महतादरेण समाऽऽययौ। किं नाम गुप्तं स्वामिवर्यतः? स्वामिवर्यस्तु तमभिनन्द्य, पार्श्वे समुपवेश्य निजकरेण पायसं तं भोजयामास। सर्वं यथोचितं सम्पाद्य सहयात्रिभिः सह जगद्गुरुस्ततो रामेश्वरं प्रति प्रतस्थे। पुरीनृपतिः पुरीवासिनश्च स्वामिवर्यं वारं वारमभिवादयन्तो नगराद् बहिरागत्य, 'शिवास्सन्तु पन्थानो वः' इति मङ्गलकामनया सततं च जयघोषैः श्रद्धाभरैर्विह्वलैर्नेत्रैः स्वामिवर्यस्य दिव्यदर्शनोपकृताः सौप्रास्थानिकं कृतवन्तः।

पुरीप्रवासकाले स्वामिश्रीरामानन्दाचार्यः सांख्यदर्शनप्रवर्तकं महर्षिं कपिलं सादरं स्मृतवान्। स्मरणमात्रेणैव समुपस्थितं समक्षं महर्षिं कपिलिं विविधोपचारमन्त्रैः सविधिमर्चयामास। तदवसरे स्वामिवर्यो गङ्गासागरयोः सङ्गमतीर्थस्य महिमानं सविस्तरमुपवर्ण्य प्राह- "असकृदन्यानि तीर्थाणि गङ्गासागरतीर्थं तु सकृदेव।" तद्गङ्गासागरतीर्थं स्वकीयं धाम कर्तुमनुरुरोध स्वामिवर्यस्तं कपिलं महर्षिम्। 'मकरसङ्क्रान्तितिथौ तत्राहं प्रत्यक्षं वसामि' इति महर्षिः सहर्षं स्वामिवर्यस्यानुरोधं स्वीकृतवान्। तत एव मकरसङ्क्रान्तिपर्वणि प्रतिवर्षं गङ्गासागरतीर्थे पवित्रस्नानस्य परम्परा प्रादुरभवत्।

रामेश्वरधामोपगमात्प्रागेव विजयनगरसम्राजा श्रीमहामहीपतिना बुक्करायेण स्वामिवर्यस्य राजवैभवोचितमभिनन्दनं कृतम्। तेनैव रामेश्वरधाम्नि महात्मनोऽस्य सर्वाः भोजनावासव्यवस्थाः कृता। शिष्यैर्भक्तैः सह यदाऽयं जगद्गुरुर्दर्शनार्थं मन्दिर द्वारमुपगतवान्, तदा तत्रत्यैर्देवलकैः, 'मन्दिरे प्रवेष्टुं त्रिपुण्ड्रतिलकभाल एव जनोऽर्हती त्युक्त्वा निषेधो विहितः। तदानीं तत्र शैववैष्णवानां परस्परं द्वेषमयः सङ्घर्ष आसीत्। 'मन्दिरमिदं तु वैष्णवानां, शैवास्तु केवलं पूजाधिकृताः' इति वैष्णवानां तर्कसम्मत पक्ष आसीत्। 'शैवास्त्वत्र सर्वाधिकारसम्पन्नाः' इति शैवानामुद्घोष आसीत्। स्वामिवर्यस्तु सामरस्यस्यैक्यस्य च सन्देशमादाय धर्मयात्रां नियोजितवान्। अतोऽस्य विवादस्य समाधानार्थं तेनैका युक्तिर्विचारिता। स द्वारस्थो मौन एव स्वीयं दक्षिणावर्तं शङ्खं दध्मौ। तस्य दिव्यं ध्वनिं निशम्य सर्वे देवलकाः पुलकिताः। 'तत्र समेषां मस्तके त्रिपुण्ड्रो विराजत' इति निपुणमवलोक्य सर्वे विस्मिता जाताः। अनेन चमत्कारेण चमत्कृता देवलकाः काञ्चिदलौकिकीं शक्तिमनुभूय सर्वानवरोधानपाकृतवन्तः। वस्तुतो भगवतो रामेश्वरस्याऽऽशुतोषस्यैवेदं मनीषितमासीत्। शैवपद्धतिमनुसृत्य देवलकाः स्वामिवर्यस्य प्रवेशं कारयित्वा तस्य हार्दिकमभिनन्दनं विहितवन्तः। स्वामिवर्यस्तानवोचत्- 'कश्चिद् भावुक एवापरस्य हार्दं भावं जानाति। प्रीतिमानेव प्रीतिमन्तं विजनाति। भक्तिमानेव भक्तिवतः साम्मुख्यं भजते। अन्तःकरणस्य वैशद्यमेव जगत्प्रमाणम्। मर्मवेत्तारस्तथ्यमिदं विज्ञायैव यथोचितं व्यवहरन्ती'ति।

दर्शनप्रवणानेतान् सर्वधर्मसमभावयुतान् विचारान् श्रीस्वामिमुखान्निर्गतान् श्रुत्वा सर्वे तस्य सौहार्दं सदाशयत्वञ्च भूरिशः प्रशंसितवन्तः। स्वामिवर्यस्योपदेशं सम्प्रधार्य 'तथैव कर्तुं यथोपदिष्टमि' ति देवलका दत्तवचनाः सञ्जाताः। 'महानयं योगिवर्य' इति मन्यमानास्तत्र महान्तो धर्माध्यक्षाश्च निःशेषनिष्ठया स्वामिवर्यं सेवन्ते स्म। वैष्णवैः सम्भूय तस्य हार्दिकमभिनन्दनं वन्दनञ्च सम्पादितम्। तदानीं शैव-वैष्णवयोरेकताया अद्भुतं दृश्यमपूर्वञ्चोपस्थितम्।

अपरेद्युस्तत्र धर्मसभायामपारं जनसमूहं सम्बोधितवान् स्वामिवर्यः- "अत्र समुद्रबन्धनात्पूर्वं यः स्वयं शिवलिङ्गं संस्थाप्य प्रथममर्चितवान् स रामस्तु वैष्णव एव; शिवराधनात्सोऽपि शैवः। अत एतद्धाम न केवलं शैवानामपितु वैष्णवानां त्वस्त्येवं शिवः साक्षाद् वैष्णवपूजामभिलषत्यङ्गीकरोति च। ततोऽत्र वैष्णवानां निषेधस्य किमौचित्यम्। शिवोऽपि रामं भजते। स वैष्णवानामग्रगण्यो देवः। मम शिष्यप्रवरः श्रीयोगानन्दोऽत्रोषित्वा भवतामैक्यं सुदृढीकरिष्यति।" योगानन्दस्तत उत्थाय हस्तौ प्रसार्य बद्धाञ्जलिना सर्वानभिवादयति स्म। स्वामिवर्यस्यैतदवदानं समवेतकरतलवादनेन हर्षध्वनिना चाभिनन्दितम्।

रामेश्वरयात्रां समाप्य ततः प्रस्थानत्पूर्वं जगद्गुरुः स्वामिश्रीरामानन्दः सहयात्रिभी रामेश्वरवासिभिश्च सह धुनष्कोटिमथ रामसेतुं दृष्टवान्। तस्य हृदयोद्गारा आसन्- 'धन्येयं भूमिर्वानरसैनिकानां श्रमस्वेदलवैः पवित्रीकृताः, पाविता भाविता च स्वयं रामभद्रेण। अयं सेतुः अतीते भारतीयवैज्ञानिकविकासस्य प्रकटीभूतं प्रमाणम्। अधर्माभिभवस्य धर्मारोहणस्य च सुबद्धं प्रतीकसोपानम्। श्रीरामभद्रस्याऽक्षुण्णकीर्तेः स्थायि चिह्नम्। सर्वथा रक्षणीयोऽयं सेतुः। विरुद्धमतयो विधर्मिशक्तय कृतप्रयत्नाः सन्ति भारतीयं यशो धूलौ पातयितुं सुस्पष्टमपीतिहासमन्यथाकर्तुं गौरवास्पदांश्चाऽपाकर्तुम्। अस्माभिः सर्वैर्भारतीयैः समेत्य सुविचारितैकमत्येनैवं भूतानां प्रयत्नानां विरोधः करणीयो यतो हि ताः शक्तयो हतोत्साहा एतादृशान् विचारान् प्रयत्नांश्च त्यक्त्वा सुमतिमाश्रयन्तु।'

रामेश्वरात्प्रत्यावर्तनक्रमे स्वामिवर्यो विजयनगरराजस्याऽतिथिरासीत्। 'अतिथिदेवो भवे' त्यस्माकमार्षपरम्परां धर्मप्राणो महाराजो बुक्करायः स्वामिवर्यस्य राजकीयमातिथ्यं विधातुं तत्पादौ सेवितुं सोत्कण्ठ आसीत्। तेन विजयनगरं स्वर्गोपमं सुसज्जितम्। मार्गे स्थाने स्थाने तोरणद्वाराणि निर्मितानि। विरञ्जितानि भवनानि, सिक्ताश्च मार्गाः दीपैः पुष्पमालाभिश्चालङ्कृता आसन्। नगरस्यैकस्मिन् समृद्धे मनोहरोद्याने स्वामिवर्यस्य तस्य च धर्मयात्रिणामावासव्यवस्था कृताऽऽसीत्। उद्यानस्य मध्ये निर्मलजलपूर्णं पद्मोत्पलकह्लारपुण्डरीकविलसितं छायातरुभिः परीतं नानावर्णविहगकल-

कूजितं स्फटिकबद्धसोपानलसितं महत्सर आसीत्। महाराजबुक्करायस्य सभापण्डितो विद्वान् विविधशास्त्रविचक्षणः तत्त्वज्ञो महर्षिरिव विद्यावतारो विद्यारण्यस्वामी विश्रुतकीर्तिर्दीप्ताभामण्डिताननश्चतुरानन इव वेदान्तेषु निष्णातो धर्मव्यवस्थापकः स्थापकश्च न्यायविधेः श्रुतिस्मृत्यनुरक्तो विरक्तो भौतिकप्रपञ्चेभ्यः स्वस्वामिना सह स्वामिवर्यस्य दर्शनार्थं समुत्सुकः स्वागतार्थं प्रस्तुत आसीत्। 'नगरं निकषा समायाता धर्मयात्रे'ति सेवकैः सूचितो राजा विद्यारण्यस्वामी च सत्वरं निरुपानत्पद्भ्यां नगरद्वारमुपगम्य स्वामिवर्यस्य हार्दिकं स्वागतं वेदविधिना चकार। शिबिकां वहन्तौ ब्रह्मचारिणावपसार्य तां स्वस्कन्धमारोप्य परमां प्रीतिमयीं श्रद्धां समर्पितवान्। एवं बहुमानपुरस्सरं सादरं ससत्कारं सा धर्मयात्रा समानीय तस्मिन्नुद्याने सन्निवेशिता। स्नानोपचारादिभिः भोजनपानीयैश्चाध्वजनितः श्रमखेदोऽपगतः। आदिवसं विश्रम्य सायं काले तस्मिन्नेव नन्दनकाननोपमे राजोद्याने महती धर्मसभा समायोजिता। सुसज्जितमञ्चासीनो जगद्गुरू रात्रावपि देदीप्यमानः सूर्य इव विराजते स्म। तस्य दिव्याभामण्डलं दर्शं दर्शं चकितचकिता जनाः श्रद्धया तत्समक्षं विनता आसन्। आत्मानुभावतोऽलौकिकप्रभावतः स्वामिवर्यो मौन एव सर्वं व्याजहार जहार च विजयनगरवासिनां हृदयानि। अस्मिन्नवसरे आचार्योऽनन्तानन्दः स्वामिवर्यस्य सङ्केतमनुगृह्य श्रोतॄणां समक्षमस्याः धर्मयात्राया उद्देश्यं प्रस्तुतवान्।

अथ स्वामिवर्य आगामिदिवसादारभ्य प्रवचनस्य क्रमद्वयं निर्धारितवान्। पूर्वाह्णे राजप्रासादे राजधर्मोपदेशः, सायंकाले च तस्मिन्नेव राजोद्याने लोकधर्मोपदेशः।

यद्यपि महाराजबुक्करायो मन्त्रिभिः सह धर्मपूर्वकं प्रजापालनं करोति तथापि स्वामिवर्यस्तं पुनः पुना राजधर्ममुपदिष्टवान्। स राजानं राजपुरुषांश्च प्रबोधयामास- "राजा प्रजारञ्जनाद्राजेति कथ्यते। भगवान् श्रीराम आदर्शप्रजापालको राजा आसीत्। तस्य राजधर्मनिर्वाहव्रतं त्वनुकरणीयम्-

'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।' इति।

एवं राजधर्मः सुकठिनः। अतो राजयोगभोगयोः सहगामित्वं कथमपि नोपयुज्यते। राजयोगे भोगस्य पदं महद्हानिप्रदम्। यो हि राजा भोगविलासेषु लिप्तः प्रमत्तः सोऽचिरादेव राज्येन सह विनश्यति। यो राजधर्मो मनुना कीर्तितः पितामहेन भीष्मेण युधिष्ठिरं प्रत्युपदिष्टः स राजधर्मोऽवश्यमेवाऽनुसर्तव्यो व्यवहर्तव्यश्च। अनेन राजधर्मपालनेन निरातङ्का प्रजा सुखी भवति, प्रजाऽपि पुत्रवद् भवति। अतस्तस्याः पालने प्रमादो न कर्तव्यः। उक्तं हि महाकविना कालिदासेन-

'प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।।' इति।

'एष राजधर्मः। अतः प्रजासंवर्धनं, धर्मरक्षणं गोब्राह्मणहितञ्चावश्यमेव कर्तव्यम्।'

महाराजबुक्करायो नवदिनपर्यन्तं स्वामिवर्यस्याशीर्वचःसुधास्नातः कृतार्थो धन्यधन्यश्चाभवत्। स्वामिवर्यस्योपदेशं हृदयङ्गमं कृत्वाऽनवद्यचेतो जातः। उपदेशस्य सारं स्वयं रक्तचन्दनद्रवेण भूर्जपत्रे लिखित्वा स्वर्णमण्डितं कारयित्वा दक्षिणबाहुमूले बबन्ध। श्रावं श्रावं तदुपदेशं सोऽनुभूतवान् यदहमपि पूर्वजन्मनि कश्चिद् योगी एव। स्वामिवर्यप्रदत्तं पायसप्रसादमुपभुज्य स हृद्रोगाद् विमुक्तो नीरोगोऽजायत।

सायंकालिकप्रवचनेषु जगद्गुरुः जनमानसं भक्तिभावभरितं राममयं चकार। वर्णाग्रहिणो ज्ञानमार्गिणोऽपि रामभक्तिधारायां मज्जिता जाताः। धर्मस्य व्यापकं स्वरूपं विशदयन् स्वामिवर्यः समाजे सामरस्यमेकमत्यं च स्थापयितुमुपदिदेश। 'ईश्वरः सर्वभूतेषु, ईश्वरे सर्वभूतानी'ति मत्वा जनाः परस्परमभेदं पश्यन्तः स्निह्यन्तु। 'विधर्मिणां धर्मध्वंसप्रयासः कदापि साफल्यं मैतु' इति सर्वैः सम्भूय प्रयतनीयम्। समाजे धर्मस्य प्रतिष्ठा भवेदिति विषयं केन्द्रे कृत्वा स्वामिवर्यस्य प्रवचनानि प्रवर्तितानि।

राज्यातिथ्ये नवदिवसपर्यन्तमुषित्वा विजयनगरेऽपरमप्येकं विमलोदकं रामभक्तिसरो विनिर्माय स्वामिवर्यः काञ्चीपुरीं प्रति प्रस्थितवान्। राजा विद्यारण्यस्वामी च श्रद्धालुनां महता जनसम्मर्देन सहागत्य सादरं सौप्रस्थानिकं कारयामास। राजा तु स्वामिवर्यस्य दर्शनात्स्वकीयं पुनर्जन्म मेने। एको राजमन्त्री कबीरस्य सत्सङ्गी समभवत्। राज्ञा निर्देशतः स यात्रायाः सुचारुव्यवस्थापनाय काञ्चीपर्यन्तं स्वामिवर्यमनुसृतवान्। मार्गे विश्रामस्थलेषु सर्वत्र स्वामिवर्यस्य प्रवचनाद्रामभक्तिधारा प्रभवति स्म।

द्विधा विभक्ता काञ्ची नगरी–विष्णुकाञ्ची शिवकाञ्ची चेति। श्रीरङ्गनाथः प्रभुः विष्णुकाञ्चीनगर्यां विराजते। तत्र श्रीरङ्गनाथमन्दिरस्य देवलकेषु ब्रह्मण्यश्रेष्ठत्वबोधो दम्भाहङ्कारयुतो मिथ्याभिमानतोऽन्तःकरणे सुनिविष्टोऽतीवगर्ह्य आसीत्। ते खलु वर्णभेदबुद्धिमुपजीवन्ति स्म। एक एव समाजः उच्चैर्नीचैर्विभक्तो हेयबुद्धिगतैस्तैर-वलोक्यते। वस्तुतो निम्नवर्णास्तेषां दृष्टौ समजतुल्या अपि नासन्। तेषां श्रेष्ठत्वाहङ्कारदानवो देशस्यैक्यं नृशंसं भक्षयति स्म। तत्रोपमन्दिरमेकोऽति सामान्यो जनः कबीरं 'तन्तुवाय' इति रविदासञ्च 'चर्मकार' इत्युक्त्वा तिरस्कृतवान् तयोश्च मन्दिरप्रवेशं निषिद्धवान्। स्वामिवर्यस्तं मूढमतिं बहुधा प्रबोधितवान् किन्तु सर्वं चिक्कणघटे जलबिन्दुरिव व्यर्थमासीत्। स्वामिवर्येण कथितम्– 'अस्माकं संस्कृतिः तीक्ष्णाग्रं तृणं कुशं पशुमपि

गां प्रति श्रद्दधति, का कथा मनुष्याणाम्? मानवेषु को भेदः? कीदृशमिदं बुद्धिवैकल्यम्?' किन्तु पूर्वाग्रहान्धबधिरेषु कः पश्यतु कश्च शृणोतु? दृढवर्णभेदमतान्धैः विरोधस्य प्रबलः प्रवाहः समुद्वेलितः। ये तत्र स्वामिवर्यस्य भक्ताः श्रद्धालव आसन् तैः सज्जितं सर्वं स्वागतचेष्टितं विपर्यस्तम्। विरोधिभिस्तत्र परिवेशस्त्वेतावद्विषाक्तप्रदूषितो यत्स्वामिवर्यस्य भक्तास्तस्य दर्शनादपि वञ्चिताः। ते भयाविष्टाः सङ्कुचिताः क्वचित्कोणेऽपसृताः। ते वराकाः निजं भाग्यं भर्त्सयन्ति दैवं च दूषयन्ति स्म। 'अस्यां विषमस्थितौ कश्चिच्चमत्कार एव कर्तव्यः, स एव सर्वं साधयिष्यती'ति मनसा विचिन्त्य स्वामिवर्यः स्वं ब्रह्मास्त्रं दक्षिणावर्तं शङ्खं शरणं ययौ। स तमुच्चैर्दध्मौ। तेनाध्यात्मिकशङ्खध्वनिना सर्वे तत्क्षणमेव सम्मोहिताः। ततः स्वामिवर्योऽन्तर्दधौ प्रभोश्च रङ्गनाथस्य गर्भगृहे प्रकटितः। सोऽपि प्रभू रङ्गनाथो हस्तौ प्रसार्य, तमाकृष्य कण्ठेनालिङ्गितवान्। परमप्रीत्या द्वयोरद्भुतं सम्मेलनं दृष्ट्वा तत्र भगवतोऽर्चायां व्यापृता देवलका दिव्यमिदं महदाश्चर्यकरं दृश्यं, नेत्रे प्रमीज्योन्मील्य च दर्शं दर्शं विस्मिताः स्तम्भिताश्चाभवन्। 'सापराधा वयं, क्षम्यतां क्षम्यतामि'तिं वारं वारमुक्त्वा ते सानुनयं प्रार्थयन्ति स्म स्वामिवर्यस्य चरणयोर्निपत्य। निमेषमात्रेणैवं वार्ता समस्तायामपि काञ्चीपुर्यां व्याप्ताऽभवत्। काञ्चीपुर्याः धर्मप्राणा जनता वर्षपूरे नदे जलौघ इव मन्दिरं प्रत्युत्प्लुता। स्वामिवर्यस्य जयघोषैः मन्दिरपरिवेशः परिव्याप्तः। स्वामिवर्योऽपि विगतखेदो निश्चिन्तः प्रसन्नः सन्नागत्य स्वकेन दर्शनेन सर्वानुपकृतवान्। स तदानीं सर्वान् सम्बोधयामास– "'एकोऽहं बहु स्याम्' इति तस्यैव परमेश्वरस्येच्छापरिणामेयं सृष्टिः। 'ईशावस्यमिदं सर्वं यत्किञ्च जगत्यां जगदि'ति श्रुतिः। ततस्तस्माद्द्वैतात्कोऽयं द्वैतभावः? गुणा एव गुणेषु वर्तन्ते। अथ मिथ्यैषः कर्तृत्वाभिमानः। नियतिर्योजना धत्ते विशिष्टे कार्यमण्डले। न कश्चिज्जीवः कस्यचिदपि कार्यस्य कर्ता। स एव परमेश्वरः दारुयन्त्रमिव सर्वं प्रेरयित्वा कारयति। ईशभावप्रपन्नाय नराय न किमपि कार्यं तुच्छं नाऽप्युत्कृष्टम्। न कोऽपि श्रेष्ठो नाऽप्यवरः। मनुष्ययोर्मध्ये द्वेषो घृणा च विकृतबुद्धेरहङ्कारस्य परिणामः। एतामनीतिं स्वार्थबुद्धिरेव व्युत्पादयति। यन्मिथ्यावादिभिः क्रियते तन्न समीचीनम्। स परमात्मा तु प्रेम एवाभिलषति। श्रद्धां भक्तिं चाऽऽकाङ्क्षति। श्रद्धया कृतं सर्वमपि कर्म तस्यैव। ततः कः स्पृश्यः कश्चाऽस्पृश्यः? स्पृश्यास्पृश्योर्विचार एव दुर्भावनाजनितः। यो हरिं भजति स हरेरेव भवति। हरिभक्ता हरिभक्तानेव मन्दिरप्रवेशान्निवारयन्ति। नायं भगवतो रङ्गनाथस्य सङ्केत आदेशो वा। एतन्त्वहङ्कारस्यैव विषमफलम्। ईश्वरप्राप्तौ भवादृशानामहङ्कार एव महती बाधा। साम्प्रतं देशोऽयं यादृशे धर्मसङ्कटे निपतितः तस्मादुद्धरणायेममहङ्कारं परित्यज्य समतामूला मैत्री अपेक्ष्यते।

अहङ्कारजंन्यो विभेदः समाजमाघातयति। यदैक्यसूत्राबद्धा वयं मतसमन्वयेन सह सामरस्यं स्वीकुर्मस्तदैव सुदृढशक्तिपुञ्जोद्भासिता वयं विधर्मिणां दुष्कृत्यातङ्कस्य प्रतिरोधं कर्तुं समर्था भवामः। एतानि देवमन्दिराणि, भवतां पूजाऽर्चना, गौ–ब्रह्मणाश्च तदानीमेव सुरक्षिताः भविष्यन्ति।" स्वामिवर्यस्य प्रवचनं श्रुत्वा लज्जिता विनता देवलका मन्दिरस्य द्वारं सर्वेभ्य उन्मुक्तवन्तः। स्वामिवर्यस्य सहयात्रिणोऽन्येऽपि श्रद्धालवो निःशङ्कं मन्दिरं प्रविश्य प्रभो रङ्गनाथस्य दर्शनं लब्ध्वा स्वामिवर्यस्य कार्तज्ञं ज्ञापयन्तः सुखं निवर्तिताः।

स्वामिवर्यस्य विश्रामस्थलमासीद् विष्णुकाञ्चीपुर्या उत्तरे भागे एकस्मिन्नेकान्तस्थाने। तत्समीपमेव मूलप्रभनामा विद्याधरप्रवरो निवसति स्म। स्वामिवर्येण कृतस्य तच्चमत्कारस्य वृत्तं विज्ञाय भृशमाह्लादितः स धर्मयात्रिणां सर्वविधसेवार्थं सविनयं सन्नद्धोऽभूत्। स्वादिष्टं पायसं निर्माय स्वामिवर्यं न्यवेदयत्। अपरेद्युः श्रीविद्यारण्यस्वामी स च राजमन्त्री तत्रोपस्थितौ। विगतदिवसस्य मन्दिरघटितमुपश्रुत्य तौ भृशं दुःखितौ जातौ। राजमन्त्रिणा क्षमाप्रार्थना कृता। शान्तमनाः स्वामिवर्यस्तं प्रोवाच– "कदाचिद् दुर्दैवयोगतोऽप्रियमपि घटते। नियतिलिखितं कः प्रमार्ष्टुमर्हति? विपत्तयोऽपीश्वरस्यैवाज्ञयाऽऽपतन्ति। तास्तु जनानां सहनशक्तेर्धैर्यस्य च परीक्षणार्थमेव।" ततो विद्यारण्यस्वामी तमपृच्छत्– "अप्यस्मिन् सुकठिने काले स सूत्रधारो जगन्नियन्ता किमपि व्यवस्यति?" स्वामिवर्यस्योत्तरमासीत्– "कथं न! स्वयं तेन प्रतिज्ञातं– 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्.....।।' अतः परं किं वक्तव्यम्? भगवद्वचनं प्रामाणान्तरं नार्हति।" विद्यारण्यस्वामी सन्तुष्टो जातः। स्वामिवर्यस्तस्मै पुष्पमेकमुपहृत्योवाच– "एकाग्रदृष्ट्या निभालयाऽस्य दलानि। तत्र भवतोऽनुभावः स्पष्टमेव विभाति।" तस्मिन् दिव्ये पुष्पादर्शे स्वकीयं भविष्यं विलोक्य विस्मितो भावविह्वलो विद्यारण्यः सानन्दं स्वामिवर्यस्य चरणावुपस्पृशति स्म।

यावत्स्वामिवर्यः काञ्चीपुर्यामवस्थितस्तावत्पर्यन्तं विद्यारण्यस्वामी स च राजमन्त्री तस्य सेवायां सदा सन्नद्धावास्ताम्। स्वामिवर्येण तच्छिष्यैश्च काञ्चीपुर्यां सर्वत्र भ्रामं भ्रामं रामगुणग्रामाः सन्दिष्टाः।

काञ्चीपुरीतः प्रस्थितो जगद्गुरो धर्मयात्रा गिरिनारपर्वतं सम्प्राप्ता। तत्र पर्वतशिखरस्थं मातृमन्दिरं गत्वा ततश्च दत्तात्रेयपदचिह्नानां दर्शनार्थं सुदूरं पर्वतश्रेणिमारुह्य, दर्शनं विधाय, ततोऽवतीर्य सोमनाथं गत्वा स्वामिवर्यः स्वजनैस्सह द्वारिकापुरीं जगाम। द्वारिकावासिनः स्वामिवर्यमभिनन्दितवन्तः। तत्र द्वारकाधीशस्य दिव्यं दर्शनं लब्ध्वा प्रसन्नमानसास्ते भेंटद्वारिकामपि सागरान्तर्वर्तिनीं गत्वा हरिस्मरणं

कृतवन्तः। महात्मनः पीपाजीमहाराजस्य सहचरी सीता भगवतो द्वारकाधीशस्य दर्शनं दिव्यं मधुर-मधुरं लब्ध्वा भावाभिभूता स्वामिवर्यं प्रार्थितवती साक्षाच्छ्रीकृष्णस्य दर्शनं कारयितुम्। अयमेव मनोभाव आसीत् पीपाजीमहात्मनोऽपि। स्वामिवर्यस्तु विनोदमुद्रया विहस्योक्तवान्- "चेद् वाञ्छसि साक्षात्कृष्णदर्शनं, कुरु झम्पाकूर्दनं सागरे।" 'अनुल्लङ्घनीयं खलु गुरोर्वचनं तदपि हितसाधनमि'ति सुविश्वस्तं पथ्यमादाय गुरुणानुमतं स्वाभिमतं मनसि कृत्वा दम्पती कृतझम्पावल्गिते विलीनौ। अन्तर्यामी भगवान् कृष्णस्तौ द्वावपि तत्र समादधौ। भगवती रुक्मिणी तौ भगवद्भक्तौ प्रासादे नीत्वा सत्करोति स्म। भक्तवत्सलस्य नटवरवपुषः श्रीकृष्णस्य दिव्यदर्शनं लब्ध्वा भावाभिभूतो महात्मा पीपाजीमहाराजोऽवोचत्- "भगवन्! गुरोः प्रसादतस्तव च कृपाकटाक्षतोऽद्यावयोर्जीवनं सफलम्। भगवत्प्रीतिसुधासागरे निमग्नः प्राणी कथमपि कदाचिदपि भवाब्धौ नैव निमज्जतीति। इदानीमेतत्सत्यमनुभवामि। अतः परमावयोर्नेत्रेषु शाश्वतमिदं दिव्यरूपराशियुतं स्वरूपयुगलं स्थापयत्वि'ति मदीयाऽभ्यर्थना।" युगलश्रीविग्रहेण वरमुद्रया 'तथाऽस्तु' इत्युक्तं सस्मितम्। अथातो बहिर्गन्तव्यमिति विचार्य सीता सहचरी शनैः पत्युः कर्णे प्रोक्तवती- 'तत्र कथं को विश्वसिति आवयोर्दर्शनकृतार्थताम्?' किं नामाऽविज्ञेयं भगवतः श्रीकृष्णस्य! कर्णे जल्पितमपि श्रुतम्। लोकविश्वासाय, पीपाजीमहात्मानमधिकारिपुरुषमभिजानन् स तस्य दक्षिणबाहुमूले शङ्खचक्रयोश्चिह्नं ददौ। दम्पती सादरं सश्रद्धमभिवाद्य तां दिव्यच्छविं यावन्नेत्रे निमीलयतस्तावत्सागराद् बहिस्तीरे स्थितौ। स्वामिवर्यस्तु सर्वं प्रत्यक्षमिव पश्यति स्म। किन्तु सहयात्रिणस्तत्रस्थाश्च जना आतुरतया प्रतीक्षमाणा आसन्। तौ तथागतौ दृष्ट्वा सर्वे हर्षोत्फुल्लनयनाः बभूवुः। दम्पती गुरोश्चरणावुपस्पृश्योचतुः- 'महती तेऽनुकम्पा। भवत्कृपयैव आवाभ्यां श्रीकृष्णरुक्मिण्योर्दिव्यदर्शनं लब्धम्। जीवनं धन्यं जातम्। तदानीमेव सीतासहचर्याः विशङ्कितं सफलयन्नेको धर्मात्मा जगाद- 'श्रीकृष्णस्य साक्षाद्दर्शने किं प्रमाणम्?' पीपाजीमहाराजो बाहुमूले विलग्नं, स्वयं भगवता प्रदत्तं शङ्खचक्रचिह्नं प्रादर्शयत्। 'धन्योऽसि धन्योऽसि' इत्युक्त्वा सर्वे सादरमभिवाद्य समाश्वस्ताः।

तत्र सप्तदिनानि यावत्स्वामिवर्यस्य द्वारिकापुर्यां प्रवासोऽभूत्। नियमितप्रवचनेषु जगद्गुरुः श्रीरामानन्दो रामकृष्णयोरैक्यं स्थापितवान्। भगवतः श्रीकृष्णस्य षोडशकलायुतं चरितं लोकलीलाश्चात्यन्तं भावपूर्णैः पदैः वर्णयन् तदाऽऽध्यात्मिकं दार्शनिकं च रहस्यं व्याख्यातवान्। द्वारिकावासिनां कृते एष नूतनश्चमत्कार आसीत्।

स्वामिवर्यः महात्मानं पीपाजीमहाराजमवोचत्- "यदि गागरोनगढं निवर्तितुं वाञ्छसि, गन्तु शक्नोसि। सहचर्या सीतया सह त्वं श्रीकृष्णदर्शनं कृत्वा परमार्थलाभम-

र्जितवानसि। सीतया दक्षिणयात्रा कृता। त्वमाप्यात्मसाक्षात्कारसम्पन्नोऽसि।" पीपाजीमहाराजेनोक्तम्- "यथाऽऽज्ञापयति श्रीगुरुदेवः।" ततः सर्वानाऽऽपृच्छ्य स सीतया सह गागरोनगढं गतवान्।

स्वामिवर्यस्तु सहयात्रिमण्डलान्वितः आबूपर्वतं गत्वा, भर्तृहरिगुहां दृष्ट्वा, पुष्करतीर्थमागत्य सरोवरे स्नात्वा वृन्दावनमाजगाम। तत्र वृन्दावने स्वामिवर्यो गोपबालकेषु श्रीकृष्णस्य भावनां बध्वा प्रतिदिनं तान् भोजयामास। एकदैका किशोरी भोजनागारे समायाता। स्वामिवर्येण तस्याः किशोर्या अद्वितीयं रूपलावण्यं, मधुरां वाणीमनुपमेयं सारल्यं, स्वभावसहजचापल्यं विभाव्य तस्यां रासेश्वरीराधिकाया दर्शनं कृतम्। तस्या अलौकिकं रूपं दिव्यां च प्रभां विलोक्य स्वामिवर्यो विस्मितो भावविह्वलो बभूव। परमस्नेहेन स्वामिवर्यः स्वकीयं पायसं स्वहस्तेन तां भोजयामास। अपरेद्युः स्वामिवर्यः बालिकानां कृते पृथक् भोजनभाण्डारमायोजितवान्। निखिलेऽपि व्रजमण्डले स्वामिवर्यस्याऽप्रतिमभक्तेश्चर्चा गृहे गृहे समजायत।

वृन्दावनतः कियत्कालं पश्चात् धर्मयात्रा हरिद्वारं सम्प्राता। तत्रानुगङ्गं सन्निवेशः स्थापितः। सायंतने स्वामिवर्यस्येदं धर्ममण्डलं हरिपीठिकायां (हर की पौड़ी इति घट्टे) गङ्गानीराजनं कृतवान्। हरिद्वारावासकाले एकमद्भुतं घटितम्। स्वामिवर्यस्य शिबिरोपकण्ठे देवोपमौ बृहत्कायौ संस्कृतभाषिणौ द्वौ तपस्विनौ भिक्षापात्रं करे कृत्वा भिक्षां प्रार्थयतः स्म। ताभ्यां भिक्षां प्रदाय ब्रह्मचारिण ततोऽपसर्तुं तौ निर्दिष्टवन्तः किन्तु तौ मनागपि कर्णं न कृतवन्तौ। तौ वृक्षत्रयस्य फलानि, पञ्चान्नानि सप्तमृगमदांश्च याचेते स्म। तयोर्नेत्रे सुविशाले कथंचिदुन्मीलयतो निमीलयतः। दण्डौ भ्रामयन्तौ तौ भीतिमुत्पादयतः स्म। एतच्छिष्यैर्विज्ञाय स्वामिवर्यः शिबिरस्थ एव शङ्खं दध्मौ। तं शङ्खध्वनिं श्रुत्वा तौ तुरीयावस्थां गतौ किन्तु तयोर्हस्ताद् दण्डो न भ्रष्टः। आचार्यानन्तानन्दस्तेषां विषयेऽभिज्ञायते स्म। स्वामिवर्यः शिबिरान्निर्गत्य तौ प्रबोधयामास- 'स्वागतं करुणानिधी!' नेत्रे समुन्मील्य तौ यावत्स्वामिवर्यं पश्यतः तावदेवानन्दोदधौ निमग्नौ। स्वामिवर्यः करुणाकराभ्यां तौ समालिङ्गितवान्। मनसाऽर्चयन् स्वामिवर्यस्तयोर्भिक्षापात्रं ज्ञान-भक्तियोगरूपस्य वृक्षत्रयस्य फलैः, पञ्चप्राणान्नैः सप्तभूर्ज्ञानमृगमदैश्चाऽपूरयत्। कृतार्थौ धन्यधन्यौ तावदताम्- "आवयोर्दर्शनार्थं भवान् बदरिकाश्रमं गन्तुकामोऽस्ति। सुदीर्घः पर्वतीयो मार्गः कष्टप्रदो भयावहश्च। भवांस्तु सर्वसमर्थः किन्त्वेते सहयात्रिणस्तं यात्राक्लेशं सोढुमसमर्थाः। अतो नरनारायणौ स्वयमेवाऽऽवामत्रागतौ।" इत्युक्त्वा तावन्तर्दधतुः।

एवं हरिद्वार एव बदरिकाश्रमयात्राफलं लब्ध्वा स्वामिवर्यः शिष्यैः सङ्गतः

पुनरपि वृन्दावनमाजगाम। अस्मिन् दिव्यधाम्नि स्वामिवर्यः रासेश्वर्या राधिकया सह जगत्स्रष्टारं रासेश्वरमपि भोजनं कुर्वन्तं द्रष्टुमभिलषति स्म। सर्वथाऽऽप्तकामोऽपि स्वामिवर्यः स्वीयस्यास्याभिलाषस्य पूर्तिं दिदृक्षुरेव पुनरपि ब्रजभूमिमागतवान्। तस्मै प्रतीयते स्म यदिदं वृन्दावनं सा दिव्यभूरस्ति यस्याः प्रतिकणं निहितः स प्रीतिकरः नवनीतचौरः। स्थूलभौतिकतासंलग्नं मनः समाकृष्याऽऽध्यात्मिकतां प्रति नयति। द्वितीय-दिवसे स्वामिवर्यो वृन्दावनकुमारान् भोजयामास। भोजनानुष्ठानकाल एवैका सुन्दरी बालिका यमुनाजलपूर्णं कलशं शिरसि निधाय समागता। ब्रह्मचारिणे जलकुम्भं समर्प्य तयोक्तम् 'कुमारा भोज्यन्ते। ततः कुमारीणां कोऽपराधः? कुतस्ताः समागताः?' एतद् विज्ञाय स्वामिवर्यस्तृतीये दिने कुमाराणां कुमारीणाञ्च सम्मिलितं भोजनानुष्ठानं कारयामास। यदा ते षड्रसं भोजनमास्वादयन्ति स्म तदानीमेव तत्र मयूरबर्हशिखण्डको नीलाम्बुजश्यामलकोमलाङ्ग एकः सुकुमारः कुमारस्तथा चैका चम्पकावदातगौरी कनकाभा किशोरी विकसितपद्मोत्पलानननयना सहैवागत्य बालविनोदानन्दमनुभूयमानं स्वामिवर्यमुपगम्य संस्थिते। 'अस्मत्कृतेऽपि पायसं देयमि' ति तन्मुखाभ्यां श्रुत्वाऽभीष्टदर्शनलाभेन परंप्रीतः स्वामिवर्यस्तत्कालमेव तयोरुपवेशनाय सन्दिश्य स्वयं सत्वरं गत्वा रजतपात्रे पायसमानीय स्वहस्तेन क्रमेण पौनः पुन्येन तञ्च ताञ्च भावमुग्धः सन् भोजयामास। पायसं स्वामिकरादाऽऽस्वाद्य सद्य एव तौ तिरोदधतुः। वृन्दावने पुनरागमनस्य स्वामिवर्यस्य महाभावः सम्पूर्तिमगात्।

वृन्दावनधामतो धर्मयात्रेयं नैमिषारण्यं गत्वा ततश्चित्रकूटं ययौ। चित्रकूटं स्वामिवर्याय प्रियतरं रोचते स्म। धर्मयात्राशिबिरः कामदगिरिमन्दाकिन्योर्मध्ये सन्निवेशितः। तत्र चित्रकूट एव स्वामिवर्यश्चातुर्मास्यमनुष्ठितवान्। एकदा कामदगिरिं परिक्रम्य चरणाङ्कतीर्थे सहसा स्वामिवर्योऽचिन्त्यदशामुपेतवान्। दिव्यसंगीतेन प्रबुद्ध्य पुनरपि पूर्वां दशामाप्नुवान्। प्रतिदिनं प्रवचनसभायां ऋषिभिः मुनिभिरन्यैश्च देवलकैः सह तत्रत्या गिरिजनाः वनेचराश्चापि समायान्ति स्म। तस्मिन् चातुर्मास्यकाले स्वामिवर्यस्य दिव्यप्रभावानुभावैः कलिगतं चापि चित्रकूटं पुनरपि राममयं जातम्। चातुर्मास्यविधिं परिसमाप्य स्वामिवर्यस्ततः प्राचलत्। प्रयागेऽहोरात्रपर्यन्तं विश्रम्य सङ्गमस्थाने गङ्गाकूले, प्रतिष्ठानपुरतः प्रस्थितः स धर्मयात्रिभिः सह काशीं समाययौ। सुदीर्घयात्रावशात्प्रायः सर्वे श्रान्ता आसन्। स्वामिवर्यस्तत्र श्रीकाशी विश्वनाथं, कालभैरवं बिन्दुमाधवं च सम्पूज्य, अन्यानपि देवान् समर्च्य पुनः श्रीमठभवने गुहायामास्थितः प्रवचनादिभिः लोकोपकारं कर्तुमारब्धवान्। श्रीमठे दिनचर्या पूर्ववत्समारब्धा।

यथा त्रेतायां, 'लङ्कां विजित्य चतुर्दशवर्षान्तरं श्रीरामभद्रोऽयोध्यामागच्छती'ति वार्तां श्रुत्वाऽयोध्यापुरी पुलकिता बभूव तथैवेदानीं 'वर्षव्यापिनीं सुदीर्घां भारतधर्मयात्रां परिसमाप्य जगद्गुरुश्रीरामानन्दः काशीपुरीसीमान्तमागत' इति विदितवृत्तान्ता काशी हर्षातिरेकादुत्फुल्लनयनाऽऽसीत्। सर्वधर्मावलम्बिनो जनाः पूर्वत एव श्रीमठमागत्य स्वामिवर्यस्य दर्शनपुण्यलाभाय समुत्कण्ठिताः समवेता आसन्। पञ्चगङ्गाघट्टेषु, नद्यां नौकासु, सोपानमार्गेषु, श्रीमठस्य सत्सङ्गभवने समीपवर्तिनां च भवनानां प्रतोलिकासु पटलेषु च स्थित्वा जनाः सोत्सुकं स्वामिवर्यस्यागमनं प्रतीक्षमाणा तस्थुः। दूरत एव शिबिकां दृष्ट्वा जनाः स्वामिवर्यस्य जयघोषैराकाशं निनादितवन्तः। भक्ताः श्रीमठे जनसम्मर्दं व्यवस्थापयन्ति स्म। धन्येयं काशी धन्यश्च श्रीमठो यत्रेदृशो दिव्यपुरुषोऽलौकिकविभूतिमयः साधकः प्रतिवसति। अचिरादेव सा शिबिका श्रीमठद्वारं सम्प्राप्ता। यावच्छ्रीस्वामिपादाः शिबिकायाः बहिरागत्याऽवरोहन्ति तावत्सौभाग्यवत्यो नार्यः कुमार्यश्च कन्यकाः लाजापुष्पाण्यवकीर्य मङ्गलगीतैस्सह नीराजनविधिं समुदाचरन्ति स्म। अवसिते सति नीराजनाक्रमे श्रीस्वामिपादपद्मयुगले प्रणामाञ्जलिं निवेदयितुं जना अहमहमिकयाऽग्रेसरन्ति स्म। रामेश्वरात्पूर्वमेव काश्यामागतो योगानन्दो महता प्रयत्नेन क्लिष्टतया तं जनसम्मर्दमपवार्य कथं कथमपि सङ्कीर्णमपि मार्गं विधाय स्वामिवर्यं श्रीमठे प्रावेशयत्। शिष्यैर्भक्तैश्च पूर्वमेव सत्सङ्गमण्डपे स्वामिवर्यस्योपवेशनाय रुचिरः सुखदो मञ्चो निर्मित आसीत्। स्वामिवर्यस्य मञ्चारोहरणकाले पुनरपि महान् जयघोषः प्रादुरासीत्। तदानीं दृश्यमासीदभूतपूर्वम्। एकतः सत्सङ्गमण्डपे महिलामण्डलमपरतश्च पुरुषसमाजः। सर्वे व्यग्राः श्रोतुकामाः धर्मयात्रावृत्तम्। सर्वप्रथममाचार्योऽनन्तानन्दोऽस्याऽभूतपूर्वाभिनन्दनस्य कृते समेषामाऽऽभारं विज्ञापयामास। ततस्तेन धर्मयात्राक्रमे स्थाने-स्थाने घटितानि महदाश्चर्यकराणि दिव्यानि वृत्तानि श्रावितानि। रङ्गनाथमन्दिरस्य वृन्दावनस्य च प्रसङ्गैः भक्तिभागीरथी प्रवाहिता। रामेश्वरधाम्नो हरिद्वारस्य च वृत्तान्तैः स्वामिवर्यस्य दिव्यानुभावस्यैको नूतनोऽध्याय एव लिखितः। सर्वे श्रद्धालवो जना एतानि दिव्यवृत्तानि श्रावं श्रावं सविस्मयं विमुग्धाश्चकितचकिताश्चासन्। तदानीं करतलनादैर्जयघोषैश्च जनोत्साहस्य हर्षस्य चाविस्मरणीयं दृश्यमुपस्थितमासीत्। आनन्दावेगं स्थिरीकर्तुं दृढबन्ध इव दक्षिणहस्तमुद्यम्याऽऽचार्योऽनन्तानन्दः शान्तिं विधाय जनरवस्य, सविनयं परमश्रद्धेयं जगद्गुरुं स्वीयाशीर्वचोभिः सुधावर्षणाय विनिवेदितवान्। ततो वरदमुद्रां प्रदर्श्य स्वामिवर्यो दक्षिणावर्तं करे कृत्वा तन्मुखे स्वमुखं दधौ। तेन दिव्यशङ्खध्वनिना सर्वत्र प्रसादमयी नीरवता प्रसृता। स्वामिवर्यस्य

दिव्यदीप्ते गौरवान्विते प्रसादसदने श्रीवदने सर्वे बद्धदृष्टयः समभूवन्। ततो धीरगभीरस्वना दुर्लभदेवरचनेव मधुरवचना तस्यामृतमयी वाणी प्रस्फुरिताधरा, जनानां कर्णरन्ध्रं प्रविश्य हृदयं स्पृशन्तीव, चित्तं रमयन्तीव, नूत्नप्राणान् सञ्चारयन्तीव, मुमुर्षजनानपि सञ्जीवयन्तीव, अज्ञानान्धकारं निवारयन्तीव, चेतनामुद्घाटयन्तीव महौषधिरिव शोकसन्देहभ्रमरुजं शमयन्तीव, मनोगदोल्लाघलघुतां प्रापयन्तीव परमानन्दसुधासीकरैः स्नपयन्तीव, दिव्यलोकसुखमनुभावयन्तीव, अन्तःकरणेषु कोटिसूर्याभां भरन्तीव, सर्वत्र मैत्रीमुदिताभावं प्रसारयन्तीव, जनजनहृदयेषु दयादाक्षिण्यं विस्तारयन्तीव श्रुतिगोचरतां गता—

"अयि भगवद्भक्ताः! सतां सद्भिः सङ्गः कथमपि पुण्येन हि भवति। काशीवासो विश्वनाथस्य दासो भवति कृतपुण्यः क्षीणपापः सदैव। निखिलधरागुप्तः स जागर्ति प्रसुप्तः क्वचिदपि न विचलति देवतात्मा सदैव। देवा अप्यभिलषन्ति भारतेऽत्र जन्म लब्धुमीहन्ते नरविग्रहं भावभोगांश्च दग्धुम्। अतिपुराकालाद् धर्मप्राणोऽयं शाश्वतो भारतदेशः। अत्र 'सत्यं शिवं सुन्दरं' भवति मानवानां परिवेशः। लोककल्याणदृष्ट्या क्रियते निरन्तरं सत्कर्म। मनसः शिवङ्कल्पतैव मुनीनां वचोमर्म। साम्प्रतं भारतस्य दशा सर्वविधसङ्कटापन्ना। दृश्यते सामाजिकी धार्मिकी स्थितिरत्र भूयसी विपन्ना। किन्त्वत्र यदा यदा मानवता दुर्दशाग्रस्ता, तदा तदा दैवेन काचिच्छक्तिर्विन्यस्ता। धर्मसंरक्षणाय सज्जनपरित्राणाय भवति भगवतोऽवतारः। भूते सति दुष्टसंहारे सुखी भवति संसारः। सम्प्रति सनातनधर्मः सम्प्रदायेषु विच्छिन्नः। सीदन्ति श्रेष्ठत्वमिथ्याभिमानादाचार्याः धर्मस्तिष्ठति खिन्नः। तेषु परस्परं द्वेषो घृणा तथा कटुता। परार्थं चिन्तनं स्तब्धं केवलमुल्लसति निजता। धर्मस्य मूलभावः क्वचित् तिरोहितो जातः। सदाचाराभावे ह्यादर्शो मलिनः सञ्जातः। दक्षिणभारते सम्प्रदायकटुताऽधिकतरा दृष्टा। समाजे सौमनस्यस्य पात्रतैव तया नष्टा। व्यर्थमेव तु तज्ज्ञानं व्यर्थैवास्ति सा भक्तिः। यदीशावास्यभावनया नैवेश्वरेऽनुरक्तिः। सर्वेषां हृदीश्वरस्तत्र न कश्चिद् भेदः। कथं ते नावबुध्यन्ते धर्माचार्या इति मे खेदः। सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु सर्वे स्युरकुतोभयाः। इति मनीषा जागर्तु सदा समेषाम्। सौहार्दं सद्भावश्च भवतु हृदये सर्वेषाम्।

पाञ्चभौतिकेन शरीरेणेयं धर्मयात्रा कृता। सर्वत्रैव मानवैक्यं समदर्शित्वं करुणा च संधृता धृता। परमात्मनो भक्तेः प्रचारः प्रसारश्च कृतः। रूढिः कटुता, वैषम्यं दुर्भावश्च निराकृतः। न कश्चिन्नीचो नाप्युच्चो वर्ततेऽत्र। हरिं भजते हरेरेव भवत्यत्र। भवतु सदाऽस्माकं धर्मे रतिः। सर्वभूतहिते रता स्यात्सर्वदा मतिः। सर्वजीवानां

हितमेवात्महितम्। चेतो भवतु दम्भदर्पाहङ्कारहितम्। भवद्भिरस्माकं यत्कृतं स्वागतम्। कृतज्ञा वयं मानवसेवैवास्मकं व्रतम्।" इति।

अन्ते च, धन्यवादं ज्ञापयताऽऽचार्येणाऽनन्तानन्देन सूचितं यत्काशीवासिभिः स्वामिवर्यस्य सम्मानार्थं त्रिदिवसीयं भेदभावरहितं भोजनानुष्ठानं सङ्कल्पितम्। तत्रभवन्तः सन्त्यामन्त्रिताः सादरम्। तेषु त्रिषु दिवसेषु स्वामिवर्यस्य सान्निध्ये महानाध्यात्मिकसङ्गमो भविष्यति।

अथ तस्मिन्नेव दिनत्रये, एकदा विजयनगरात्प्रेषितो विद्वच्छिरोमणेर्विद्यारण्यमुनेः पत्रं प्राप्तम्। तस्मिन् स विद्यारण्यमुनिः जगद्गुरुं श्रीस्वामिरामानन्दं सम्बोध्याऽभिवादनपूर्वकं लिखितवान् यद्भवत्प्रेरणया वेदानां भाष्यकरणं प्रवर्तते किन्तु पदे पदे गूढार्थग्रन्थेर्जटिलता चित्तं समुद्वेजयति। अग्रजस्य नाम भाष्यकाररूपेण योजितम्। यतो हि यशःलोभो मया संवृतः। अपौरुषेयाणां वेदानामीश्वरीयज्ञानस्य भाष्यं विधातुमीश्वरीया बुद्धिरप्यपेक्ष्यते। अतोऽस्मभ्यं कृपया प्रयच्छतु तादृशीं विशदामीश्वरीबुद्धिमिति शम्।

पत्रं पठित्वा स्वामिवर्यस्य मनःप्रसादो मुखे समुल्लसति स्म। स तत्कालमेव तस्योत्तरं विद्यारण्यमुनिं प्रति प्राहिणोत्–

'स्वस्ति तेऽस्तु। प्रयते वेदभाष्यकर्मणि या बाधोपजायते सा तु ते वाग्देवीं प्रत्युपेक्षाकारणादेवं त्वया पत्रं लिखित्वा पृष्टमिति ते निरभिमानता प्रकटिताऽन्यथाऽहङ्कारो बुद्धिविघातक एव। स लब्धसत्ताकमपि वस्तु निराकरोति। अतो वैदुष्यबुद्धिगतमहङ्कारं परित्यज्य तामेव वाग्देवतां शरणं गच्छ। आस्तिकभावसम्पन्नाय तुभ्यं सैव बोधोपायं बाधापायं च दास्यति। ब्रह्मप्रतिपादकं वेदभाष्यं शास्त्रस्य लोकस्य चोपकाराय प्रभविष्यति। मया प्रदत्तो मन्त्रः सदैव स्मर्तव्यः। तद्बलेनैव सर्वं साधयिष्येति पुनश्च, 'प्रकृतीश्वरयोर्न द्वन्द्वम्। प्रभोर्महिमा एव प्रकृतेः रचना। अनेन महिम्नैव प्रभुरनन्तरूपमुत्पादयति। देहेषु पृथक् पृथग् दृश्यमान आत्मा त्वेक एव। प्रकृतिवैभवस्योपभोगस्त्यागाश्रितः। ईहा, या सच्चिदानन्दस्य वैचारिकी सत्ता, त्यागस्तु तस्या एव न तु जगतः। अहंभावं त्यक्त्वाऽद्वैतस्यानुभव एवामृतत्वस्योपभोगः। 'एको' 'बहु'– एतौ द्वावपि सत्यम्। तत्त्वतो द्वयोरपि अभिन्नत्वम्। एको भवो विभवस्त्वनेकः। दृश्यमानो विभवस्तस्मिन्नद्वितीये भवे समाहितः। स एक एव रमते स्वीये महिम्नि। यदैतज्ज्ञानं त्वान्तःकरणे समुदेष्यति, सर्वमेकमेवाद्वितीयं भासमानं प्रतीयते। ब्रह्मविद् ब्रह्मैव भूत्वाऽमृतत्वं समाप्नोति। स एव विभुः सच्च त्यक्। एतद्रहस्यं विज्ञायैव ब्रह्मवित्साधकः ब्रह्मत्वं भजते। अस्याऽऽध्यात्मिकरहस्यानुभूत्या सा देवलदुर्लभेश्वरीया बुद्धिः स्वयमेव चेतनपिण्डे

आविर्भवति। ततश्च वेदरहस्यं स्वत एव करतलगतमामलकमिव स्पष्टमेव प्रतिभाति।

'अतो भाष्यकरणेऽप्रमादतया संलग्नो भव। त्वत्कृतं वेदभाष्यं प्रामाणिकमिति निश्चप्रचम्।'

एतदुत्तरपत्रं पुटके निधाय स्वामिवर्यस्तेनैव पत्रवाहकेन विद्यारण्यमुनिं प्रेषयामास।

अभेदतया तत्रैकस्यामेव पंक्तौ सहभोजे भुञ्जमानान् जनान् दृष्ट्वा भावविह्वलः स्वामिवर्यः प्रोवाच– 'अद्य भगवन्तं सहस्रमुखैः भुञ्जानमवलोक्य नृत्यति मे मनोमयूरः, हृदयेऽपरिमितोल्लासः कण्ठश्च गद्गदः। अविस्मरणीयोऽयमानन्दः। मामनुगृहीतवन्तो भवन्तः।

एतच्छ्रुत्वा एको महात्मा न्यवेदयत्– 'अस्मिन्नाध्यात्मिके मन्दिरे त्वागत्य को भविता स तादृशः यो निजे मनसि विभेदस्य कालसर्पं धारयिष्यति। अस्यामद्वैतगङ्गाधारायां स्नात्वा को नाऽभवत्पवित्रः?'

स्वामिवर्यः प्रोवाच– "अध्यात्मबोधः कृन्तति खलु क्षुद्रसङ्कुचितभावबन्धम्। अधुनाऽपि सन्ति सामाजिकरूढयो भयावहाः शोचनीया दुःखप्रदाश्च। एतत्प्रमार्ष्टुं शक्तोऽस्ति सन्तसमाजः। उदारमनाः सज्जना एतन्निर्वोढुमग्रेसरन्तु।"

तदानीं भट्टारकमहोदयो यो भुक्त्वा हस्तप्रक्षालनं कुर्वन्नासीत्, महताऽऽदरेण कथितुमारेभे– "व्यतीतं मयाऽऽखिलं जीवनं भगवच्चरणविमुखम्। अद्य गृहीत्वेमं महाप्रसादं तृप्तः खल्वात्मा। नव्यैर्भव्यैश्च भावोदयैः ध्वस्ताः सर्वे हीनसङ्कुचिताः विचाराः। चित्तं विमलं हृदयं च विशदमभूत्। भगवन्! भवत्कृपाकटाक्षेणैवेतत्सर्वं सम्भूतम्। भवन्तं विना को ज्ञानाञ्जनशलाकया चक्षुरुन्मीलयिष्यति? भवदुपदेशसम्बलेन शक्तिसम्पन्नोऽहमस्यैकस्य महति यज्ञे हविर्निक्षेप्तुं तत्परोऽस्मि, सन्नद्धो ऽस्मि।"

अवसिते भोजनानुष्ठाने सुस्थितेषु च सर्वेषु झिणुभक्तः स्वामिवर्यमुपगम्याऽपृच्छत्– "भगवन्! किमानन्दस्य मूलम्?"

स्वामिवर्यः प्रोवाच– "अहङ्काराऽभावो हि तस्यानन्दस्य मूलम्। कुर्वन्नेवेह कर्माणि यत्राऽहङ्कारस्याऽभावस्तत्रैवेश्वरस्य वासः।"

झिणुभक्तः पुनरपि पप्रच्छ– "भगवन्! कथं भविताऽहङ्कारस्याभावः?"

ततः सस्मितं स्वामिवर्यः समादधौ– "सद्य एवैकपंक्तिबद्धेषु भोजनकर्तृषु न त्वया दृष्टोऽहङ्कारस्याभावः?"

एतच्छ्रुत्वा झिणुभक्तो मौनः सन् स्वामिवर्यस्य पादयोः पतितोऽन्ये सर्वे–

'धन्योऽस्ति धन्योऽस्ति जगद्गुरुरि'ति ब्रुवन्तः जयघोषं चक्रुः। जगद्गुरुः गभीरं शङ्खं दध्मौ। सर्वे समागता आनन्दसागरे निमग्नाः। प्रसन्नवदनो रामनामैककीर्तनः स्वामिवर्यः स्वीयां कन्दरां प्राविशत्। ततः सर्वे परस्परमभिवादयन्तो यथायथं गतवन्तः।

अथैकदा दिवसावसानवेलायां प्रवहति निशानिःश्वासनिभे गङ्गातरङ्गस्पर्शशीतले तनीयसि समीरे, प्रज्वालितेषु चम्पककुड्मलेषु वर्तिकाग्रेषु प्रदीपप्रकरेषु, श्यामव्योम्नि प्रकीर्णजातीपुष्पस्तबकचयसन्निभासु तारकावलीषु, प्रदोषसमये काश्यां सुयशसा विद्योतमानः 'सुधीगण' इत्यभिख्यः कविरेकः काव्यसर्जनक्षमोऽपरः प्रजापतिरिव निजकर्मचातुरीमादाय श्रीमठमाजगाम। स स्वामिवर्यस्य नितान्तैकान्तकान्तकीर्ति-कौमुदीमभिलक्ष्य प्रशस्तिं विरचय्याऽऽनीतवान्। यथा कस्यचिद्धार्मिकस्य मनसि सत्पथेनोपार्जितं धनं तथैव काव्यमपि कवेर्मनसि कर्तृत्वाभिमानं सृजति। सुकविः कमपि तृणायाऽपि न मन्यते। तस्येयं काव्यसृष्टिरेकत आत्मतोषस्य कारणमपरतो लोकप्रतिष्ठाया अपि। स सदैव कल्पनालोके विचरति। तस्य पादौ वियति बहुतरं स्तोकमुर्व्यां प्रयातः। श्रीमठे प्रविशन्नेव स्वामिवर्यस्य दिव्यत्वं, सिद्धत्वं वैदुष्यं च विचिन्त्य तानि प्रत्यक्षीकुर्वन्निव स सहसा विगलितकवित्वमदो धीरगभीरप्रशान्तपदो बभूव। आश्रमे प्रविश्य स्वामिवर्यस्य दिव्यदर्शनाय सविनयं प्रार्थयामास। आचार्योऽनन्तानन्दस्तं स्वामिवर्यं निवेदितवान्। जगद्गुरुर्गुहातो बहिरागत्य तस्मै दर्शनं ददौ। कविः सुधीगणः स्वामिवर्यस्य चरणावुपस्पृश्य तस्थौ। स तं कण्ठेनाश्लिष्य स्वपार्श्वे एकस्मिन् काष्ठासने समुपवेशयामास। स्वामिवर्यः कवीन् स्निह्यति स्म। कविरेव सनातनीं संस्कृतिं, समुदाचारं, प्रीतिञ्च स्वशब्दशक्त्याऽभिव्यनक्ति लोकं च कान्तासम्मिततयोपदिशति। सुधीगणः संस्कृतकविरासीत्। स्वामिश्रीरामानन्दस्य संस्कृतभाषां प्रति परमा प्रीतिः। स केवलं लोकसङ्ग्रहाय लोकभाषायाः पक्षपाती आसीत्। सुधीगणो जगद्गुरोर्दिव्यमनुभावमनुभूय प्रथमदर्शने एव कृतार्थोऽभूत्। स सविनयमुवाच- "भगवन्! तीर्थयात्रामाध्यमेन भवता या समन्वयी दृष्टिः प्रदर्शिता तया भारतीयाऽऽध्यात्मिकी परम्परा सुपुष्टैवाऽभवत्। भवता खलु सम्प्रदायेषु विभक्ता ईश्वरा एकीकृताः। मन्दिराणां द्वाराणि सर्वजनसुलभानि कारितानि। अनेन राष्ट्रियो भावो मांसलतां गतः।"

"सुकवे! आश्रमेषु जना आगच्छन्ति मुमुक्षोपेता अथवा रुजाक्रान्ता रोगमुक्तिकामनया। तेषां चिन्तनं मूलाधारोर्ध्वमुत्थाय विज्ञानमयकोशपर्यन्तमपि न प्रयाति। त्वदीयसंवेदनया भावितोऽहम्। तवान्तःकरणेऽहं पश्यामि देशधर्मयोर्विघटितस्थितिं प्रत्युत्पन्नां गभीरां वेदनाम्। यत्कार्यं मया भारतयात्रया साधितं तत्त्वं शब्दयोगेन कुर्वन्नसि।

अति प्रबला खलु शब्दब्रह्मशक्तिः।"

"गुरुवर्य! भवता तु सहजमेव कविकर्म विविच्य मे सुन्दरं मार्गदर्शनं कृतम्। अहं त्वकिञ्चनः शब्दोद्यानस्य मालाकारः। शब्दपुष्पैः हारं ग्रथ्नामि। भवत्प्रशस्तौ केचन शब्दा एवमेव गुम्फिताः। प्रस्तोतुमनुमतिं कामये।"

"सरस्वतीपुत्र! त्वयैतावत्प्रशंसितोऽहम्। अपि किञ्चिदवशिष्टम्?"

"स्वामिन्! छन्दोबद्धो भावो न केवलं गतिं लयं वापितु श्रोत्रपेयं साङ्गीतिकं सौन्दर्यमपि गृह्णाति।"

"सुकवे! सत्यं वदसि। अस्त्येवमेव। सङ्गीतं त्वेकमप्रतिममीश्वरीयं वरदानम्। काव्यस्य प्रस्तुतिर्द्विगुणिता शोभाधायिनी भवति यदा तत्सङ्गीतेन युज्यते। भवतु, कथय किमानीतवानसि?"

स्वामिवर्यस्यानुज्ञया स सुकविः सुधीगणः समधिकेनोत्साहेन भावभूमिमास्थाय सुमधुरेण कण्ठेन सस्वरं पपाठ–

जगद्गुरो हे! दयानिधे हे!!
निजकरुणां विस्तारय।
संसृतिबन्धनिबद्धजनं भोः।
भवनिधिपारं तारय।।
अवतीर्णोऽसि द्वितीयो रामः
कलियुगकालकराले।
जीवत्यहो! रावणी वृत्तिः
लोभवञ्चनाजाले।।
सद्भावस्य प्रकल्पय सेतुं
ध्वंसय केतुमधर्मम्।
दीनजनानामाशाबन्धो!
देशो यातु न गर्तम्।।
करे करोषि दक्षिणावर्तं
शङ्खं दृढं सुशस्त्रम्।
मधुरो घोरः स्वनस्तदीयः
तेन साधयसि सर्वम्।

धर्मधूर्गता जगत्प्रतिष्ठा
नारीणां सम्मानम्।
भक्तिर्ध्रुवा जनानां हृदये
गायति तव महिमानम्।।
पावनसुधामयी ते वाणी
सकलदोषदुःखहर्त्री।
कृपामयी ते करुणादृष्टिः
सकलसुमङ्गलकर्त्री।
भक्तमानसे प्रतिष्ठितोऽसि
प्रभो! विभो! परमेश्वर!
नित्यं देहि दर्शनं दिव्यं
पुण्यं हे करुणाकर!।।
विधर्मिणां तैरसत्प्रहारैः
सीदति भीतसमाजः।
त्वमेव त्राता विपद्गतानां
ते तव पदरतिभाजः।।
उदितोऽसि त्वं व्योममण्डले
प्रखरवैष्णवसूर्यः।
विश्वधरातलतमोनिहन्ता
सद्विचारधृतधुर्यः।।
जगदुद्धारक! भवभयहारक!
नित्यं त्वां प्रणमामः।
दर्शं दर्शं महत्प्रकर्षं
तव स्तुतिं गायामः।।
तव स्तुतिं गायामः।। जगद्गुरो हे!.....।।

शिरःकम्पेन गीतं समाप्य यावत्स कविः सुधीगणश्चक्षुरुन्मीलयति तावत्तत्र समवेताः श्रद्धालवो भक्ताः शिष्या अन्ये च दर्शनार्थिनः करतलध्वनिभिः सह 'साधु साधु' इत्युच्चार्य कवे काव्यस्य चाभिनन्दनं कृतवन्तः। अनेन श्रुतिसरसेन स्तुतिगीतेन

सुप्रतीतोऽनन्तानन्दः सद्य एवास्य फलश्रुतिं निर्वर्ण्य सर्वान् चमत्कृतानकरोत्–

'इदं सुकविना गीतं गीतं भावसमन्वितम्।
प्रीतये सर्वदेवानां रामानन्दसमर्पितम्।।
रामानन्दस्तुतिं नित्यं येऽपि कुर्वन्ति श्रद्धया।
भवाब्धिं दुस्तरं तीर्त्वा परं पारं प्रयान्ति ते।।'

अतः परं गुरुवर्यस्य सङ्केततः शिष्यप्रवरोऽनन्तानन्दो गुहान्तः स्थापितं नारिकेलं पीताम्बरं शुष्कफलोपेतपुटकञ्चानीय स्वामिवर्यस्य करे कृतवान्। परमप्रीतो जगद्गुरुः तत्सर्वं सुकवये सुधीगणाय सस्नेहं समर्पितवान्। सोऽपि विनतः सन्नेतदादाय स्वामिवर्यं सादरं सश्रद्धमभिवादयामास। सोऽपि तस्य शिरसि दक्षिणहस्तं विन्यस्याशीर्वचोभिः सत्कृतवान्– "काश्याः गौरवभूतोऽसि। वाग्देवता त्वां प्राप्य धन्यतां व्रजति। स्वशब्दार्थमयस्य काव्यस्यामृतफलं समाजे निरन्तरं वितर।" कृतार्थः स कविः पुनः पुनः सर्वानभिवाद्य ततः प्रसन्नमना निर्ययौ।

स्वामिनः श्रीरामानन्दस्य दिव्यत्वं तदानीमशेषे भारते चर्चाया विषय आसीत्। सिद्धाचार्या अपि तस्य दर्शनेनात्मानं कृतपुण्यं विधातुमुत्कण्ठिता लालायिता आसन्, सामान्यजनानां तु कथैव का? प्रतिदिनमेव श्रीमठे दर्शनार्थिनां सुदीर्घाः पङ्क्तयो महाँश्च जनसम्मर्दो भवति स्म। ते सिद्धा महात्मानो योगिनो यतयो वैरागिणो गृहस्थाश्च। स्वामिनो रामानन्दस्य प्रदर्शितसाधनायां नामजपध्यानाभ्यां सह प्रेमाभक्तेरद्भुतं सम्मेलनमासीत्। स्वामिवर्येणैकमभिनवमध्यात्मदर्शनं प्रवर्तितम्। तेन यन्मुक्तिमार्गः समुपदिष्टस्तस्मिन्नासीद् विषमसिधारा व्रतं न वा गृहं परित्यज्य हिमगिरिगुहासेवनम्। तस्मिनासीत् तमेकमेवाद्वितीयं प्रति नवोढेवाऽऽतुरतामयी मिलनाभिलाषाऽपि च विरहजनिता पीडेव रामनामस्मरणव्यग्रता। लोकसङ्ग्रहार्थं स्वामिना श्रीरामानन्देन समाजमेकसूत्राबद्धं कर्तुं, धर्मं संस्कृतिं च रक्षितुं श्रीमठस्य द्वारं सर्वेभ्य एवोन्मुक्तमुद्घाटितम्। न केवलं तस्यात्मीयता, समरसता, सर्वधर्मसम्भाविताऽपितु तस्य ज्ञानगर्भितं मधुरं प्रवचनं चैतन्यमयोर्जोत्सर्जनपरः शङ्खध्वनिर्दिव्यदर्शनञ्च सर्वेषामानन्दाय प्रभवन्ति स्म। स्वामिवर्यस्य श्रीमुखाद् भक्तेर्ज्ञानस्य कर्मणो ध्यानस्य च तात्त्विकं विवेचनं श्रुत्वा भक्ता अद्वितीयां चेतनामनुभवन्तो दिव्यलोकं साक्षात्कुर्वन्ति स्म। तेन कृता षड्दर्शनानां व्याख्या ब्रह्मसूत्रोपनिषद्गीतेति प्रस्थानत्रय्याः विरचितं भाष्यं सुबोधतया ब्रह्मविद्यायाः क्रियात्मकं रूपमभिव्यनक्ति। न कोऽपि तस्य प्रवचनं विहायाऽन्यत्र जिगमिषति। सर्वदा स श्रोतुमेवाभिलषति। स श्रोतॄणां ज्ञानात्मक–

संचेतनामुद्बोध्य क्रियाया विरचनविधिमेवं प्रस्तौति स्म यन्निरक्षरोऽज्ञोऽपि सहजतया हृदयङ्गमं करोति। सात्त्विकबुद्ध्याऽखण्डनामजप एव साधकैस्साध्य इति तस्योपदेशसारः। साधकस्य साधना तेनैवेश्वरेण परीक्ष्यते। शङ्करकङ्करयोरभिज्ञानं केवलं स एव कर्तुमर्हति। सहजयोगः स्वामिश्रीरामानन्देन 'शब्दसुरतियोग' इति संज्ञितः।

स्वामिश्रीरामानन्दकृतः शङ्खध्वनिर्विरोधिनमपि शान्तं करोति स्म। तस्याऽऽक्रामकवृत्तिः शरणागतौ परिणमति। अन्ततः स स्वामिवर्यस्य शिष्यत्वमङ्गीकृत्य स्वकीयं जीवनं धन्यं विदधाति स्म। एकदा पाश्चात्त्यदेशस्य 'रिलिहा' धर्मगुरुः स्वकीयौ द्वौ शिष्यौ तिर्यग्योनिरूपधरौ स्वामिश्रीरामानन्दसकाशं सिद्धिप्राप्तये प्रेषितवान्। एक सर्परूपधरोऽपरो व्याघ्ररूपधरः। सायन्तने प्रदोषारम्भे तौ द्वावेव काश्यां प्रविष्टौ। तौ दृष्ट्वा नगरे महान् भयसंभ्रमो जातः। नगरस्य सुरक्षासैनिकास्तौ परिग्रहीतुं विविधानुपायान् कृतवन्तः किन्तु विफला एवाभूवन्। द्वावेव सरभसं श्रीमठं तथा जग्मतुर्यथा पूर्वपरिचितौ मार्गस्य। तत्रापि श्रीमठे प्रविष्टौ तौ दृष्ट्वा सामान्यभक्तजनेषु विद्रवोऽभूत्। सिद्धिशिष्यैस्ते समाश्वस्ता विगतभयास्तस्थुः। आचार्योऽनन्तानन्दस्तयोः रहस्यं विज्ञाय निवेदतिवान् मानवाकृतिं विधातुम्। धृतमानवदेहौ तौ द्वावपि आचार्याऽनन्तानन्देन सत्कृत्य सत्सङ्गभवने समुपवेशितौ। तदानीं स्वामिश्रीरामानन्दः गुहायां साधनारत आसीत्।

साधनासमाप्तौ, कृते सति शङ्खध्वनौ तो समागतौ शिष्यौ समुत्थितौ, आत्मभावनिमग्नौ नृत्यपरौ बभूवतुः। नर्तन्तौ तौ सत्सङ्गभवनान्निष्क्रम्य गुहाद्वारे स्थितौ। ततो निष्क्रान्तस्य स्वामिवर्यस्य पादयोः प्रणम्य विनतौ करतलवादनेन सह जयघोषं कृतवन्तौ। आसने समुपविश्य स्वामिवर्यः परिचयं प्रयोजनं च पृष्टवान्। तयोरेक उक्तवान्- 'भगवन्! आवयोर्गुरू रिलिहा परमपूज्यः। स येनाऽभिप्रायेणाऽऽवामत्र प्रेषितवान् तत्प्रयोजनं तु शङ्खध्वनिना भवद्दिव्यदर्शनेन च परिपूरितम्। श्रद्धेयगुरुणाऽऽवाभ्यामात्मज्ञानं क्रियाबोधश्च सम्प्राप्तौ किन्तु सिद्धस्वरूपत्वं तु ज्ञानाग्नौ दग्धे सति कर्मण्येव प्राप्यते। एतदेव प्रयोजनमासीदत्रागमनस्य तत्तु भवद्-दर्शनमात्रेणैव सिद्धम्। महतोऽपि महान् भवान्। विश्वस्मिन् जगति भवादृशोऽपरो करुणामूर्तिर्गुरुर्नास्ति। अथ भवता समुद्धृतावावाम्। अतः परं न काऽप्याकाङ्क्षाऽवशिष्यते। कृपया प्रयच्छतु शुभाशीर्वादान्। अधुनाऽऽवां प्रस्थातुकामावित्युक्त्वा निष्क्रम्य गतवन्तौ। प्रस्थानात्पूर्वमाशीर्वादप्रदानकाले स्वामिवर्यः सन्दिष्टवान्- 'गत्वा मद् वचनाद् रिलिहागुरुर्वाच्यः- 'भवसिन्धुनिमज्जितानामुद्धरणाय स्वयौगिकशक्तयः प्रयोज्याः' इति।

अथैकदा श्रीमठे स्मरणीया घटना घटिता। अनया घटनया स्वामिश्रीरामानन्दो

महाभारतकालेन सह संयुक्तो बभूव। काश्यां भारुकिर्नाम कश्चित्प्रकाण्डः कर्मकाण्डपण्डितः सर्पेण दष्टः। विषप्रभावात्स निःसंज्ञो बभूव। कृतेऽपि सर्वविधोपचारैरौषधीभिस्तन्त्रमन्त्रैश्च, स चेतनां न लब्धवान्। अन्ततः स पण्डितो निष्प्राणतां गतः। स श्रीमठस्यानन्यः सेवक आसीत्। तस्य पुत्रयोर्भार्यायाश्च स्वामिवर्यचरणेऽनन्या भक्तिः। ते स्वामिचरणानां दिव्यशक्तिं सम्यग् जानन्ति स्म। अतस्ते तं शुष्ककाष्ठवद् देहं श्रीमठे स्वामिवर्यसमक्षमानीतवन्तः। लोकसङ्ग्रहसिद्धः दुःखातिविद्धः परमकारुणिकः स्वामिवर्यस्तं तथाभूतं दृष्ट्वा सञ्जीवनमन्त्रेणाभिमन्त्र्य स्वकीयं दक्षिणावर्तशङ्खं दध्मौ। कर्णप्रविष्टमात्र एव शङ्खध्वनौ भारुकिर्नेत्रे समुन्मील्य समुत्तस्थौ। तथाभूतं तं जीवितं दृष्ट्वाऽऽनन्दाश्रुभिः स्वामिवर्यचरणौ प्रक्षालयन्तः सर्वे परिजनाः जयघोषैराकाशं गुञ्जितवन्तः। एतस्मिनन्नेव महोत्साहहर्षकाले क्रोधाविष्टः कश्चिदशिष्टोऽपि विशिष्टः सर्पः स्फूर्तिमान् काल इव सफूत्कृतं सरभसं तत्रागत्य विप्रवेशं विधाय मानुषीं वाणीमाश्रित्योवाच- "स्वामिन्! त्वया साधु न कृतम्। अयं पण्डितोऽस्माकं वंशशत्रुः। प्रतिजन्माऽयं मया दष्टो मृत्युमाप्नोति। महाभारत-कालेऽनुष्ठितस्य सर्पसत्रस्याऽयमेवाचार्यत्वं निर्व्यूढवान्। अयं सर्पवंशस्य महान् विघातकः। अतोऽस्माकं दृढो वैरी। अस्मै क्रूराय पुनरुज्जीवनं दत्त्वा भवताऽस्मान् प्रति न्यायः न कृतः। अनेनास्माकं महती क्षतिः। केनाऽपि सिद्धपुरुषेणोज्जीवितं जीवं वयं न दष्टाम इत्यस्माकं व्रतम्। भवान् सिद्धो महात्मा। किं ब्रवीमि। न जानाति भवानस्माकं रोषम्।"

एतच्छ्रुत्वा स्वामी रामानन्दः सधीरमुवाच- "सर्पराज! व्यपनय क्रोधम्। जगन्नियन्तुरेवेच्छया त्वेवंभूतम्। तेनैव मन्माध्यनेनैषा कृपा कृता। जन्मजन्मान्तरपर्यन्तं वैरं साधितुं न युज्यते। अतोऽस्माद्विरतो भव। आधेहि प्रसन्नतां यतो ह्येतस्मै पण्डिताय वैकुण्ठस्य द्वारमपावृतं यत्र स्वयं ते कुलगुरुः शेषनागो भगवान् द्वारपालरूपेण तिष्ठति। न जाने कियद् वारं त्वया दष्टोऽयं मृत्युमुपगतः। अस्त्यद्यापि किञ्चिदवशिष्टम्? क्रोधमधुना संहृत्य विस्मर प्रतिशोधम्। अवसानं गच्छत्वियं दौर्भाग्यपद्धतिः।"

ततो विप्रवेशधरः सर्पो न्यवेदयत्- "श्रुतं मया। यः श्रीमठे समायाति स पूर्णकामो भवति। करुणाकरेण भवताऽयं पण्डितः पुनरुज्जीवितः। सर्पदंशमृत्योरस्यायं समुद्धारः। अहमपि भवतः कृपाकाङ्क्षी। कृपया समुद्धरतु माम्"- इति ब्रुवन् स विप्रवेशधरः सर्पः स्वामिचरणावुपजग्राह। स स्वामिना शिरसि दत्तहस्तो निर्मोक इव सर्पदेहं त्यक्त्वा दिव्यदेवयोनिं प्राप्तवान्। कस्यचिन्महामुनेः शापवशादेवास्यापीयं दुर्गतिरासीत्। तं पण्डितं कण्ठेनाऽऽश्लिष्य स्वामिवर्यं च प्रणम्य यथाभिलषितं निर्ययौ।

अनेन प्रकरणेन न केवलं कलियुगो द्वापरेण संयुक्तोऽपि तु स्वामिवर्यस्याऽनवद्या कीर्तिस्त्रिभुवनव्यापिनी बभूव। अनेन स्वामिवर्यस्य सर्वभूतदया समधिकं विस्तारिता।

एतादृशैरलौकिकैश्चमत्कारिवृत्तान्तैरनुदिनं श्रीमठः परं यशो लेभे। चतुर्योजनविस्तृतो पुण्ये गङ्गातटेऽवस्थितः श्रीमठः पावनं तीर्थस्थलं बभौ। कदाचिद् भिक्षुकवेशधरो महाकालेश्वरो विश्वनाथश्चापि श्रीमठामागच्छति स्म। वाटिकाभिर-तिथिशालागोशालाभिस्तथा चान्नदानैः सुसम्पन्नः श्रीमठः स्वामिनः श्रीरामानन्दस्य जीवनकाल एव सनातनधर्मस्य विशिष्टं यशोमण्डितं केन्द्रं समभूत्।

(११)

दिव्यात्मा स्वामी रामानन्दो मुक्तहस्तेन स्वीयां सञ्जीवनीं संरक्षिणीं मुक्तिदायिनीं च करुणां वितरन् धर्माय, संस्कृतये समाजाय चाऽऽध्यात्मिकशक्तीनां यावन्मात्रं विकिरणं कृतवान् स स्वयमेक इतिहास एव। तद्युगस्य महायोगिना श्रीरामानन्दाचार्येण सह तस्य दक्षिणावर्तः शंखस्तद्ध्वनिश्चैकाकारताङ्गतः। अयं दक्षिणावर्तशङ्खो भगवता वेणीमाधवेन मात्रे सुशीलायै वरदानमिति समुपहृतः। शङ्खोऽयं पुत्रायैव दातव्य इति भगवता वेणीमाधवेन सुशीला निर्दिष्टाऽऽसीत्। वस्तुतः स शङ्खो नासीद् भौतिकः शङ्खः। स तु सूक्ष्मचेतनाशक्तिसम्पन्ना दैवी शक्तिरासीत्। तस्मिन्नेतावती चितिमयी ह्याध्यत्मिकी शक्तिरासीत् सन्निहिता यत्तस्य ध्वनिः श्रद्धाहीनं नास्तिकमपि जनं परमं सुखं वेदयति स्म। तस्य मनसोऽशेषाः संशयाः भ्रमा अन्तर्द्वन्द्वाश्च ध्वनिश्रवणमात्रेण तिरोहिता भवन्ति। सोऽपि दिव्यानुभावेन विवशः सद्य एव शरणागतिं प्रयाति स्म। स्वामिवर्येण यद् भक्त्यान्दोलनं प्रवर्तितं तेन न केवलं विस्तारं प्राप्य विधर्मिणामत्याचारवात्याऽवरुद्धाऽपितु धर्मान्तरणं मूर्तिभञ्जनमपहरणं शीलहरणमित्यादिभिर्दुष्कृत्यैर्पीडितं समाजं संरक्ष्य, हताशां पराभूताञ्च मानसिकतामुद्बोद्ध्य तं प्रतिरोधस्य निर्भयशक्त्या सम्पृक्तमकरोत्। दीर्घायुष्यः स्वामी श्रीरामानन्दो दक्षिणापथादानीय भक्तेर्विमलां कावेरीधारां परिवर्त्य पुण्यां भागीरथीधारां निर्मायोत्तरे भारते प्रवाहितवान्। यथा कश्चिद् वृक्षोऽनुदिनं वर्धमानः कदाचित्काल-वशाज्जीर्णो भूत्वा विनश्यति तथैवेदं शरीरं जीवात्मनो जीर्णं भूत्वा धराधामतोऽपयाति। स्रष्टुर्योजनानुसारेणैवाऽयमात्मा शरीरबद्धो भवति। कस्यचित्प्रयोजनस्य पूर्तिं विधातुमेव तस्य शरीरधारणम्। उद्देश्यपूर्तौ सति तस्य प्रस्थितिः। स्वामी श्रीरामानन्दः साक्षाद् रामावतार एव। तस्य धरावतरणं लोकाराधनाय लोकरक्षणाय च। तेनासन्नभीषणसङ्कटानां

विस्तारात्प्रागेव धर्मसमाजयो रक्षाहेतवे सहजभक्तेस्तादृशी सुदृढा भित्तिर्निर्मिता यस्या भङ्गो न केनापि विधर्मिणाऽत्याचारिणा वा शक्यः। तस्यावतरणप्रयोजनं प्रायः पूर्णतां गतः। शिष्यत्वदीक्षाभिरुदारैश्चोपायैस्तेन सिद्धपुरुषाणां बृहन्मण्डलं परिकल्पितम्। एतन्मण्डलं बिभर्ति स्म सामर्थ्यं सङ्कटनिवारणाय धर्मस्य, संस्कृतेः समाजस्य च रक्षणाय। ईश्वरीयं कार्यमीश्वरीयशक्तिरेव विदधाति। इत्थं स्वामिश्रीरामानन्दस्यावतरणप्रयोजनं सुतरां सिद्धम्।

अथैकस्मिन् दिवसे एकः श्वेतपक्षो हंसो व्योममण्डलादवतीर्य श्रीमठप्राङ्गणे ललितकलितमन्दगत्या गुहां प्रति प्रस्थितः। तमनुसरन्नैकः कपोतोऽपि धूसरवर्णः पादौ निक्षिपन् गुहां प्रविश्य स्वामिवर्यस्य दक्षिणहस्ताब्जमधिरुह्य स्थितः। निवारितोऽपि तथैव तस्थौ। पक्षिणः प्रायेणान्नकणलुब्धा भवन्ति। गुरुवर्यस्य संकेततोऽनन्तानन्दः सर्षपानानीय तत्रैकस्मिन् पात्रे स्थापितवान्। स कपोतः करादवरुह्य सर्षपेषु चञ्चुं दत्तवान्। एवं कृत्वा स स्वामिनश्चरणावुपगम्य पक्षान् धुनोति स्म। कियत्कालमेवं कृत्वा तत उड्डीय प्रणष्टः। हंसस्यातिथ्यं दुग्धपूर्णपात्रेण कृतम्। तेन जलांशं हित्वा दुग्धं पीतम्। सोऽपि चञ्चुना स्वामिपादौ परामृश्य निर्गतः। एतद्रहस्यं दिव्यादिष्टं मत्वा श्रीमद्रामानन्द 'एवमस्तु' इति सङ्केतेन प्रतिबोधितवान्।

अथ महायोगी स्वामिवर्यो मौनभजत्। तत्रोपस्थितैः वरिष्ठशिष्यैस्तन्मौनरहस्यमनुमितम्। तेषां मुखच्छाया मलिना बभवू। तेषां नैराश्यमपाकर्तुं जगद्गुरुः प्रोवाच- "संयोगवियोगौ तु भौतिकमनोविकारौ। आध्यात्मिकदृष्ट्या न कस्यचिज्जन्म भवति न वा मरणम्। संयोगो वियोगो वा, मर्त्यलोके गमनागमनं वा सर्वमेतन्मिथ्यासम्बन्धारोपितो मोह एव।"

अनन्तानन्दः सविनयमुवाच- "गुरुदेव! भगवत्सृष्टौ श्रद्धाऽस्ति, भक्तिरस्ति प्रेमाऽपि वास्ति। विरक्तादप्येते नापयान्ति। अपसरणमपि नैव युज्यते।"

कबीरो निवेदितवान्- "गुरुदेव! इमं सङ्केतितं भावार्थं लोककल्याणार्थं कियत्कालपर्यन्तं व्यपदिशतु, का हानिरत्र?"

स्वामिवर्यः प्रोक्तवान्- "सर्वे सर्वं जानन्ति। ब्रह्मदेवो धर्मराजश्च स्वयमागत्य तथाऽऽमन्त्र्य समक्षमेव गतवन्तौ। अनेनेदं प्रतीयते यदपरः कोऽपि महापुरुषः शीघ्रमेवेदमवशिष्टं कार्यं कर्तुमागमिताऽस्ति। अथवा, यत्कार्यमपेक्षितमासीत्तत्पूर्णम्। अथवा, काऽप्यन्या दैवी योजनाऽऽकारं ग्रहीष्यति। एतत्सर्वं भाविरहस्यं को विज्ञातुमर्हति। मया तु तयोरादेशः पालनीयः। धर्मस्य देशस्य च समधिकतरा चिन्ता स परमात्मा बिभर्ति। मुक्तात्मानस्त्वेतत्कर्तुं भारतभूमिमागमनाय प्रतीक्षन्ते। तेभ्य इदं भारतं शाश्वतं

रोचते। युष्मान् प्रति केवलमेक एव मदीयोऽनुरोधः। यावत्काऽपीश्वरीया नवीना योजना नायाति तावद् युष्माभिरेवमेव कार्यम्। लक्ष्यमलक्ष्यं मा भवेत्। सम्प्रति समाजे समरसताऽपेक्ष्यते। एतावतैः प्रयत्नैः स्थापिता या एकता, यत्सौहार्दं यश्च सद्भावः एते सर्वे मा विनश्यन्तु। समाजोऽभेदं प्रतिनिरन्तरमग्रेसरतु। संघटिता शक्तिरेवाऽऽसन्नसङ्कटानि निवारयिष्यति। तथापि यदि कुत्रचित्काचिदावश्यकता प्रतीयते तत्तु सृष्टिनियन्तैव पूरयिष्यति।"

गुरुदेवस्याभिव्यक्तमभिप्रायमवबुद्ध्य दुःखकातराः खिन्नमानसास्ते शिष्या मौनमेव ततो निर्गता। केवलं वरिष्ठः शिष्योऽनन्तानन्द एव तत्राऽवस्थित इति दृष्ट्वा रामावतारो जगद्गुरुः श्रीरामानन्दः चैत्रशुक्लपक्षस्य नवम्यां तिथौ प्रातर्वेलायां स्वकीयं महाप्रस्थानं तं सूचितवान्।

आचार्योऽनन्तानन्दः कातरोऽपि सन् धैर्यमवलम्ब्य वरिष्ठशिष्यैः कवीररविदासादिभिः सह मन्त्रणापुरस्सरं सत्सङ्गभवने काशीस्थानां श्रद्धालुभक्तानां सभामायोजितवान्। सभाऽऽह्वानस्य प्रयोजनं सर्वैः पूर्वमेवानुमानितम्। तथापि तत्र स अनन्तानन्दः सबाष्पकण्ठं स्वामिवर्यस्य साकेतगमननिर्णयं सूचितवान्। पूर्वदिवसे घटितं हंसकपोतवृत्तान्तमधिगम्य, तदनुसारेण स्वामिवर्येण कृतं निश्चयं श्रुत्वा सर्वे मर्माहताः, 'अतः परं किमि'ति किं कर्तव्यविमूढतां ययुः। इयं मोक्षपुरी धर्मधुरी काशी स्वामिवर्यस्य कारणादेवाऽधुना विश्वविश्रुताऽऽसीत्। तं विना विश्वनाथयुताऽप्यनाथा म्लानिं ग्लानिं च यास्यति। भावविह्वलान् शोकार्तान् सर्वान् नियतिकृतनियमरहस्यमाख्याय स ईषदिव समाश्वस्तानकरोत्। 'स्वामिवर्यो भौतिकशरीरं परित्यज्यापि दिव्यसूक्ष्मशरीरेणाऽस्माकं मध्य एव विचरिष्यतीति अनन्तानन्दमुखाच्छ्रुत्वा सर्वे सजलनयनाः बभूवुः। तेषां वर्धितो हृत्कम्पः सामान्योऽभवत्।

अथाऽऽचार्योऽनन्तानन्दः सर्वेषां समक्षमष्टदिवसीयां योजनां प्रस्तुतवान्। तदनुसारं तेषु तेषु भगवदनुष्ठानेषु स्थानीयाः बाह्याश्च श्रद्धालवो भक्ताः सन्तश्च सम्मिलिता भविष्यन्ति। अनुष्ठानानि प्रतिदिनं चतुर्धा भविष्यन्ति। प्रातःकाले सत्सङ्गभवने ध्यानमुद्रया मौनं तारकमन्त्रजपः, तदनु विराट् श्रीराममहायज्ञः, अपराह्णे जगद्गुरोः प्रवचनम् सायं-रात्रौ भजनकीर्तने। अन्तिमेऽष्टमे दिवसे चैत्रशुक्लपक्षस्याऽष्टम्यां तिथौ कोट्याहुतियज्ञो भविता। सम्पूर्तिश्च समष्टिवृहद्भोजयोजनेन सह भविष्यति। एतत्सर्वं भवद्भिरेव व्यवस्थापितव्यमिति।

सर्वैरियं योजना सहर्षमनुमोदिता। के के किं किं दायित्वं निर्वक्ष्यन्तीत्यपि विनिश्चतम्। यद्यपि समेषां हृदयानि शोकसन्तप्तान्यासन् तथापि सर्वाण्यनुष्ठानानि

स्युः सफलानीति महतोत्साहेन सर्वे कार्यव्यापृता अभवन्। सर्वेषां मनसि जगद्गुरोः कृपाऽऽकाङ्क्षाया सात्त्विको भावः समुल्लसति स्म। को न वाञ्छति सतां महात्मनामाशीर्वादान् भवभयत्राणपरान्!

चैत्रकृष्णपक्षस्यामावास्यां तिथावेव श्रीमठे आमन्त्रितानामनामन्त्रितानाञ्च महत्सम्मर्दमालक्ष्य तत्रत्याः वरिष्ठाः शिष्याः सहयोगिभिः शिष्यैर्भक्तैश्च सह स्व-स्व नियोगेषु संलग्नमनसा निरताः बभूवुः। स्वामिवर्यस्य दिनचर्या पूर्ववत् प्रचलति स्म। साकेतगमनं परिलक्ष्य स नासीद् दुःखकातरो नापि सुखसम्भृतः। आत्मरूपेऽवस्थितः सामोदः। न रागो नापि विरागस्तस्मिन्नालक्ष्यते स्म। सैव ध्यानसाधना, स एव शङ्खध्वनिः। स एव सत्सङ्गस्तथैवाशीर्वादप्रदानक्रमः। न क्वचित्काचिन्न्यूनता। अमावस्यातिथौ सायङ्काले सोऽवश्यमेवानन्तानन्दमपृच्छद् यत्कियन्तो जनाः कुत आगताः? समागतानामुचिताऽऽवासभोजनादिकी व्यवस्था सुचारु वर्तते न वा? सत्सङ्गभवनेऽपि नाम सङ्कोचः स्थानस्य? आचार्योऽनन्तानन्दस्तं सर्वं यथोचितं संसूच्य तोषयामास।

अपरेद्युः समागताः सज्जनाः सत्सङ्गभवने समवेत्याऽऽचार्याऽनन्तान्दस्य निर्देशानुसारेण पद्मासनं बद्ध्वा, ध्यानमुद्रायां स्थिताः पंक्तिबद्धा मौनं तारकमन्त्रं जपंति स्म। सर्वत्राऽनिर्वचनीया शान्तिः प्रसृताऽऽसीत्। धरावतीर्णं शून्यमिवाऽऽलोकमाना निवातस्था दीपशिखेव विराजमाना सहस्राणां साधकानामविरला पङ्क्तिः कामप्यनिर्वचनीयां छटामुपस्थापयति स्म। गुहोत्थितं शङ्खध्वनिं श्रुत्वा सर्वे ध्यानमग्नाः साधकाः स्वान्तःकरणेषु शाश्वतानन्दस्यानुभूतिं कृतवन्तः। नेत्रेषु किञ्चिदपूर्वं ज्योतिः पूरितम्। साधकानामानन्दस्य सीमैव नासीत्।

अपराह्णे पृथङ्निर्मिते विशाल प्रवचनमण्डपे यथाकालं शङ्खध्वनिना प्रबोध्य जगद्गुरुः श्रीरामानन्द आगत्योच्चपीठिकाध्यवसितासने विराजमानो बभूव। सुंचारुव्यवस्थयाऽनुशासनेन च तत्र किमप्यपूर्वं दृश्यमासीत्। स्वामिवर्यस्यागमनात्पूर्वं तत्र सुरसुरानन्देन 'रामध्वनिः' (लोके 'रामधुन' इति) प्रक्रियते स्म। रकारमकारयोर्ध्वनिना परिवेशो राममयो बभूव। आगते सति स्वामिवर्ये सर्वे स्व-स्वस्थानादुत्थिताः तमभिवाद्य पुनस्तत्रोपविष्टाः। प्रसादमयी नीरवता सर्वत्र भ्राजते स्म। सर्वेषां नेत्राणि स्वामिवर्याननासक्तान्यासन्। श्रोत्राणि च श्रवणोन्मुखानि सञ्जातानि।

'सियाराम' इत्युच्चार्य स्वामिश्रीमद्रामानन्दः प्रसन्नमुखमुद्रया मधुरं सधीरं प्रोवाच- "प्रेयांसः सज्जनाः! धराधाम्नि ममागतस्यैकादशाधिकं शतं वर्षाणि व्यतीतानि। षोडशवर्षीयाय मह्यं श्रद्धेयाः गुरुवर्याः मन्त्रदीक्षां दत्वा नूतनं जीवनमुपहृतवन्तः। योऽपीदानीमस्मि तत्सर्वं श्रीगुरुचरणानामेव प्रसादतः। (नेत्रे मीलयित्वा स गुरुवर्यं

प्रति मौनप्रणतिं न्यवेदयत्)।

सात्त्विकी बुद्धिर्मोक्षं कामयते। संसारस्याऽनित्यत्वमङ्गीकरोति। परब्रह्मैवाऽस्याः सृष्टेरुत्पादकः पालकः संहारकश्चास्तीति मन्यते। अयमभेदभावस्तां कर्मप्रभावात्संरक्ष्य मोक्षपात्रतां प्रति नयति। कर्मक्षय एव जन्मजन्मान्तरबन्धनाद्विमुच्य मोक्षपथे न्यस्यति। भवन्तः सर्वे ज्ञानमेतत्सम्यगाधाय स्वत आचरन्तीति भवतामत्र श्रीमठागमनेन सिद्ध्यति। दैनन्दिनकर्माणि तु करणीयान्येव। एष धर्मः शरीरस्य। अस्मिन्नन्तःकरणं साक्षित्वं भजते। यदाऽन्तःकरणं क्रियाशीलं भवति तदा क़र्मणो बन्धनकारित्वनिरसनाय निष्कामत्वमसम्पृक्तत्वमनहंभावत्वं सर्वथाऽपेक्ष्यते। सर्वाणि कार्यजातानि प्रभुप्रेरितान्येव। वयं यत्किमपि कुर्मस्तत्तु तस्य प्रेरणयैव, तस्यैव प्रदत्तप्रयोजनपूर्त्यर्थम्। य एतद्भावयति तस्मिनन्नहम्भावो न भवति। एतदेव निष्कामत्वम्। अत्रेशोपनिषदो मन्त्रः प्रमाणम्—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्।।१।।

निखिलमिदं दृश्यमानं जगत्तेनैवाऽवेष्टितम्। धनं केन सह याति? निर्लोभतोऽस्य त्यागपूर्वकं भोग एव वरम्। श्रुतिरियं ज्ञानविज्ञानमाख्याति। न केवलं लोभोऽपितु षड्रिपवः सर्वैर्मनुष्यैः परिहर्तव्याः। धर्मशास्त्रैः पञ्च हितसाधनानि जीवनमूल्यानि समुपदिष्टानि—सत्यमहिंसाऽस्तेयोऽपरिग्रहो ब्रह्मचर्यञ्च। सर्वाण्येतान्यवश्यमेव जीवने धारणीयानि। आण्विका खलु प्रकृतिः। अस्या अणुमात्रे सत्त्वं रजस्तम इति गुणत्रयं निरन्तरं विपरिणमति। एते गुणा एव जीवमात्रस्य प्रकृतिं निर्धारयन्ति। ब्रह्मणः छायापत्तिमात्रेण प्रकृतिः सचतेनेव प्रतीयते। इयं प्रकृतिः 'माया' इति पदेनाऽपि व्यपदिश्यते। अत इदं ब्रह्म चिदचिदपि कथ्यते। ब्रह्मैवास्य जगतो निमित्तमुपादानञ्च कारणम्। तदेव जीवमात्रस्य देहमधिवसन् कर्ता भोक्ता चोच्यते। मायोपेतो ब्रह्म तु जीवो गुणत्रयवृत्तिपरः। सत्त्वगुणो जीवमात्रमचिदादपेत्य चितं प्रति गमयति। ब्रह्मैव मायामाध्यमेन सर्ववस्तूनां नियमनं करोति। अतो विशेष्यरूपस्य ब्रह्मणश्चिदचिदिति विशेषणम्। एवं, चिदचिद्विशिष्टं ब्रह्म इत्यप्युच्यते। सूक्ष्मकारणावस्थायाः स्थूलकार्यावस्थायाश्च नियामकः चिदचिद्विशिष्टं ब्रह्मेति द्वयोरभेदोऽद्वैतः। अत एव निजं धर्मसिद्धान्तं विशिंष्टाद्वैतमिति कथयामि।

चेतनमित्यात्मतत्त्वं प्राणिमात्रं व्याप्नोति। स्थूलरूपा जडप्रकृतिः चैतन्याभावे स्वयं नैवाध्यवसति। तेन तस्याः क्रियावस्था सर्वथाऽसिद्धा। ज्ञानवशान्मानवशरीरं श्रेष्ठतममतस्तस्मिन् तर्को, विवेकोऽध्यवसायश्च सात्त्विकबुद्धौ विलसन्ति। सृष्टिरहस्यं विज्ञातुं मानवमात्रे जिज्ञासा भवति। अथातो ब्रह्मजिज्ञासाऽपि। आत्मसाक्षात्कारः कस्मै

न रोचते? दुःसाध्योऽपि प्रियतम एष विषयः। योऽयमात्मा स एव परमात्मा। परमात्मदर्शनोत्कटलालसा भक्तिरिति निगद्यते। स परमात्मा सच्चिदानन्दरूपः सर्वज्ञः सर्वव्यापकः सर्वशक्तिमांश्च। तं प्रत्यनन्यप्रेमैव तस्य प्राप्तये समुत्प्रेरयति। इयं प्रेमाभक्तिः तं प्रापयति। तं प्राप्तुं सरलतमो मार्गस्तु केवलं रामनामशब्दसुरतियोग एव। नान्यः सरलतमः पन्था विद्यतेऽयनाय। श्रद्धया विश्वासेन सहायं मार्गः सेवनीयः। अनेनात्मदर्शनमात्मकल्याणञ्च निश्चप्रचमि"त्युक्त्वा रामनामोच्चारणैः सह स्वामिवर्यो विरराम।

सायंतनीयं भोजनादिकं गृहीत्वा सर्वे रात्रौ भजनं कीतर्ननञ्च कुर्वन्ति स्म। एवमेव प्रतिदिनं चतुरायामी कार्यक्रमः प्रचलति स्म। अपरेद्युर्यथाकालं पुनः प्रबोधनपरे सम्बोधने जगद्गुरुः विंधर्मिणामत्याचारैस्त्रस्तस्य समाजस्य त्राणार्थं भयमुक्त्यर्थञ्च सन्तानामाह्वानं कृतवान्- "आत्मज्ञानिनोऽत्रभवन्तः सर्वे। सर्वभेदोन्मूलका अभेदस्योपासकाः। अद्वैतस्य मीमांसाकाः स्थितप्रज्ञाश्च। भवन्त एव समाजस्य शोषित-वञ्चित-दलितवर्गानालिङ्ग्य तथाभूतेभ्य उच्चवर्गेभ्यस्तेषामधिकारप्राप्तौ समर्थाः सहायकाः। समाजस्य विशिष्टवर्गेण क्रियमाणां तेषामुपेक्षातिरस्कारावहेलनां समीक्ष्याऽवसरलाभेन विधर्मिणस्तान् प्रलोभ्य धर्मान्तरणं कारयन्ति। एतदतिरिक्तम्, अस्माकं मध्य एव तादृशानि मत-मतान्तराणि सन्ति यानि स्वोपज्ञकल्पितमात्मगौरवं स्थापयन्ति सनातनव्यवस्थातः पृथक्सत्तामङ्गीकुर्वन्ति। केचन तादृशा अपि सन्ति ये वामाचाराः पञ्चमकारैः समाजस्य सात्त्विकतां दूषयन्ति। नारीणां स्थितिस्तु तादृशी शोचनीया संवृत्ता यत्ताः दिवा प्रकाशेऽपि गृहादेकाकिनी निर्यातुं नानुमताः। पापाचारः सदाचार इव गण्यते। एतादृशेषु दुर्दिनेषु कः करिष्यति समाजस्य चिन्ताम्। जनाः समष्टिभावं विस्मृत्य व्यष्टिभाव एव रमन्ते। आतङ्कः क्रौर्यमराजकत्वञ्च चरमं स्पृशन्ति। रक्षका एवेदानीं भक्षका भूताः। परकीया विधर्मिणो देशे प्रविश्य बलात्करेण सत्तां निजकरे कृतवन्तः। सम्प्रति तेषां सत्ताच्युतिरसम्भवा प्रतीयते। किन्तु येऽस्मदीया मार्गभ्रष्टाः मूलाच्छिन्नाः मिथ्यामतोपेताः पाखण्डाश्रयिणः हेयसम्प्रदायविभक्ताः तान् संशोध्य पुनः सन्मार्गं नीत्वाऽत्रैकमञ्चे आसीनान् विधातुं शक्नुमः। एतत्कार्यं सन्तः कर्तुमर्हन्ति। एकात्मद्रष्टारो ये सन्तः तेषां दृष्टौ सर्वे समाः सन्ति। स्वयं कलिकालेन गुहायां मामुपगम्य देशस्य, धर्मस्य, समाजस्य च दयनीयां स्थितिं सविवरणमाख्याय निवेदितोऽस्मि प्रजाकष्टमपनेतुम्। साक्षिणो भवन्तः, मया प्रथमतया जीर्णशीर्णरूढ्योऽव्यावहारिक्यश्च परम्पराः निर्ममत्वेनाघातिता, प्रहृत्य च ध्वस्ताः। श्रीमठस्य द्वारं सर्वेभ्योऽभेदतयोद्घाटितम्। अस्पृश्य इति कथितः समाजो मया

दृढमालिङ्गितः। धर्मान्धैरातङ्कवादिभिः क्रियमाणं प्रजापीडनं मया निर्बन्धितमुनमीलितञ्च। सद्ग्रन्थाः प्रमाणयन्ति यत् तैस्तैरवतारपुरुषैर्भिल्लनार्योच्छिष्टानि बदरीफलान्यास्वादितानि, कौरवसभायां नग्नतां नीयमानाया नार्याः लज्जारक्षणार्थं तस्याः वस्त्रं सुसंवर्धितम्। पुनश्च दुष्टानां विनाशाय युगे युगे सम्भवाम इत्यपि प्रतिज्ञातम्। भवन्तोऽपि धराधाम्न्यवतरिताः सिद्धसन्तः सन्ति, कथं नैतद्दायित्वं निर्वोढुं समर्थाः? जीवन्मुक्तदशायां समाजे विचरन्तः स्वीयेन ज्ञानेनाऽऽचरणेन च समाजे धर्मस्यैक्यं सामरस्यं च स्थापयितुं कथं न सहायका भवेयुः? सम्प्रति कालः समाजस्य संघटितां शक्तिमपेक्ष्यते। दुष्करमपीदं कार्यं भवद्भिरवश्यमेव करणीयम्। निरन्तरं भावि देशं, समाजं धर्मञ्च संरक्षितुं त्रातुं वा यावद् युवसन्ततिक्रमो नाग्रेसरति तावदराजकताया अयं घटाटोपो नैव प्रमार्ष्टुं शक्यम्। वेपते धरित्री धेनुश्च। कामुकता चरमं स्पृशति। दम्भेन प्रणवः प्रस्तरीकृतः। कपटेन ज्ञानस्य कन्था परिधारिता। अनृतेन ऋतस्याडम्बरं कृतम्। एतादृशे विषमे काले भवादृशा एव तपोनिष्ठाः समदर्शनाः सन्तो मध्येधारां निमज्जमानं समाज–जलयानमुद्धर्तुं प्रभवन्ति।

एतादृशा सहिष्णुपरिवेशः केवलं श्रीमठ एव कल्पितो न कार्यसाधकः। अस्य विस्तारस्तु सर्वेष्वाश्रमेषु, सम्प्रदायेषु, देवालयेषु, धर्मधामःसु अनिवार्यतया करणीयः। ये जना बाह्याः, धर्मोऽपि येषां बाह्यः, येषां पर्वाणि भिन्नानि, संस्कृतिपरम्परा, संस्कारास्त्वन्याः, येषां हृदयेषु भारतीयतायाः लेशमात्रमपि नास्ति, तेऽपि सतां वचनेषु श्रद्दधति। भवन्तस्तेभ्यो यदपि ज्ञानं प्रदास्यन्ति तत्ते ब्रह्मवाक्यमिव स्वीकरिष्यन्ति। अतः समाजस्य क्लेशान् स्वीयान् क्लेशानिति मत्वा सेवापरायणाः स्युः।" इत्येवमुपदिश्य स्वामिवर्यो विरराम। 'श्रीराम जयराम जय जय राम' इति समुच्चारयन् गुहां प्रविष्टवान्। श्रद्धालवोऽपि श्रोतारस्तथैवोच्चारयन्तः स्वामिवर्यस्य जयघोषं चक्रुः।

अष्टमीपर्यन्तमेष एव क्रमः पदं करिष्यतीति अपरेद्युः स्वामिवर्यस्यागमनं यावत्सुरसुरानन्दस्य रामध्वनिः प्राचलत्। आगते सति स्वामिवर्ये तत्र प्रवचनमण्डपे, श्रोतार आत्मानुशासनतः सुस्थिताः शान्ताश्च सञ्जाताः। अद्य प्रवचने जगद्गुरुः साधकेभ्यः साधनास्वरूपं विवृण्वान्–

"स्वकीये विग्रहे सर्वप्राणिषु च परब्रह्मणो रामस्य दर्शनमेव सर्गः। विमुक्तः पुरुषो यदि गुणातीतामवस्थां नाप्नोति ततस्तस्य वैराग्यं निरर्थकम्। यो भगवत्स्वरूपं सम्प्रधार्य द्वन्द्वातीतः कामनाहीनश्च जीवति, सैव विरागी विशुद्धश्च त्यागी। फलाशोपरतिरेव यथार्थस्त्यागः। नामरूपे समाश्लेषपरावासनातो जीवस्य मुक्तिरेव त्यागस्य महिमानं व्यनक्ति। ध्यानसाधनां विना नात्मसाक्षात्कारो न चैव योगस्यामरत्वाप्तिः।

सुषुप्तिस्वप्नजाग्रतावस्थासु, दैनन्दिनेष्वाचारविचारेषु, देहाश्रितप्राणवायौ, प्रकृतेः समस्तकार्यव्यापारेषु या चेतनामयी सत्ता परिव्याप्ता, सा तु रंरकारध्वनो सञ्चरमाणो रामध्वनिरेव। अनयो रकारमकारयो रमणक्रीडां स एव पश्यति यो ध्यानसाधना-बलेनाऽन्तर्दृष्टिसम्पन्नो भवति। प्रणवस्याद्यनादिरूपं, तस्य प्रत्यक्षशृङ्गारः सोऽहमित्यस्याधारः तद्रामनामैव। जीवञ्च शिवञ्च प्रकृतिञ्च पुरुषोत्तमञ्च घटे-घटे या प्रस्थापयति सा सत्ता तु रामनामैव। रकारमकारयुतं रामनामैकममूल्यं रत्नम्। इदं 'रामनाम' यदा सद्गुरुर्मन्त्ररूपं शिष्यायोपदिशति तदा तच्चेतनरूपात्मकं भूत्वा साधके प्रविश्य स्वीयामनिर्वचनीयामर्थवत्तां समुद्घाटयति। रामनामरटनं तावत्स्याद्या-वत्सञ्चरितप्राणवायौ साधकेन रकारमकारयोर्ध्वनिर्न श्रूयते। गुणातीतावस्थायां ध्वन्यात्मकेऽस्मिन् प्रकरणेऽविरलतया समुत्पद्यमानस्यानाहतध्वनेः ध्वन्यात्मकेऽस्मिन् प्रकरणेऽविरलतया समुत्पद्यमानस्यानाहतध्वनेः सारस्तु रामनामैव। यावत्कर्णौ रामनामध्वनिमिमं शृण्वतः जानीहि तावत्ते चित्तमविचलितध्यानगोगे निरतम्। यस्मिन् क्षणे कर्णयोः श्रवणसंवेदनमस्य ध्वनेर्नास्ति, तस्मिन् क्षणे ध्यानयोगो ध्वस्तः। तच्चित्तं क्वचिदन्यत्र भ्रमति। न तस्य रतिर्विद्यते रामनाम्नि। यतिस्तु रतेरितिः। योगे चित्तं समाधाय रामनामध्वनिर्निरन्तरमनुभूयताम्। योगिनस्तद्ध्यानावेव रमन्ते। रामे (तत्त्वशब्दे) अखण्डात्मिका प्रीतिः (सुरतिः) प्रवर्धताम्। श्रद्धया भक्तिरपि प्रवर्धताम्। प्रेम्णा भक्तेर्योगोऽपि जायेत। इयं प्रेमाभक्तिरेव 'शब्दसुरतियोग' इत्युच्यते। 'सुरतिः' तु शब्दस्याऽनाहता स्थितिः। शब्दसाधना भवति योगसाधना। योगसिद्धिरपि शब्दसुरतिरेव। अयमस्ति सहजलययोगः। अथ ब्रह्मरामेऽनुरक्तेः पराकाष्ठा त्वेव शब्दसुरतियोगः। अस्यामेव चरमावस्थायामलौकिकानन्दस्य रसवर्षणमाप्नोति साधकः। वेदेष्वप्ययं शब्दसुरतियोगः सङ्केतितः। छान्दोग्योपनिषदि विधिरेष वर्णितः। शब्दस्तरे तु ब्रह्मस्वरूपे रामेण सह समुत्कटमिलनोत्कण्ठा 'शब्दसुरतियोग' इति जानीयात्। विंशतिमिताः सन्ति घट्यः सुषुम्नायां याः समुत्क्राम्य चेतना चतुर्थं द्वारं समाप्नोति। सुखासनं पद्मासनं वा बद्ध्वा ऋजुमेरुदण्डेन स्थित्वा, ध्यानावस्थितरामनामगतेन योगिनस्तमन्तिकं यान्ति। कण्ठादवरुह्य नाम चेतना हृदयं प्रविशति। श्वासप्रश्वासैस्सह नाडीषु प्रत्येकं रामनाम ध्वनति। स ध्वनिः स्वत एव योगिनां कर्णेषु श्रूयते। हृदयादवक्रम्य यदा सा शब्दचेतना मणिचक्रमाप्नोति तदा स्वयमेव दिव्यत्वं भासतेऽनुभूयते च। ततः सा नामचेतना स्वाधिष्ठानं क्रमन्ती मूलाधारे सार्धत्रिवारं वलयीभूतां कुण्डलिनीं जागरयति। तदा शरीरयष्टौ वेपथुः कम्पनञ्च जायते। अत एव चेतनाया ऊर्ध्वगमनं प्रारभते। एतत्तु साधकस्यापरं नूत्नं जन्म। इयं चेतनाऽग्रेसरन्ती सुषुम्णा पथा चतुर्थं द्वारमुपगम्य तत्र

विहरता वायुना संघट्टते। तदा तत्र मेघानां संघट्टध्वनिरिव श्रूयते। 'रं' कारध्वनिव्याजतः कदाचिच्छञ्झध्वनिः कदाचिच्च वेणुनादः श्रूयते। एष एवाऽनाहतो नादः। तमेवाऽनाहतं नादं श्रावं श्रावं सिद्धो योगी तं परमब्रह्म रामं साक्षात्करोति। साधकस्य चेतना तस्यां महाचेतनायां प्रविश्यैकाकारतां गच्छति। सैकाकारता शाश्वती अक्षुण्णा स्यादिति भवतामखण्डानन्दानुभवाय निरन्तरं शब्दसुरतियोगाभ्यास एकनिष्ठोऽपेक्ष्यते। तदानीमात्मपरमात्मयोर्भेदो विगलति, द्वैतभावो विलीयतेऽद्वैतभावः प्रतिष्ठतो भवति। स्वाधिष्ठानेऽनन्तशक्तीनां विलासो जागर्ति। शरीरं चिन्मयं सूक्ष्मं चानुभूयते। अनाहतो नादो निरन्तरं श्रुतिगोचरं भविष्यति। नेयं काचिदसाध्या क्रिया प्रक्रिया वा। योगश्चायं सहज एव। अतः 'सहजयोग' इत्युच्यते। परमसत्तया मिलनोत्कण्ठा विरहिणामुत्कण्ठा-तोऽपि तीव्रतरा समुत्कटा स्यादित्येक एवोपायोऽत्र। इयमेव विरहातुरता 'प्रेमा भक्ति' रिति लोके ख्याता।" एवमुक्त्वा यदा स्वामिवर्येण विरामसूचको 'राम' इति शब्दः समुच्चारितः, तत्रत्यैः समैः साधकैस्तन्मयीभावेन तन्महाभावमनुभूय सहसोत्थाय स्वामिवर्यस्य जयघोषैः प्रवचनमण्डपो गुञ्जारितः।

आचार्यस्याऽनन्तानन्दस्य संयोजने सर्वाणि कार्याणि यथोचितरूपेण प्रचलन्ति स्म। चतुर्थे वासरे स्वामिवर्येण नूतनः प्रवचनविषयो गृहीतः। सोऽब्रवीत्- "बदरीवने स्थितेन महर्षिणा बादरायेण यानि परमार्थसूत्राणि विरचितानि तानि समग्रतया 'ब्रह्मसूत्रमि' ति प्रथितम्। ज्ञानविज्ञानयुतैः तत्त्वान्वेषिभिः ऋषिभिः संहितासु सन्निहितान् दार्शनिकमन्त्रान् चित्वा उपनिषदः निर्मिताः। धर्मयुद्धप्रसङ्गे कुरुक्षेत्रे रणभूमौ भगवान् श्रीकृष्णो विषादग्रस्तमर्जुनं युद्धाय सन्नद्धं कर्तुं यदुपदिष्टवान् तन्महाभारतकारेण महर्षिणा वेदव्यासेन 'श्रीमद्भगवद्गीते'ति संज्ञितम्। अथ ब्रह्मसूत्रमुपनिषच्छ्रीमद्भगवद्गीता- एते त्रयो ग्रन्थाः समुदिता लोके 'प्रस्थानत्रयी' ति विख्याताः। एतेषां त्रयाणां समुदितं ज्ञानमेव वेदान्तो नाम। वेदरूप ज्ञानस्यान्त एव वेदान्तः। भारतीयदृष्ट्याऽत्र प्रस्थानत्रय्यामथ च, वेदान्ते दर्शनज्ञानस्य पूर्णता। अतः परमार्थेच्छुभिरवश्यमेव वेदान्तः पठनीयो मननीयश्चाचारे स्वीकरणीयः।

"परमेश्वरस्य त्रीणि रूपाणि भासन्ते- जीवात्मा, प्रज्ञात्मा परमात्मा च। चिदाभासो जीवात्मा, चिन्मयः प्रज्ञात्मा, चिदानन्दश्च परमात्मा। एते त्रयोऽपि परस्परमभिन्नाः खलु। सुषुप्तौ प्रतिदिनं प्रज्ञात्मा मिलति किन्तु मायामोहिता नावबुद्ध्यन्ते। जीवात्मा त्वणुरूपः। गुणवैषम्यात् प्रतिघटं जीवो भिद्यते। ब्रह्म त्वेक एव निर्गुणश्च। तस्य दासीव त्रिगुणात्मिका प्रकृतिस्तस्माद् भिन्ना। सगुणं ब्रह्मैव कृपया निर्गुणब्रह्मणः स्वरूपं शिष्यानाऽऽख्याति। निर्गुणब्रह्म प्रति प्रापकः स गुरुरेव। नान्यः पन्था विद्यते तन्निर्गुणं

ब्रह्म विज्ञातुम्। यथार्थतस्तु गुरुरेव सगुणब्रह्म। सगुण ब्रह्म हि प्रत्यक्षम्। निर्गुणब्रह्मणो दर्शनं सगुणब्रह्मैव कारयति। अतः साधकानां प्रथममिष्टं सगुणब्रह्मैव। किन्तु परमपदप्राप्ताः साधका अभेददृष्ट्यैव तत्परमं तत्त्वं ब्रह्म अभिजानन्ति। असिद्धे साधके तद्द्वैतं प्रतिभासते किन्तु दिव्यदृष्टिसम्पन्नः सिद्धसाधको द्वन्द्वातीतो भवति।"

"आत्मतृप्तो जीवात्मा परमात्मैव भूत्वा विगतनामरूपोपाधिर्भवति। स्वयं ब्रह्मत्वमधिष्ठाय द्वैतातीतोऽद्वैतो भवति। प्रपञ्चस्तु पारिभाषिकशब्दानामथ च वितण्डावादिनां तर्कशास्त्रिणाञ्च। एकमपि वारं येन सोऽखण्डानाहतानन्दो लब्धः, शुद्धबुद्धचेतनत्वमवाप्तं, पुनः कस्तर्कः कश्च विवादः? विषयो निर्विशयो भवति। तत्र केवलं निर्णयः। साधकैस्सदा षड्वाक्यानि ध्यातव्यानि 'तत्त्वमसि', 'तत्तवाऽस्ति', 'तत्त्वमिवाऽस्ति', 'तत्त्वमेवासि', 'त्वं तस्यैवाऽसि', 'त्वं तदिवाऽसि'। अनेन सहजश्चैकत्वबोधः। हृदि तदाप्तुं भावोऽपि दृढतरो जायते। गुरुमन्त्रेऽपीयमेव शक्तिः। तस्मिन्नगाधोऽचलो दृढतमश्च विश्वासः करणीयः। गुरुमन्त्रशक्तिः सन्देहविषया कथमपि नास्ति। गुरुगोविन्दयोर्मध्ये यदन्तरं तदापूरितुं गुरुमन्त्र एव समर्थः। गुरुमन्त्रे गुरोः शक्तिरस्ति सन्निहिता। एतस्मिन् श्रद्धा, भक्तिः प्रेम चैव प्रमाणम्।" इत्यनेन सह तद्दिनस्य प्रवचनवसितम्। 'सियाराम' इति सादरमुच्चार्य स्वामिवर्यः गुहायां प्रविष्टः।

अथ पञ्चमदिवसवृत्तम्। सर्वेषु कार्येषु यथायोग्यं शिष्याः, साधकाः, भक्ताः श्रद्धालवः, सन्तश्च पूर्णनिष्ठया संलग्ना आसन्। सङ्कल्पितानि सर्वाणि कार्यक्रमाणि यथावन्निर्बाधं प्रवर्तन्ते स्म। अपराह्णेऽद्यापि यथाकालं प्रवचनमण्डपे समागत्य स्वामिवर्यः प्रवचनमारब्धान्– "भवन्तः सर्वेऽपि सन्त्यास्थावन्तो विग्रहाः। भवतां हृदयेषु सर्वात्मना स आस्तिकभावो विलसति। सर्वमपि वस्तुजातं प्रत्यात्मिकी दृष्टिर्भवतामनुभवामि यतो हि सर्वत्र भवतामाचरणं शाश्वतीं सांस्कृतिकीं परम्परामभिव्यनक्ति। स्रष्टुः सृष्टेः संस्कृतेश्चास्तिको भाव आस्थारूपेण प्रतिफलति। साऽऽस्था भवत्सु सर्वेषु परिलक्ष्यते। इयमास्था सर्वोदात्ता सांस्कृतिकी चेतना विनम्रश्चाचरणं परम्परायाः। समाजस्य स्वत्वं, संस्कृतेः परम्परा, राष्ट्रस्याऽस्मिता, गौरवशालिन इतिहासस्य बोधः– एते सर्वे सम्पृक्ताः सन्ति तयाऽऽस्थया। चिन्तनस्यौदात्यं, धर्मानुरूपमाचरणं वैज्ञानिकी च सिद्धिः, अस्याः प्रामाण्यं व्युत्पादयन्ति। आस्था मानसे पदं धत्ते। अस्या जन्म सांस्कृतिकपरम्परायाः स्वीकृतौ भवति तथा चाऽस्या अभिव्यक्तिर्धर्माचरणे भवति। एवं हीयमास्था नास्ति काचिन्निरपेक्षसत्ता। सापेक्षचिन्तनस्यैवेयं सुघटितं फलम्। अस्याः समाजसापेक्षित्वमस्ति उदात्तं प्रत्यग्रेसतुं निरन्तरमाऽऽकाङ्क्षा।

आस्था शाश्वतं मूल्यं बिभर्ति। अस्याः समुत्पत्तिस्तु मानवचिन्तनस्य पराकाष्ठा।

इयं पराकाष्ठा श्लाघ्याः परम्पराः सूते। परम्परा संस्कृतिं निर्माति। आस्था नास्ति किमपि काल्पनिकं वस्तु। कालसापेक्षतया कालबाह्यं सत्यमियम्। आस्थाऽस्ति तज्जीवनमूल्यं, यन्न केवलं वर्तमानेन सहाऽपि तु भूतेन भविष्येण च सह संस्पृष्टम्। स्थूलतः सूक्ष्मं प्रति, अनुदात्तत उदात्तं प्रति, अणुतो विराटं प्रति, भौतिकताद् आध्यात्मिकतां प्रति अग्रेसारयन्तीयं श्रेष्ठतमा सांस्कृतिकी चेतना खलु आस्था। अनया सांस्कृतिमूल्यान्यभिज्ञायन्ते। इयं मूल्यानामर्थवत्तान्वेषणाय प्रेरयति। अस्या एकमेव लक्ष्यं किन्तु साधनोपाया बहुशः सन्ति। जना आस्थामाऽऽस्तिकताञ्च समानरूपां पश्यन्ति। नैवम्। बाह्यस्याऽऽन्तरिकी स्वीकृतिरस्ति आस्तिकता, यावदान्तरि-कस्वीकृतेर्बाह्याचाराभिव्यक्तिरस्ति आस्था। एवं हि आस्था विद्यते व्यापकतरा। इयमेव जीवनमूल्यं भूत्वा जनानां समग्रव्यवहारेऽभिव्यज्यते।

अधुनाऽस्माकं आस्था परित आक्रम्यते। इदमाक्रमणं तु स्पष्टमेव भौतिकतापरं भोगपरं, व्यक्तिपरं धर्मान्धतापरञ्च। आहता खलु संस्कृतिर्विलयति। अस्माकं माना निराकृताः शिरो धुन्वन्ति। जननीनिभा गावोऽत्र समक्षमेव वधं नीयन्ते। दुराचारेण सीदन्ति मातरो भगिन्यश्च। एतादृश्यां विषमपरिस्थतौ यदि वयमौदासीन्यं भजामः, कर्तव्यविमुखा भवामः तदा देशस्य, धर्मस्य संस्कृतेश्च कस्त्राता? सत्तासिंहासने (शासनाधिकारे) विधर्मिणः सन्त्यासीनाः। ते यादृशानमानवीयानत्याचारान् प्रकुर्वाणाः सन्ति, मौनमाश्रित्य तद्दर्शनं स्वत एव मृत्योः कालस्य वाऽऽवाहनम्।

इदं राष्ट्रियं कर्तव्यमिति मत्वा श्रीमठेनाऽस्य रक्षणं स्वीकृतम्। लोकसङ्ग्रहदृष्ट्या मठेनानेन प्रान्ते प्रान्ते सिद्धाः सन्तः प्रेषिताः। तन्माध्यमेन समाजस्य यद्रक्षाकवचं श्रीमठेन प्रकल्पितं तदतोऽप्यधिकं दृढं विधातुं समीहे। समाजो धर्मात्संस्कृतेश्च सांस्कृतिकी च चेतनाऽपितु राष्ट्रिया चेतना जने जने दृढतया पदं न्यस्यत्वित्यपि दायित्वं श्रीमठस्य। लोकसङ्ग्रहस्य यावन्तोऽपि प्रकल्पाः श्रीमठेनाऽऽरब्धा तेषामनजस्त्रता मा भूयादित्यपि भवद्भिरेव विचारणीयम्। राजशासनं त्वेतावत् क्षीणं, शक्तिहीनं विभाजितञ्चास्ति यत्तदेतत्सर्वं कर्तुं सर्वथाऽसमर्थं मे प्रतिभाति। तेन तु धर्मान्धानां भोगवादिनां च समक्षं जानुपातः कृतः। अतोऽस्माभिर्भक्त्यान्दोलनबलाज्जनमानसमास्थया सुदृढं संयोज्यम्। तद् बन्धनं श्लथं मा भवेत्। देशं, समाजं, धर्मं, संस्कृतिञ्च यदि कश्चित्त्रातुं समर्थः, तत्तु भक्त्यान्दोलनमेव। यदि धर्मरक्षकाः सन्तोऽविचलिताः स्युस्तदा समाजोऽपि निर्विकारोऽविचलितश्च स्थास्यति। अत्रभवन्तः सर्वे विवेकशीला बुद्धिमन्तः, स्मृतिमन्तो मतिमन्तश्च। वर्षाद्वर्षेभ्यः श्रीमठेन तस्य च क्रान्तकारिभिर्नीतिभिर्योजनाभिश्च सम्बद्धाः सहयोगिनश्च। अतोऽलमतिविस्तरेणे'ति 'जयसियाराम' इति पवित्रं पदमुच्चार्य स विरराम।

अद्य जयघोषो नाऽभूत्। सर्वे मौनाः गहनविचाराब्धौ निमग्ना आसन्। आचार्योऽनन्तानन्दो गुरुवर्यं गुहां यावदनैषीत्।

अथाष्टदिवसीयस्यानुष्ठानस्य षष्ठो दिवसः सम्प्राप्तः। पूर्वाह्णकार्याणि पूर्ववत् सम्पादितानि। अपराह्णवेलायां प्रवचनमण्डपे सिद्धाः सन्तः, भक्ताः श्रद्धालवो गृहस्थाः, विरक्तसंन्यासिनः, ब्रह्मचारिणः शिष्या अन्ये च नागरा दूरतोऽप्यागताः सज्जनाः श्रोतारः तथैव परमनिष्ठया स्वामिवर्यं श्रोतुं यथोचितेषु स्थानेषूपविष्टाः। सुरसुरानन्दः तन्मयो भूत्वा मधुरस्वरेण रामध्वनिं कुर्वन्नासीत्। गुहातो शङ्खध्वनिरुत्थितः। कियत्कालानन्तरमेव स्वामिवर्यः प्रवचनस्थले समायातः। सर्वे समुत्थिताः सादरमभिवन्दितवन्तः। रामध्वनिरवसितः।

अद्यतने प्रवचने जगद्गुरू रामानन्दाचार्यः समाजे सामरस्यस्य सामयिकं प्रसङ्गमनेकधा विविच्य जनान् प्रबोधयामास। सोऽब्रवीत्- "वयं प्रत्यक्षं पश्यामोऽनुभवामश्च यदधुना ईश्वरं प्रति आस्थाभावः तेषु समधिकं वर्धितो वर्धमानश्च दृश्यते ये जनास्तथाकथितैरुच्चवर्गीयैर्महानुभावैरस्पृश्या नगण्या इति समुपेक्षिताः। धर्मं प्रत्येतेषां निष्ठा तादृशी बलवती यद्येते धर्माय धर्मरक्षणाय वा मृत्युमप्यङ्गीकुर्वन्ति। पर्वसु, व्रतेषु, अपरेष्वपि धर्मानुष्ठानेषु सदैवैतेऽग्रस्थानीयाः दृश्यन्ते। भवन्तो जानन्त्येव, श्रीमठेन स्वकीयमैकान्तिकं रूपं विहाय लोकहितार्थं परमार्थतया लोकसङ्ग्रहपरं रूपं स्वीकृतम्। लोकमङ्गलस्य यत्कर्तव्यं श्रीमठेन निर्व्यूढं तत्तु युगेतिहास एव सम्भूतः। एतासु निम्नवर्गो यासु जातिष्वपि सन्तः सन्त्येव। ते ज्ञानवतो गुरूनपेक्षन्ते। किन्तु द्विजाः पण्डिताः एतेषां मार्गदर्शका भवितुं नैव प्रस्तुताः। एते उच्चवर्गीया गुरवः पुरोहिताः पण्डिताः स्वकीयं गृहं व्यक्तित्वं वा निर्मातुं चिन्तिताः सन्ति, न तु राष्ट्रं निर्मातुं समाजं सन्धातुं वा। स्वकीयश्रेष्ठत्वदर्पान्धा इमे न श्रद्दधति जन्मभूमिं प्रति नापि स्निह्यन्ति वञ्चितं शोषितं पीडितं वा समाजम्। अस्माभिर्जातिपङ्क्त्यादीनां मिथ्याभेदान् विधूय, एते सादरं मन्तव्याः स्वीकर्तव्याश्च। यतो ह्येतेऽपि समाजस्याङ्गभूताः सनातनधर्मस्य प्राणभूताश्च सन्ति। एतेषामुपेक्षाऽवहेलना वा नोचिता। धर्मस्य नाम्नि कलङ्कोऽयम्। प्रमार्ज्यः कलङ्क एषः। श्रीमठो रूढिं भिनत्ति। रूढिं परिहृत्य श्रीमठः समुद्घोषयति 'स्त्रीणां धर्मेऽधिकार' इति। इदानीं सन्ति श्रीमठदीक्षिताः स्त्रियो विरक्ताः सन्तः। ये स्त्रीणां छायामपि तिरस्कुर्वन्ति ते दुर्बलमानसिकताग्रस्ताः सन्ति। श्रीमठस्तु हरिभजनकेन्द्रम्। नात्र जातिवादो नापि व्यक्तिवादः। भक्तेः द्वारं सर्वेभ्योऽनावृतम्। न किमपि कर्म हीनमपवित्रं वा। कर्मप्रधानं खल्विदं विश्वम्। संसारस्य कर्माधारत्वं सर्वैः स्वीकृतं प्रसिद्धञ्च। 'सन्त' इत्यस्य नाभिप्रायः कर्मवैमुख्यम्। स्वे-स्वे कर्मण्येव

हरिदर्शनं कुर्वन्तु भवन्तः। प्रत्येकं कर्म हरेरेव कर्म। 'हरेरेवाज्ञया हरये एव करोमि कर्मे'ति हरिभावनया कर्मकरणे को दोषः? 'त्वदीयं कर्म गोविन्द तुभ्यमेव समर्पये' इति भावभावितस्य कर्म प्रभुरेव स्वयं पूर्णतां नयति। सिद्धाः सन्तः तथ्येनानेन सुपरिचिताः सन्ति। भवतां माध्यमेन प्रभुः महत्कार्यं कर्तुमिच्छति। सन्त एवास्य देशस्य संरक्षकाः। प्रवृत्तिमूला भक्तिरेव भागवतधर्मः। अतो कर्म तु मुक्तिसाधको न तु बाधकः। लोकसङ्ग्रहः साम्प्रतिको युगधर्मः। परमेश्वरेण भक्ताधारितं धर्मनिष्ठं समाजसङ्घटनमादिष्टम्। तस्य पालनमवश्यमेव भवद्भिः करणीयम्। सन्त एवास्य देशस्य निमज्जमानां तरिणीमुद्धृत्य संस्कृतितटं प्रत्यानेष्यन्ति। भक्तिरेव कर्णोऽस्याः तरिण्याः आत्मसाक्षात्कारस्यैतावान् सुगमो विधिः संसारेऽस्मिन् नान्येषु धर्मेषूपलभ्यते। एतदर्थं न तु हिमवतः कन्दरासु गन्तव्यं नापि महर्घं कर्मकाण्डमनुष्ठेयम्। कर्म कुर्वन् नामस्मरणे क आयासः? को व्ययः? का च हानिः? समाप्ते सति कार्ये क्वचिदेकान्तमाश्रित्य स्थित्वा तस्य चिन्मयस्य ध्यानं कुर्यात्। सततमभ्यासेन, तस्मिन् निमज्जितेन, चेतनाया ऊर्ध्वयात्रा स्वत एव चतुर्थं द्वारं प्रापयति। न किमप्युपकरणमपेक्ष्यते। केवलं प्राज्ञं तत्त्वदर्शिनं सिद्धं गुरुं शरणं गच्छन्तु।" एवमुक्त्वा स्वामिवर्यः 'सियाराम'इत्युच्चार्य मौनमभजत। अद्यतनमुद्बोधनं मर्मस्पर्शि आसीत्। सर्वे श्रोतारो यन्त्रिता इव, अभिमन्त्रिता इव मुग्धा केवलं स्वामिवर्यमुखासक्तदृष्टय आसन्।

सप्तमे दिवसे स्वामिवर्यस्य प्रवचनविषय आसीद् गुरुमहिमा। सश्रद्धं गुरुस्मरणं कृत्वा स्वामिवर्योऽवोचत्- "यस्तमसो ज्योतिर्गमयति स गुरुः। स एवैवं गमयितुं समर्थो यः स्वयं प्रकाशरूपोऽथवा प्रकाशज्ञः प्रकाशद्रष्टा वा स्यात्। प्रकाशस्य पन्थानं योऽभिजानाति स एव तज्ज्योतिस्स्रोतः प्रापयति। ज्योतिस्तु तमसो विपर्ययम्। तस्य भासैवेदं सर्वं विभाति। तेन ज्योतिषा एवेदं समग्रं नक्षत्रमण्डलं, चन्द्रः सूर्यश्च भासमानाः सन्ति। अयमग्निस्तस्यैव प्रतीकः। यत्र ज्योतिर्नास्ति, ज्योतिःपरं चिन्तनं नास्ति तत्र तु तमोऽज्ञानं स्थास्यत्येव। यत्र परमात्मना सहैकाकारतायै उत्कण्ठा नास्ति, आत्मसाक्षात्कारं कृत्वा दिव्यत्वामाप्तुं चिन्तनं नास्ति, तत्र तमोराज्यं विततं ज्ञेयम्। तज्जीवनमपि चार्वाकजीवनम्। भोगवादपरं नारकीयं जीवनमपि च षड्रिपूणां कण्ठालिङ्गनम्। अनेन परलोकस्तु नश्यत्येव, लोकेऽपि हिंसा, विद्वेषो, द्वन्द्वः, कलहश्च जायन्ते। यावत्योऽपि सामाजिकविकृतयः सन्ति ताः सर्वा उत्पद्यन्ते। शान्तिस्तु समाजस्य समृद्धये कल्पते। सा शान्तिर्धर्मस्य नीतेश्च पवित्रसिद्धान्तानामनुपालनात्सम्भूयते। मानवमूल्यानां प्रतिष्ठायामेव शान्तेः प्रतिष्ठा। आत्मीयं प्रेम अस्या आधारः। शान्ति-

भवनस्य स्तम्भाः सन्ति सत्यमहिंसाऽस्तेयोऽपरिग्रहो ब्रह्मचर्यञ्च। एते कामक्रोधलोभमोहमदमत्सराः शरीरान्तर्वर्तिनः शत्रवो दुर्गुणाः। एतेषां प्रभावतो जीवनमशान्तं सञ्जायते। एभिर्जीवनं विषाक्तं सम्भवति। ये जनाः गुरवो गुरुकल्पाः वा सन्ति, तैरेते परिवर्जनीयाः। गुरवस्त्वादर्शभूताः भवन्ति। तेषां जीवनं स्पृहणीयं भवति। 'गुरुरि'ति शब्दस्य नैकेऽर्थाः सन्ति। आदौ गुरु-शब्दस्य प्रयोगोऽध्यात्मपुरुषाय भवति स्म। कालान्तरे एष शब्दः शिक्षकेभ्यः प्रयुक्ते तदर्थे रूढो जातः। गुरुशब्दस्य वैशिष्ट्यं महत्त्वमेवास्य कारणम्। किन्तु अनेन प्रयोगेण परवर्तिकाले एष शब्द उपहासपात्रमभूत्। गुरुशब्देऽन्तर्निहिता या श्रद्धा भक्तिश्चासीत्, य उदात्तो गरिमाऽऽसीत्तस्मिन्न्यूनत्वमालक्ष्यते।

समाजो धर्मनिष्ठानाऽऽचारपूतांश्च गुरून् सातुरं प्रतीक्षते। भवत्सु नैके महात्मानो गुरूचितामर्हतां धारयन्ति। भवन्तो विज्ञा वेदान्तस्य तलस्पर्शिवैदुष्यमर्जयित्वा सन्नद्धा भवेयुः। अपि स्मरन्ति भवन्तो यद् वामाचारेण कापालिका अघोरपन्थिनोऽवधूताश्च कामाचारिणीभिर्योगिनीभिः सह साट्टहासं श्रीमठमाक्रम्य प्रविष्टा आसन्? एतादृशानां प्रतिरोधाय गुरुर्यौगिकशक्तिसम्पन्नोऽपि भवेत्। अतो दुर्जनप्रतिरोधिनीभिः शक्तिभिः ज्ञानैर्विज्ञानैश्च परिपूर्णसमृद्धः सिद्धश्च भवितुमर्हति। आगामिकालः कुटिलः कठोरः कलुषश्च प्रतीयते। तत्तसम्प्रदायेषु सन्ति वाक्शूरा ये पाखण्डमाश्रयन्ते। तैः सह कलाहन्तो न सुकरः सहजो वा। न जाने कियन्तो ज्ञानदम्भिनः छद्मजिज्ञासया मां शरणमायान्ति। यावद् भवन्तः शास्त्रनिष्णाताः, गूढाध्यात्मतत्त्वविदो न भविष्यन्ति तावदेतेषां वाग्विदूषकानामुपरि स्वगुरुत्वं कथं स्थापयिष्यन्ति? एतेषां मुखानि कथं पिधास्यन्ति?

परमात्मा प्रयच्छतु भवद्भ्यः सर्वेभ्यः सद्बुद्धिम्। परमां शक्तिं, स्वस्थं जीवनं दीर्घायुष्यञ्च प्रयच्छतु। स्मरणीयं भवद्भिर्यदतः परं भवन्त एव समाजस्य पथप्रदर्शकाः, सद्वृत्तीनां संवाहकाः, सत्कर्मणां प्रेरकाः, मानवमूल्यानां विधायकाः नायकाश्चाऽध्यात्ममार्गिणाम्। अस्यैव महदुद्देश्यस्य पूर्तये भवन्तः श्रीमठेनाऽऽहूयन्ते। भवतां शक्तिसमृद्धिमभिज्ञायैव श्रीमठः करणीयं प्रति समाश्वस्तः। सम्मानार्हा भवन्त आदरभाजनानि। श्रीमठस्य किमपि विचित्रमेव वैशिष्ट्यमतोऽन्येभ्यो विलक्षणः खलु। भवद्भिरप्येतदनुभूतं स्यात्। अत्र न कश्चिदाडम्बरो नापि वाक्छलप्रपञ्चः। विशदहृदयानामेष वासः। अत्र श्रीमठे या भक्तिरसामृतधारा प्रवहति तस्यां भवन्तः प्राप्स्यन्ति निश्छलं प्रभुप्रेम, प्रभुमिलनस्योत्कटामाकाङ्क्षां नामजपसाधनां च। एतत्सर्वं हि भवत्समक्षमेव फलीभूतं विराजते। अत्र किमपि प्रमाणान्तरं नापेक्षते। अतः श्रद्धाविश्वासनिष्ठया साधयन्तु साधनाम्। स्वीयेन भविष्येण सह निर्मान्तु समाजस्याऽपि

भविष्यम्। प्रमाणयन्तु गुरुशब्दस्य सत्यार्थम्। इत्येव ममानुरोधः। रामो विजयतेतराम्।"

प्रियशिष्योऽनन्तानन्दः पूज्यगुरुवर्यं गुहां प्रति नीतवान्।

श्रद्धालवः श्रोतारः परस्परं चकितचकितैः नेत्रैः पश्यन्ति स्म। न कश्चित् कश्चिदाभाषते स्म। नेत्राणां भाषा नेत्राण्येवावगच्छन्ति स्म। स्वामिवर्येण यदुपदिष्टं सन्दिष्टं वा तस्य तत्त्वविश्लेषणे सर्वेषां मननं चिन्तनं प्रारभत्। स्वकर्तव्यबोधः समेषामन्तःकरणेषूल्लसति स्म। सन्तुष्टेरेकोऽनिर्वचनीयो भावः सर्वेषामानने प्रतिभाति स्म यन्न किमपि श्रोतुमवशिष्यते।

अथाऽनुष्ठानस्याऽष्टमोऽन्तिमश्च दिवसः सम्प्रातः। यथाकल्पितानि सर्वाण्यायोजनानि सम्पूर्तिप्रायाण्यासन्। अद्य विशिष्टं यज्ञानुष्ठानं प्रवर्तमानमासीत्। श्रीमठस्य प्राङ्गणे सर्वो विधिः सज्जितः। काशीपुर्याः सिद्धाः कर्मकाण्डिनः प्रसिद्धाः याज्ञिकाः समाहूता आसन्। षडक्षरमन्त्रैः पूतानि हविर्द्रव्यानि प्रज्वलितेऽग्नौ प्रहितानि प्रहुतान्यासन्। सस्वरैः मन्त्रोच्चारणैः परिवेशः पवित्रो दिव्यश्च सञ्जातः। अद्यतने सम्पन्ने सर्वस्मिन् कार्यक्रमे स्वामिवर्यस्योपस्थितिः विशिष्टाऽनुभूता। यज्ञस्थले समागतेन स्वामिवर्येण स्वीयो दक्षिणकरो वरप्रदानमुद्रायां समुत्थापितः। करतलान्निःसृतश्चेतनाप्रवाह आध्यात्मिकोर्ज्यया सह सङ्गत्य सर्वत्र निःसीमां शक्तिं सञ्चारयति स्म। अग्निशिखासु साक्षात् स्थितो गुरुवर्य एव प्रतीयते स्म। अचिन्त्यमाने तच्चित्रं दृश्यं निर्वर्ण्य सर्वे धन्यधन्याः बभूवुः। अस्मिन् यज्ञे योऽलौकिकानन्दो भूतः तेन चेतनास्तरे सर्वेषां हृदयेष्वाभासितो यज्जगद्गुरुरामानन्दो रामावतारो ब्रह्मैव नान्यः। अनेन श्रद्धायुतेन विश्वासेन समर्पणस्य भावो हृत्तन्त्रीषु सर्वासु च नाडीषु परिव्याप्तः।

अपराह्नवेलायां यथासमयं स्वामिवर्यः प्रवचनमण्डपे समागतः। तत्राद्य वैशिष्ट्यमासीद्यद् वरिष्ठाः सन्तः स्वामिवर्यमनुवर्तमाना आसन्। तेषु पद्मावती अप्यासीत्। सर्वे सन्तः मौना नतग्रीवा आसन्। सर्वेषामाननेषु खेलन्ती खिन्नता दर्शकान् खेदयति स्म। आचार्योऽनन्तानन्दः पूर्ववत् स्वामिवर्यस्याग्रेसरति स्म। किन्तु तन्मुखमपि खिन्नमाभाति स्म। स्वामिवर्यस्तु सहजो निर्विकारः। हर्षविषादशून्यं तन्मुखं दिव्याभया चकास्ति स्म। यावत्सुरसुरानन्दः स्वामिवर्यमपश्यत्तावत्सोऽपि रामध्वनिं स्थगितं विधाय मञ्चपार्श्वमाश्रितवान्। यदा मञ्चमधिरुह्य स्वामिवर्यो दक्षिणकरमुद्यम्य स्थितोऽभवत्तदा साधकानां शरीरे काचिदकल्पिताऽनिर्वाच्या चेतना सङ्क्रान्ता बभूव। प्रातर्यज्ञकाले दृष्टा छबिरेव नेत्रेषु वासं चकार। आनन्दसागरे निमग्नाः सर्वे साधकाः बद्धैकदृष्ट्या स्वामिवर्यमतृप्ता इव, तृषार्ता इव, भवतापतप्ता इव, मनोरागक्लृप्ता इव, सर्वात्मना विस्मृता इव, क्वचिदचिन्त्यलोके नीता इव, वियोगभीता इव, निभालयन्ति

स्म। 'राम' इति शब्दमुच्चार्य यदा स्वामिवर्य आसने विराजितस्तदा सर्वे भावुकाः यथास्थानमुपविष्टाः। तदानीं सर्वेषां मनस्यासीद्यदिदं प्रवचनं स्वामिवर्यस्य मुखारविन्दान्निःसृतमन्तिमं मधुसुधामयं श्रोतृपेयं भविता। अतः सर्वे साधका दत्तचित्ताः सावधानाः प्रवचनारम्भं प्रतीक्षमाणास्तस्थुः।

स्वामिवर्यो धीरगभीरेण स्वरेण प्रवक्तुमारेभे- "सर्वथा निर्गुणं ब्रह्म भासते। नैतन्मायासंवलितम्। नित्यं सच्चिदानन्दमयं हि तत्। जीवात्मनि द्वे तत्त्वे- 'सत्' 'चित्' च। तमानन्दं समवाप्तुमयं जीवो निरन्तरं व्याकुलो भवति। किन्तु माया निजाकर्षणशक्त्या इन्द्रियाणि वशे कृत्वा मनस आन्तर्मुख्यं विफलयति। तत्कारणादेव मनः पूर्णतां प्रति, आनन्दं प्रति मनागपि द्रष्टुं न प्रभवति। नेदं मनो नित्यं पारमार्थिकं द्रव्यमतो भौतिकमिति विज्ञायते। अस्य मनसश्चञ्चलत्वं नियम्य वैराग्येणाभ्यासेन चास्याऽप्रतिहतगतिमन्तर्मुखीं विधातुमेव ध्यानसाधनेति स्मृतम्। एतदर्थमेव सत्सङ्गो भजनं कीर्तनञ्च।

आणविका खल्वियं प्रकृतिः। अत्र परमाणुरपि त्रिगुणात्मकोऽस्ति। इदं जगत् त्रिगुणमयं ब्रह्म च त्रिगुणातीतम्। सत्त्वरजस्तमश्चैते गुणाः। ब्रह्मणः (परमात्मनः) शक्तिसंस्पर्शतः प्रकृतिरियं यदा चेतनवदिव स्वरूपं प्रकटयति, तदैते गुणाः सक्रियं घूर्णयन्ति। एवमेते समुत्पत्तेः, संस्थितेः प्रलयस्य च कारणानि भवन्ति। एषाऽऽणविका त्रिगुणात्मिका शक्तिर्माया-पदवाच्या। भौतिकीयं भौतिकं मन आकर्षणरज्जुना तद्दृढं बध्नाति। साधनासन्दर्भे यद् गुणातीतत्त्वं मायाऽतीतत्वं वा तत्तु मायातो मुक्तिरेव। मायातो मुक्तेरनन्तरमेव परमात्मदर्शनं सम्भाव्यते। वैराग्यं हि परमार्थस्य प्रथमं सोपानम्। तस्योपादानतत्त्वं भवति सत्सङ्गः। भजनं कीर्तनञ्च भौतिकाकर्षणविस्मारणसाधने स्तः। एतत्सर्वं गुरुणैव साध्यते। स मायां वशीकर्तुं जानाति। तत्समक्षं माया निरुपाया भवति। गुरुमन्त्रो गुरोरपराजेयशक्तेरजस्रो बलवान् प्रवाहो यः साधकस्यान्तःकरणे प्रविश्य मनसो बाह्यगतिमन्तर्मुखीं विधातुं साहाय्यं विदधाति। अतएव गुरोर्महिमा गीयते। सोऽस्ति न केवलं परमात्मयोगकारकोऽपितु परमात्मरूपमेव। अयं गुरुः परमार्थमार्गस्य द्वितीयं सोपानम्। अथात्र सुरतिरवशिष्यतेऽपि च विरहिणीनिभमाकुलितं प्रेम। तन्मयीभवनाय व्याकुलता, निरालसा साधना समुत्प्रेरिके। यस्मिन् यावत्प्रेममयी निर्व्याजा सक्रियता सञ्चरति तस्मिन् तावदेवाऽभीष्टसिद्धिः। स शीघ्रमेव नरान्नारायणत्वं समुपैति। शब्दोऽपि 'ब्रह्म' इत्युच्यते। मन्त्रे प्रयुक्तः शब्दस्तु न केवलं शब्दोऽपितु प्रत्यग् ब्रह्मैव। शब्दो निर्जरः ऊर्ध्वगामी च भवति। सिद्धः शब्दः कारकत्वेन परिणमति। अतो मन्त्रप्रयुक्ताः शब्दा न कदापि निरादरार्हाः। कदाचित् तस्याऽसीमायामपरिमितायां

वा शक्तौ त्वविश्वासो मनसि नैव धारणीयः।

भवद्भिर्वैराग्यमार्गः स्वेच्छयाऽङ्गीकृतः। परमार्थप्राप्तये दृढः शिवसङ्कल्पः प्रतिज्ञातः। मन्त्रशक्तिरप्यर्जिता। भवत्सु नैके तल्लक्ष्यं समधिगतम्। केचन प्राप्तेः सन्निकटं सन्ति। भवतस्त्वेतदेव ममानुरोधो यत्तमुत्कर्षं गौरवं वा सभाजयन्तु। निजपादकर्तनेन समाजः पङ्गुर्न विधेयः। अस्मिन्नेव भवतां श्रीमठस्य च कल्याणं सन्निविष्टम्। अपि च, श्रीमठस्याऽप्यादरः।

आगामिदिवसः श्रीरामनवमीति पुण्यां तिथिं हृद्यं च पर्व बिभर्ति। श्वोऽहं अयोध्यां प्रति गमिष्यामि। तत्राऽसहाय एकाकी एव गमिष्यामि। भवन्तः सर्वे स्वं स्वं स्थानं गत्वा स्वीकयेन मङ्गलेन लोकमङ्गलमाचरन्तु। तच्चिद्धाम गत्वा न कोऽपि पुनरावर्तते। कदाचिन्ममापि ततो निवर्तनं न स्यात्। अतो भवन्तः सर्वेऽखिन्ना अविचलिताः स्युः। स्वकीयान् सर्वान् प्रकल्पान्, सर्वाण्यनुष्ठानानि सर्वांश्च साधनाः सततमग्रेसारयन्तु। भवतोऽद्य देशो धर्मश्च एतदेव याचेते। अथ क्षम्यन्तां मे सर्वाणि स्खलितानि। जय सियाराम, जय जय सियाराम" इत्युक्त्वा शान्तमनाः स तपोधनो विरराम।

अवसिते सति प्रवचने, 'अतः परं स्वामिवर्यो भौतिकजगतः प्रस्थास्यती' ति सञ्चिन्त्य सर्वे साश्रुनयना बभूवुः। कण्ठावरुद्धहृदयानि व्याकुलितानि। ते परस्परमपि नेत्रमेलनेऽपगतसाहसाः। सर्वत्र नीरवता, शून्यता शान्तिश्च प्रसृताः। स्वामिवर्यस्यानने तदेव तेजः सहजत्वञ्च विराजेते स्म। आचार्योऽनन्तानदस्तं गुहाद्वारं नीतवान्।

महद्भोजानुष्ठाने प्रसादस्य वितरणं सायंकालादेव समारब्धम्। वितरणस्थले स्वामिवर्योऽपि प्रवरशिष्येणानन्तानन्देन सहागतः। स्वामिवर्यस्त्वेकस्मिन् प्रशस्तासने समुपविश्य स्वहस्तेन प्रसादं भक्तेभ्यो वितरति स्म। प्रायेण सर्वेष्वेव भक्तेष्वाबालनरनारीवृद्धेषु प्रसादग्रहणादत्तिरिच्य चरणकमले समुपस्पृश्याऽऽशी-र्वादग्रहणलालसा समधिकतराऽऽसीत्। अनायासमेव मुखेभ्यः समुत्थितैर्जयघोषैः गगनमण्डलं परिव्याप्तं बभूव।

त्रिष्वपि कार्यक्रमेषुपस्थितो भूत्वाऽविश्रान्तः स्वामिवर्यः स्वकं दिव्यचेतनाप्रसादं समागतेभ्यः सर्वेभ्यो वितरतिवान्। तं दर्शं दर्शं सर्वे विस्मिता आसन् यतो हि तस्मिन् न क्वचिदासीत् खेदो नापि च श्रान्तिः। ततो गत्वा, सुरसुरानन्दमुपसृत्य तत्रास्थाय स्वामिवर्यो भजनकीर्तनयोरपि यथेच्छमानन्दं गृहीतवान्। प्रयाणकालेऽपि तं स्वामिवर्यं तथाविधं व्यवहर्तुं दृष्ट्वा सर्वे भृशमनुप्राणिता आसन्। जगद्गुरोचिन्त्यमप्रतिममनाख्येयं गौरवं महिमानञ्चानुभूय सर्वेषां मनसि काचिदपूर्वा सन्तुष्टिः पदं लेभे।

अथागतः सोऽन्तिमो दिवसः। १५१५ तमस्य वैक्रमाब्दस्य चैत्रशुक्ला नवमी तिथिस्तथा च सोमवासरोऽद्यासीत्। विगतदिवसे प्रवचनस्य सङ्केतो जनानां हृदये आशङ्कां जनयति स्म। तथापि महायात्रायाः स्वरूपं प्रति भक्ता अनाकुला अपि साकुला आसन्। करुणमेतद्दृश्यं साक्षात्कर्तुं तथाचान्तिमं प्रणामं श्रीचरणयोर्निवेदितुं समस्ताः सन्तः साधकाः शिष्याः प्रशिष्याः भक्ताः नागरिकाश्च नरनार्यः ब्राह्ममुहूर्त एव श्रीमठे समवेताः बभूवुः। सर्वेषां दृष्टिर्गुहा द्वार एव निगडिता आसीत्। अन्तिमं पुण्यदर्शनं कर्तुं सर्वेऽभिलषन्ति स्म। आचार्योऽनन्तानन्दोऽन्यैश्च वरिष्ठशिष्यैः प्राङ्गणे समागतः। सर्वे प्रश्वासं निरुध्य तस्य गुहाप्रवेशं प्रतीक्षमाणास्तथुः।

आचार्योऽनन्तानन्दस्तु पूर्वत एव सर्वं साम्प्रतिकं जानाति स्म। श्रद्धालुभक्तानामन्येषाञ्च सामान्यशिष्याणां सन्तुष्टये 'राम' इति शब्दमुच्चार्य गुहाद्वारावरणं संहृत्य यावत्तत्र प्रविष्टस्तावद्गुरुवर्यरहितां कन्दरामवलोक्य सहसा स्तब्धो जातः। न स्वामिवर्य आसीन्नापि स दक्षिणावर्तः शङ्खः। अन्यत्सर्वं वस्तुजातं यथास्थानं यथापूर्वमासीत्। तत्र चरणपादुके अपि यथास्थानं विराजेते स्म। आचार्योऽनन्ता-नन्दोऽपसव्यं करं नैराश्यमुद्रायां विवर्तयन् यावद्गुहातो बहिरागतस्तावंत्सर्वे तं परिवेष्ट्य स्थिताः। तस्य मुखात्कथमप्येतदेव निःसृतम्—

"गुरुवर्याः सशरीरं निजधाम प्रस्थितवन्तः।"

यावदेषा शोकवार्ता श्रीमठाद्बहिरागत्य नगरे प्रसृता, तावत् काशी स्वर्गाद्भ्रष्टेव, भीषणवात्या नष्टेव, गिरिशृङ्गात्पतितेव, शोकसागरे निपतितेव, अन्धकूपे निपातितेव, गहने तमसि निमज्जितेव, विपच्छूलमारूढेव, कालकक्षे निगूढेव, विवेकान्धमूढेव, पङ्कगर्तपदा करिणीव, विलुप्तरत्नधिया विषीदन्ती, सहाहाकृतमग्रेसरन्ती, सागरं प्रति प्रप्लुता क्षुब्धजला नदीव श्रीमठं प्रति ससम्मर्दं सार्तनादं धावन्तीव देवैरालोकिता। जनानामश्रुभिः पूरिता वीथयो गङ्गाजलौघभ्रममुत्पादयन्ति स्म। नेत्राणि त्वश्रुनिर्झरस्रोतांसि सञ्जातानि। हा आचार्य रामानन्द, हा करुणाश्रय, हा धर्मसम्राट्, हा योगीश्वर, हा रामावतार, हा श्रुतिसेतुपालक, हा विधर्मिछलघालक, हा परमकारुणिक, हा सत्यधर्मप्रचारक, हा जगद्गुरो, तथा चैवमन्यैरपि विरुदैः सम्बोधयन्तो जनास्तं स्मारं स्मारं शिरांसि धुन्वन्ति, वक्षःस्थलानि च ताडयन्ति स्म। सर्वत्र करुणक्रन्दनमासीत्। न कश्चित्किमपि कमपि पृच्छति, न कश्चीत्कमपि पश्यति। सुमहान् जनप्रवाहः केवलं श्रीमठं प्रत्यग्रेसरति। काश्यां यावन्तो मार्गा यावत्यो वीथयः पद्धतयश्च सन्ति, मन्ये तासां सर्वासां प्रयोजनं श्रीमठोन्मुखीभवनमेव। केचन गङ्गाया जलमार्गेण नौकाभिः, केचन बाहुभ्यां तीर्त्वा श्रीमठमुपयान्ति स्म। सिद्धाः खेचरा नभोमार्गेणागत्य श्रीमठाऽङ्गणे

अवतरन्ति स्म। यो यस्यां स्थितावासीदेतद्दुर्घटितं श्रुत्वा सत्वरमहमहमिकया श्रीमठमेव गच्छति। किं बहुना, विश्वनाथोऽप्यनाथो भूत्वा भृशं रुरोद। भगवती अन्नपूर्णा अन्नं विमुच्य खिन्नतां भजते स्म। बिन्दुमाधवोऽपि अश्रुबिन्दून् मुमोच। का कथा मनुष्याणाम्? पशुपक्षिणोऽपि वेदनाऽर्दिताः त्यक्ताहाराः स्वीयं विषादं सूचयन्ति स्म।

समग्रां काशीं स्वीयां च शिष्यभक्तमण्डलीं शोकप्लुतां करुणाऽऽक्रन्दितां विषादविषवेलिवल्लितां वेदनादग्धहृदयां नैराश्यसागरे निमग्नां चावलोक्य नभोमध्याद् दिव्यः शङ्खध्वनिर्दिग्दिगन्तेषु परिव्याप्तः। तस्य ध्वनेः प्रभावेण सर्वेषामन्तःकरणभ्यो मोहावरणं विगलितम्। शोकमेघा विलुप्ताः। अश्रुप्रवाहः स्थगितः। शोकः स्वत एव सुप्तः। बुद्धिर्विशदा बभूव।

वरिष्ठैः शिष्यैर्भक्तैः सन्तैराचार्यैश्च विमृश्य पट्टशिष्य आचार्योऽनन्तानन्दः श्रद्धेयगुरुवर्यस्य स्वामिश्रीरामानन्दस्य चरणपादुके सश्रद्धं शुद्धोदकैः प्रक्षाल्य स्वशिरसि निधाय पञ्चगङ्गाघट्टं प्रति प्रस्थितवान्। महान् जनसम्मर्दो यस्मिन् श्रेष्ठा वरिष्ठाः शिष्याः, भक्ताः, सन्तो महात्मानो महापण्डिता धर्माचार्याः, विरक्ताः संन्यासिनः साधवः साधकाः सिद्धाः ब्रह्मचारिणो गृहस्थाः सेवकाः श्रद्धालवो नरनार्यो वृद्धा युवानो बालकाश्च तमनुयान्ति स्म भगीरथमनुधावन् गङ्गाया महाजलौघ इव। तस्य महाप्रयाणप्रमाणस्य साक्षित्वाय सर्वे शोकाकुला अपि समुत्सुका आसन्।

यावदाचार्योऽनन्तानन्दस्ते पूते चरणपादुके गङ्गायां प्रवाहितुं ह्यन्तिमं सोपानमवक्रम्य जानुपर्यन्ते जले प्रविश्य शिरसोऽवतार्य करे कृत्वा सन्दधौ तावत्ते काष्ठपादुके प्रस्तरीभूते संवर्धितभारे बभूवतुः। इममलौकिकं चमत्कारमनुभूय, स आचार्योऽनन्तानन्दस्तयोर्गङ्गाविसर्जनमकृत्वैव करस्थे ते जलादुद्धृत्य तत्रोपस्थितस्य महतो जनसम्मर्दस्य सम्मुखं प्रदर्श्य तथैव तस्थौ। अपूर्वमद्भुतमलौकिकमविश्वसनीयञ्च चमत्कारमिमं साक्षान्नेत्रगोचरीकृत्वा विस्मयोत्फुल्ललोचनाः सर्वे श्रद्धातिशयेनोच्चैः जयघोषैर्गगनमण्डलं सुकम्पितं चक्रुः। पुण्यश्लोकगतः शोको हर्षे परिणतः। चमत्कारकारि परिवर्तनमिदं 'श्रीगुरुदेवस्य कश्चिदचिन्त्योऽनुग्रह' इति मत्वाऽऽचार्योऽनन्तानन्दस्ततः ताभ्यां प्रस्तरचरणपादुकाभ्यां सह तथैव श्रीमठं न्यवर्तत्। ते चरणपादुके दर्शनार्थं श्रीमठप्राङ्गणे कौशेयवस्त्राच्छादिते पुष्पमालाभिरलङ्कृते काष्ठपीठे संस्थापिते।


अथ ते सर्वे समवेता जनाः काष्ठपीठं परितः समुपविष्टाः। परिवेशं सहजं विधातुं शोकञ्चापाकर्तुं सुरसुरानन्दो रामनामसङ्कीर्तनं प्रारब्धवान्। स्वामिश्रीरामानन्दस्य प्रत्यक्षप्रतीकभूते पवित्रप्रस्तरपादुकाद्वये सर्वैः क्रमशः स्वं-स्वमास्था-श्रद्धामयं पुष्पं न्यस्तम्। दृश्यमेतत्सकरुणं विलोक्य सा करुणाऽपि करुणार्द्रा बभूव।

श्रीमठस्य सम्प्रदायानुसारिणीं विशिष्टाद्वैतमयीं परम्परां परिपालयन् सतीर्थैः सहाऽऽचार्यानन्तानन्दः सर्वाः क्रियाः यथाविधि कृतवान्। यथाकालं ससमारोहं गुहायां पादपीठं निर्माय ते प्रयते प्रस्तरपादुके शास्त्रविधिना तत्र संस्थापिते। महद्ब्रह्मभोजश्चायोजितः। एतावान् जनसम्मर्द आसीत् श्रद्धापुष्पाणि समर्पितुं समवेतो यत्समग्रं राष्ट्रमेव तत्रोपस्थितं प्रतीयते स्म। अविस्मरणीयं खलु तद्दृश्यमासीत्। आस्था-श्रद्धा-प्रेम-भक्ति-शोक-हर्षाणां विचित्रमद्भुतं सम्मेलनं दृष्टं देवैराकाशसंस्थितैः। तस्मिन्नवसरे सुदुर्लभदर्शनाः सिद्धाः सन्तो महात्मानस्तदायो-जितमनुष्ठानं सनाथीकृतवन्तः।

वरिष्ठैः शिष्यैर्महात्मभिश्चाभिनन्दितः प्रवरशिष्य आचार्यो महत्सेवासदाचारपूतः सम्प्रदायनिष्ठोऽनन्तानंन्दः सविधि सम्प्रदायाऽऽच्छादनेन दुकूलपटेनाऽलङ्कृतः श्रीमठस्योत्तराधिकारिपदे महान्तरूपेण प्रतिष्ठापितः।

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।
रामानन्दकथा तावल्लोकेषु प्रचरिष्यति।।
बुद्धिमान् स्मृतिमांल्लोको मतिमांश्च भविष्यति।
रामानन्दं जपन् श्रीमान् कुर्वन् रामे रतिं सदा।।

।।इति श्रीरामानन्दचरितं नाम गद्यकाव्यं सम्पूर्णम्।।



श्रीरामानन्द सम्प्रदाय के एकमात्र मुख्यालय श्रीमठ, काशी द्वारा

हरिद्वार में निर्माणाधीन विश्व का अद्वितीय एवं अनुपम श्रीराममन्दिर

ऋषिकेश रोड, हरिद्वार

प्रकाशक :

जगद्गुरु रामानन्दाचार्य स्मारक सेवा न्यास

श्रीमठ, पंचगंगा, वाराणसी (उ.प्र.) भारत, दूरभाष : 0542-2402730

Printed by : Print 'O' Land, Jaipur # 0141-2210284, 2210486 • E-mail: printo_land@yahoo.co.in